श्रीः

नेपाल—राजकीय
पुस्तकालयस्थहस्तलिखितप्राचीनपुस्तकानाम्
अन्यतमः

प्रतिष्ठालक्षणसारसमुच्चयः

तस्यायम्
एकादशाध्याय पर्यन्तः
प्रथमो भागः

श्री ५ महाराज्ञ्या रत्नराज्यलक्ष्मीशाहदेव्याः
३९ तम शुभ जन्मोत्सवमहोत्सवे प्रकाशितः

नेपाल—राजकीय-पुस्तकालयतः प्रकाशितः

पु.त.प्र.मा. ३७

श्रीः

नेपाल—राजकीय
पुस्तकालयस्थहस्तलिखितप्राचीनपुस्तकानाम्
अन्यतमः

प्रतिष्ठालक्षणसारसमुच्चयः

तस्यायम्
एकादशाध्यायपर्यन्तः
प्रथमो भागः

पण्डित बुद्धिसागरशर्मणोऽध्यक्षतायां

वेदाचार्य दामोदरशर्मणा संपादितः
संपादकेन वेदान्तशास्त्रि पं. बाबुकृष्णशर्मणा च
संशोधितः

नेपाल—राजकीय पुस्तकालयतः प्रकाशितः

थम संस्करण मूल्य । ५०० प्रति



विश्वस्मिन् हिन्दुराष्ट्रस्य अद्वितीयं प्रतिनिध्यमावहत:
नेपालाधिराज्यस्य महतीया महाराज्ञी
श्री ५ रत्नराज्यलक्ष्मी: "शाह"

वक्तव्य

पुरातत्व प्रकाशनमाला अन्तर्गत प्रकाशित हुने प्रस्तुत पुस्तक प्रतिष्ठालक्षणसारसमुच्चयले अनुसन्धानको क्षेत्रमा एउटा नौलो आकर्षणको सृजना गर्न छ । नेपाली कलाको हजारौं वर्षको एउटा लामो परंपरा छ । यो हजारौं वर्षको प्रयासबाट परिस्कृत हाम्रो संस्कृतिको अध्यात्मिक र भौतिक दुवै पक्षको अनुसन्धान गर्नु पर्ने भएको छ । कलाको क्षेत्रमा धेरै अध्ययन गर्न बाँकी छ । यस प्रकाशनले अनुसन्धान कर्ताको रूचि बढाउने छ, यस्मा म विश्वस्त छु । यस अघि पनि पुरातत्व प्रकाशनमालाका दशौं सख्यामा देवताचित्रसंग्रहात्मक प्रकाशनमा आई सकेको छ । यी दुवंको अध्ययन बढी उपयोगी र लाभप्रद हुने छ ।

श्री ५ बडामहारानी सरकारको शुभजन्मोत्सवको उपलक्षमा कलाप्रेमी मौसुफ सरकारको सम्मानमा यो पुस्तक समर्पित छ ।

पुस्तकालयका सबै सहयोगीहरूलाई धन्यवाद ।

समय
वि०सं २०२३ भाद्र ३

रमेशजङ्ग थापा
निर्देशक
पुरातत्त्व विभाग ।

श्रीः

प्रस्तावना

दर्वारलाईव्रेरी — वीरपुस्तकालय इत्यादि नाम्नो पलक्षितस्य एतस्य नेपालराजकीयहस्तलिखितपुस्तकालयस्य महत्वं प्रायः समस्तसंसारे प्रसिद्धमेव कर्णपरंपरया श्रूयतेऽस्म यद् १९९० तमे विक्रमवर्षे जातेन भूकम्पेन नेपालराजधान्यां कान्तिपुर्यां संजाताया महत्याः क्षत्याः प्रसङ्गे विभिन्नमित्रराष्ट्रेभ्यः समवेदनाप्रकटनपुरः सरमेतस्य पुस्तकालयस्य विषये तदानीन्तनप्रधानमन्त्रि श्री ३ युद्ध शम्शेर सविधे अनेके प्रश्नाः समागता आसन्, यत्र पुस्तकालयस्य कीदृशी अवस्था वर्तते यदि तत्र काचित् क्षतिर्भवेच्चेत् विश्वस्यैव महती क्षतिः स्यात्, अतः सर्वप्रथमं पुस्तकालयसंरक्षणविषये यत्नः करणीय इत्यादि। अत एतस्य महत्वं न केवलं नेपालीयाः किन्तु वैदेशिका अपि विद्वांसः सम्यग् जानन्ति। अत्रत्यैर्ग्रन्थै रैतिहासिकविद्वन्मस्तिष्केषु महान् प्रकाशःसमाहित इति च नतिरोहितं गवेषणापरायणेषु पौरस्त्येषु पाश्चात्येषु च महामनीषिवर्येषु।

अस्मिन् संपादनकर्मणि परिश्राम्यन् पं. दामोदरस्तथा संशोधनकर्मणि प्रयतमानः पं, बाबुकृष्णश्च धन्यवादमर्हतः। श्री ५ महाराज्ञ्याश्चित्रफलकं दापयितारं श्री मन्तं निर्देशकं रमेशजङ्ग प्रति चित्रफलकनिर्माणप्रबंधकः हिरण्यध्वजा जोशी महोदयंच प्रति कृतज्ञतां ज्ञपयामि।

निखिल--नेपाल प्रजाजनेषु स्नेहमयीं मूर्तिमादधानायाः नेपालसाम्राज्ञ्याः प्रजावत्सलाया श्री ५ रत्नराज्यलक्ष्मी-साहदेव्याः ३६ नमवर्षप्रवेशनिमित्तकशुभजन्मोत्सव महोत्सवे शुभकामनारूपेणपुस्तकमिदमु पहर्तुं प्राप्तावसरः पुस्तकालयस्य कर्मचारिवर्गः प्रमोदपरंपरापूरितान्तः—करणतया महान्तमानन्दमनुभवति। तदनेन पुस्तकेन विद्वत्सु अनुसंधानकर्तृषुच कमपि उपकारं कुर्यात् यदि तदा श्रमः सफलः स्यादिति कामयमानो लेखनीव्यापारात् विरमति।

कान्तिपुरी

०२३।५।३

बुद्धिसागर पराजुली

अध्यक्षो

वीरपुस्तकालयस्य

श्रीः

अथ प्रतिष्ठालक्षणसारसमुच्चयः
प्रारभ्यते

ॐ नमस्तस्यै [1] ॥

तत्त्वत्रय[2]त्रिदहनत्रिगुणत्रिलिङ्ग
कालत्रयत्रिभुवनत्रिसुरीशरीरम् ।
नेत्रत्रयत्रिपथगाहिपवित्रगोत्र
पुत्रींत्रिशूलभृतमीशमहं प्रणम्य ॥१॥

आगमेभ्यः समाकृष्य कुर्यां लक्षणसङ्ग्रहम ।
ऋजुसक्षेपसंपूर्णं सर्वस्थापनसङ्कुलम् [3] ॥२॥

असंदिग्धं स्फुटार्थं च धर्मकामार्थमोक्षदम् ।
हिताय मन्दबुद्धीनां स्मरणाय मनीषिणाम् ॥३॥

किञ्चित् कचित् स्फुटं चाङ्गं नैकस्मिन् सर्वमङ्गकम् [4]
बहुतन्त्राण्यतो वीक्ष्य क्रमेणैकत्र लिख्यते ॥४॥

---

१ ॐ नमःशिवायेति, ख. पुस्तके पाठः । २ तनुत्रयेति, ग. पुस्तके पाठः । ३ सद्गुणमिति, ग. पाठः । ४ सर्वगात्रकम, ख. पाठः ।

सिद्धिलिङ्गाश्रितेत्येवं शिवप्रोक्तं शिवागमे ।
तदा [१] गमानुसारेण लिङ्गं वक्ष्यामि सांप्रतम् ॥५॥

यतो जातमिदं सर्वं त्रैलोक्यं सचराचरम् ।
लीयते प्रलये यत्र तदिदं लिङ्गमुच्यते ॥६॥

अरूपमप्रमाणं यत्तत्त्रिधा रूपमानतः ।
हीनादि सिद्धयस्तस्माच्छिवपूजोपचारतः ॥७॥

द्रव्यानुकल्पन त्यक्त्वा [३] भक्त्या चाराध्य तत्सदा ।
सर्वज्ञं सर्वदं शुद्धं शिवतत्त्वं च मोक्षदम् ॥८॥

मन्त्रैः शिवोदितैः सिद्धा मुख्या ब्रह्मादिलोकपाः ।
ऋषयो वसवो रुद्रा गणा यक्षा ग्रहोरगाः ॥९॥

दैत्या रक्षांसि सिद्धाद्याः परैश्वर्यपदं गताः ।
अतो नरादिभिस्तत्तु लिङ्गरूपमुपास्यते ॥१०॥

लिङ्गस्य दर्शनं पुण्यं स्पर्शनं पापनाशनम् ।
महाराज्यप्रदा पूजा ध्यानं मोक्षप्रदायकम् ॥११॥

शतायुताश्वमेधानां यज्वनां यत्फलं [४] भवेत् ।
तत्फलं द्विगुणं सम्यग् लिङ्गैकस्थापनाद्ध्रुवम् ॥१२॥

प्रासादे हेमरत्नाद्यैर्यत्पुण्यं [५] नृपतेर्भवेत् ।
तदेव तृणकुड्याद्यैर्दरिद्राणामशाठ्यतः ॥१३॥

---

१ तन्त्रा, मू. अ. क. पा. । २ हिमाद्रि, ख. पा. । ३ न्यस्त्वा, क. ख. ग. पा. । ४ यत्फलं लाभतो, मू. अ. क. ग. घ. पुस्तकेषु पाठः । ५ हेमरत्नाढ्ये प्रस्थितं, ख. पा. ।

देवासुरोरगैः स्थाप्ये नरूपं नैवलक्षणम् ।
लक्षणं लिङ्गधामादौ नरेभ्यो वक्ष्यतेऽधुना [१] ॥१४॥

तत्स्यात्त्रिधा यथासङ्ख्यमव्यक्तं व्यक्तमिश्रकम् ।
लिङ्गं च [२] मुखलिङ्गं च पुंस्त्रियो च नपुंसकम् ॥१५॥

विपद्गृह [३] हरो व्यापी सदा वन्हिरिवेन्धनम् ।
सूर्याष्टाष्टात्मके [४] विष्णुर्ब्रह्मा वेदात्मके विदुः ॥१६॥

एषामैक्यं त्रिभिर्योगाल्लिङ्गमव्यक्तकं भवेत् ।
([५]व्यक्तं मूर्धादिसंयुक्तं [६] व्यक्ताव्यक्तं [७] द्विरूपकम् ॥१७॥

पञ्चधा व्यक्तमावेद्यं व्यक्ताख्यं सप्तधा तथा ।
द्रव्यात्मकं दशधा प्रोक्तं सर्वं द्वेधा चलाचलम् ॥१८॥)

अव्यक्तं मोक्षदं नूनं व्यक्तं भुक्तिप्रदायकम् ।
भुक्तिमुक्तिप्रदं मिश्रमित्येतद्रूपतो भवेत् ॥१९॥

लिङ्गं यदात्मकं कार्यं तन्मानं चैव यादृशम् ।
शीघ्रं सिद्धिकरं यच्च काम्याकाम्याय यद्भवेत् ॥२०॥

तद्द्रव्याणां परीक्षा च आचार्यस्य च लक्षणम् ।
कारुका मूर्तिपाश्चैव [८] वनयात्रादिकं यथा ॥२१॥

नगा नगाधिपा ये च नद्यो या ये द्रुमादयः ।
पुण्यस्थानविभागश्च वास्तुग्रहणमर्चनम् ॥२२॥

---

१ सदा, ख. पा. । २ लिङ्गार्चा, घ. ङ. पा. । लिङ्गस्य, ख. पा. । ३ विपद्गस्त, मू. अ. क पा. । वियद्वृत्त, घ. ङ. पा । ४ पुर्यष्टाष्टा, मू. अ. पा. । सूर्यच्छाया, ग. पा । ५ अयं चापचिन्हान्तर्गतः पाठः ख. पुस्तके नास्ति ।

यथा पुरस्तथा द्वारयोगाद्द १ त्कलशो ऽध्वरः ।
शिवो लिङ्गविधिर्यागो ध्वजपर्यन्तकं तथा ॥२३॥

पञ्चस्थापनसंयुक्तः प्रासादश्चैव तादृशः ।
यतीनामाश्रयो यादृक् प्रतिष्ठा पञ्चधा च या ॥२४॥

ऋतुनक्षत्रयोगश्च [2] वारलग्नाधिवासनम् ।
स्थापने यश्च संभार इत्याद्यखिलमुच्यते ॥२५॥

कुर्याल्लिङ्गा[3]न्ययोरत्नमृत्काष्ठोपलचित्रकैः ।
क्षुद्रकामाय लोहोत्थं रत्नजं बहुसिद्धिदम् ॥२६॥

मृन्मयं सर्वकामार्थं दारुजं त्वाशुसिद्धिदम् [4] ।
साधारेण व्यवस्थाप्यं नश्वरं धातुदारुजम्[5] ॥२७॥

भोगमोक्षप्रदं शैलं तच्च वेश्मनि रोगदम् ।
लिङ्गं च द्विविधं ज्ञेयं [6] चलं चैवाचलं तथा ॥२८॥

चलं वै रत्नजं प्रोक्तं धातुजं च चलाचलम् ।
स्थिरलक्ष्मीप्रदं हैमं राजतं चैव राज्यदम् ॥२९॥

प्रजावृद्धिकरं ताम्रं याङ्गमायुः प्रवर्धनम्[7] ।
विद्वेषकारकं कांस्यं रीतिजं शत्रुघातनम् ॥३०॥

रोगदं सैसकं शत्रोरायसं रिपुनाशनम् ।
अष्टलोहमयं लिङ्गं कुष्ठरोगक्षयावहम् ॥३१॥

---

१ द्वारे येनोक्त, ग. पा. । २ योरत्नेन, मू. अ. पा. । ३ सिद्धा, मू. अ. क. पा. । ४ त्वा शुसिद्धिदम्. मू, अ. क. पा. । ५ नश्वरत्वात्तु दारुजम्, मू. अ. क. ङ. पा. । ६ प्रोक्तं, मू. अ. क. पा. । ७ राङ्गमायुष्य-वर्धनम्, ख. ग पा.

त्रिलोहसम्भवं लिङ्गमन्तर्धानप्रसिद्धिदम् ।
सिक्थं कृत्वा मृदा लिप्त्वा तप्त्वोद्धास्य च कारुकः ॥३२॥
विकारार्कदिशा रन्ध्रवृध्द्या सिक्थान्प्रपूरयेत् ।
हेमाहिम्यां क्रमातारताम्रवङ्गारघोषकैः ॥३३॥
धूस्तूरस्य [१] रसैर्घृष्ट्वा रसं हेम तदङ्घ्रिमत् ।
काष्ठं क्षिप्त्वा दृढं तत्तु शिलावृष्टं सवालुकम् ॥३४॥
जम्बीररससामुद्रपिष्टं तत्पिष्टकं भवेत् ।
तया लवणपूराम्बु [२] युक्तया लेपयेद्बुधः ॥३५॥
कराङ्गुष्ठेन संप्रेर्याकोट्य कोष्ठिकया ततः [३] ।
वाल[४]कुञ्चिकया साम्यं नयेत्तत्क्रमशः शनैः ॥३६॥
भूयो भूयोऽग्निसन्तापात्त्रिधालिङ्गं रसोज्झितम् ।
ततोऽनुमा [५] र्जयेद्यत्नाध्नमणिना मदनाम्बुभिः ॥३७॥
पुनर्वन्हिस्थमाकृष्य लिङ्गं त्रिविधरूपकम् ।
रसये [७] त्ताम्रजं शिल्पी हाटकेन सुचारुणा ॥३८॥
दाहे [८] रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् ।
गुरु स्निग्धं मृदुस्पर्शं [९] षड्विधं हेमशोभनम् ॥३९॥

। १ धूत्थूरस्य, मू. अ. क. पा. । धूत्तूरस्य, ग. पा. । २ तयालवाल पूराढ्यं, मू. पा. । ३ कट्येकोष्ठिकयोस्तयोः, ङ. पा. । ४ काल, मू. पा. । ५ ततोऽन्तर्मा, ख. पा. । ६ ये दृक्षा, घ. पा. । ७ वासयेत्, मू. पा. । ८ वाहे, ख. पा. । ९ मृदु पक्के, ङ. पा. ।

लोहजं पार्थिवं चैव कुर्यान्मन्त्रैर्विधानतः ।
धातूद्भवं समाख्यातं रत्नजादि [१] वदाम्यतः ॥४०॥

आयुष्यं हीरजं ज्ञेयं रोगहृन्मौक्तिकोद्भवम्[२] ।
सुखकृत्पुष्परागोत्थं वैदूर्यं शत्रुदर्पहृत् ॥४१॥

पद्मरागं च लक्ष्मीदमैन्द्रनीलं यशः प्रदम् ।
लिङ्गं मारकतं पुष्ट्यै स्फाटिकं सर्वकामदम् ॥४२॥

महारत्नोत्थलिङ्गानि क्षुद्ररत्नोद्भवान्यतः ।
वैद्रुमं वश्यकमार्थं[३] कार्केतनममित्रहृत् ॥४३॥

पुलकोत्थं तु विद्याकृद्राजावर्तमरातिहृत् ।
बलदं जीवजातीजं टैट्टिभं शत्रुमर्दनम् ॥४४॥

विद्वेषकारकं शौक्तं[४] शाङ्खं सौख्यप्रदायकम् ।
इति प्रस्थानलिङ्गानि शुद्धिमानान्यतः परम् ॥४५॥

द्विविधं रत्नजं लिङ्गं निर्मितं चाप्यनिर्मितम् ।
कारुकै[५] र्घटितं यच्च तल्लिङ्गं निर्मितं स्मृतम् ॥४६॥

स्वभावोत्थं विशुद्धं यद्रत्नजं चाप्यनिर्मितम् ।
तत्पूज्यं राजभिर्यत्नाद्भुक्तिमुक्त्यर्थिभिः सदा ॥४७॥

त्यजेद्विन्द्वन्वितं रौद्रं शूलाग्रं[६] चिपिटं कृशम्
ऊर्ध्वाधोवदनं दीर्घमधः स्थूलं च निष्प्रभम् ॥४८॥

---

१ रत्नजापि, मू. अ. क. पा. । २ मौक्तिकं भवेत्, ख. पा. । ३ वश्यकर्मार्थं, ग. पा. । ४ तौत्थं, घ. पा. । ५ कारुभि, ख. पा. । दारुभि, मू. अ. क. पा. । ६ शूलाभ्रं, मू. पा. ।

मिश्रवर्णं तथाऽव्यङ्गं खण्डं देवोपभुक्तकम् ।
छिद्रं [1]च स्फुटितं त्रस्तं [2] शल्यान्वितं [3] क्षुरोज्झितम् ॥४९॥

तिर्यक् चाधःकृतं यत्तु हीनं मध्ये विवर्जयेत् ।
राष्ट्रगोत्रजनग्राम [4] धनमित्रसुतानपि[5] ॥५०॥

शस्यं यानाबलाबन्धुभृत्यान्निघ्नन्ति तानि च ।
रोगं पराजयोद्वेगं [6] जनद्वेषं कलिं तथा ॥५१॥

प्रवासं दुःख दारिद्र्यं मृत्युं दद्यात्क्रमाद्भृशम् ।
तत्स्याद्दोषैर्विनिर्मुक्तं दृढं स्निग्धं प्रभान्वितम् ॥५२॥

अङ्गाद्यङ्गुल [7] पर्यन्तं शास्त्रज्ञैः सुपरीक्षितम् ।
महारत्नं महामूल्यं गुणयुक्तं यजेत्सदा ॥५३॥

तस्यार्चनाज्जयः शान्तिरारोग्यं विपुलाः श्रियः ।
सुप्रतापो [8] यशश्चायुर्भवेयुर्नृपतेश्चिरम् ॥५४॥

महारत्नान्महासिद्धिः क्षुद्रात्क्षुद्रा प्रजायते ।
नीलं पीतं सितं चापि शस्तं रत्नमनिर्मितम् ॥५५॥

जलेशवातविष्णिवन्द्राग्न्यन्तका वज्रदेवताः ।
शङ्खस्फटिकसंकाशं जवारम्भादलद्युति ॥५६॥

हरिद्रारसतुल्यंच शशवभ्रूक्षिसन्निभम् ।
धौतास्याभो द्विजातीनां नृपार्हौ [9] पीतरक्तकौ ॥५७॥

---

१ स्थिरं, ग. पा. । २ भ्रस्तं, मू. अ. क. ख. पा. । ३ शूलान्वितं, ग. ङ. पा. । ४ कुलग्राम, ङ. पा. । ५ युतानपि, मू. अ. ग. पा. । ६ पराक्रमोद्वेगं, ङ. पा. । ७ मुद्गाद्यङ्गुल, घ. पा. । मुङ्गामुङ्गल, मू. अ. क. पा. । मुद्राद्यङ्गुल, ङ. पा. । ८ संप्रतापो, ख. पा. ९ नृपादौ, लि. पु. पा. ।

वैश्ये हरितपीतौ च धूसरं तु चतुर्थके ।
शूलं चाधोर्ध्वतो यस्य वक्त्रं स्यात्तच्छिवात्मकम्
तल्लिङ्गमायुषो वृद्ध्यै सर्वरोगविनाशकम् ॥५८॥
सितं रक्तं क्रमात्पीतं कृष्णं च स्फटिकं शुभम् ।
शक्राग्नि(ग्नी) चसमित्रो ये १ चतुर्धा तत्कचिन्मतम् ॥५६॥
निस्तरङ्गं गुणोपेतं तेजोवत्पाण्डुनिर्मलम् ।
शरदम्बुनिभं स्वच्छं स्निग्धं च स्फाटिकं हितम् ॥६०॥
चित्रं विन्द्वन्वितं रूक्षं स्फुटितं भिन्नवर्णकम् ।
सगर्भमूर्मिसंयुक्तं ज्योतिर्मुक्तघनं[२] त्यजेत् ॥६१॥
सव्रणं कीलकोपेत शूलाग्रं चक्रवर्जितम्[३] ।
स्थूलं दीर्घं कृशं ह्रस्वं मध्याद्यन्तेषु वा कृशम्[४] ॥६२॥
तुषाराकृतिविन्द्वाढ्यं कलिकाभिः[५] सुपूरितम् ।
अन्यजातिविलग्नं च विद्धं भीतिकरं त्यजेत ॥६३॥
सुपमं मानसंयुक्तं शास्त्रलक्षणलक्षितम् ।
स्फाटिकं लिङ्गमिष्टार्थं मृत्युजित्कामदं यजेत् ॥६४॥
सर्वलक्षणसंयुक्तं स्वल्पदोषं क्वचित्स्मृतम्[६] ।
लिङ्गं सदाग्निहोत्राभं पूज्यं नो दोषकृन्नृणाम् ॥६५॥

---

१ शक्राग्नीन्द्रसमित्राये, ङ. पा. । शक्राग्निचन्द्रसमित्रोत्थ, ख. पा. ।
२ मुक्तं पुनः, इति पाठान्तरम् । ३ चक्रवर्जितम्, मू. अ. क. पा. । वज्रवर्जितम्, घ. ङ. पा. । ४ चाकृशम्, मू. पा. । ५ कणिकाभिः ख. पा. । कर्णिकाभिः, ग. पा. । ६ क्वचिन्मतम्, ङ. पा. ।

चारुच्छत्रे भवेद्राज्यं मृदुलं[१] मूर्ध्नि[२] वै मनाक्
सदा निम्नेन सिद्धिः स्यादुच्चे तूच्चा समे समा ॥६६॥
तत्र[३] सर्वसमं श्रेष्ठं यवमध्यं वरप्रदम् ।
रत्नलिङ्गं द्विधाख्यातं स्वपीठं धातुपीठजम्[४] ॥६७॥
धातुजं तु स्वयोनिस्थं[५] सिद्धिमुक्तिप्रदायकम् ।
चललिङ्गं द्विधाकार्यं धातुरत्नमयं शुभम् ॥६८॥
हेमादिचललिङ्गं स्यादङ्गुलादित्रिपञ्चकम् ।
क्षुद्ररत्नोत्थमप्येवं स्वमाना[६] द्वररत्नजम् ॥६९॥
तिथ्यन्तमग्रजातीनां नृपाणां यावदिन्द्रकम् ।
वैश्यानां मन्मथान्तं स्याच्छूद्राणां द्वादशावधिः[७] ॥७०॥
यक्षादीनां क्वचिल्लिङ्गं विकारादेकविंशतिः ।
चलं तदूर्ध्वं देवाना त्रयोविंशातिकाङ्गुलम् ॥७ ॥
वेश्मस्थ पूजयेत्तत्संसूयन्ते स्थिराण्यतः ।
अचलं वृद्धमस्थाधि करादनवसामकम[८] ॥७२॥
अव्यक्तं नवहस्तान्तं व्यक्तं पञ्चगुणं तथा ।
षड्ढस्तं मिश्रकं लिङ्गं नोर्ध्वं च स्थिरमिष्यते ॥७३॥
नवहस्तं भवेच्छैलं त्रिहस्तं लोहजं क्वचित् ।
षड्ढस्तान्नाधिकं वार्क्षं पार्थिवं शैलवत्सदा ॥७४॥

---

१ मृत्युत्वं, ख.पा.। मृदुत्वः ग.पा. पृथुत्वं घ.पा. मृदुवद्धं, ङ.पा.
२ मूर्तिः, ग. पा. । ३ भद्र, मू. अ. क. ङ. पा । तत्र, ख. पा. । ४ सुपीठं धातुपीठकम्, मू. अ. पा. । ५ तत्स्वयोनिस्थं, ग. पा. । ६ प्रमाणा, ग. पा. । ७ खगगावपि, ख.पा. । शाङ्कगजावधिः, घ. पा
८ सीसकम्, मू. अ. क. ख. पा. ।

आहस्तान्नवहस्तं स्यादेतल्लिङ्गं तु मानुषम् ।
यक्षरक्षोऽसुरव्याल गन्धर्वाप्सरसां क्वचित् ॥७५॥
किन्नराणां च सिद्धानां हस्तात्पञ्चदशैव तु ।
परिणाहोच्छ्रयाभ्यां च देवानामेकविंशतिः ॥७६॥
ऐहिकं त्र्यङ्गुलं यावन्नोर्ध्वं गन्धभवादिकम् ।
पञ्चाङ्गुलंतु पैष्टयाद्यं फलजं स्वप्रमाणतः ॥७७॥
गान्ध सौभाग्यदं लिङ्गं पंष्ट भुक्तिप्रदायकम् ।
स्थण्डिले मण्डले पूज्य स्याद्दीक्षास्थापनादिके[1] ॥७८॥
एकाब्दा[2] न्यैहिकान्यत्र प्रोच्यन्ते सिद्धिमिच्छताम् ।
प्रभुमानप्रदं शाङ्गं[3] सैन्यच्छिन्नागदन्तजम् ॥७९॥
कूर्मकसिक[4] संजातं नृणां[5] पातालसिद्धिदम् ।
अणिमादिन्नकुल्योत्थमन्योन्यब्दार्धतः[6] सदा ॥८०॥
पैष्टान्यष्टप्रकाराणि सङ्ग्रीकृष्णक[7] जानि तु ।
शालिपिष्टोद्भवं पुष्ट्यै षाष्टिकं पुष्टिवर्धनम[8] ॥८१॥
गौधूमं वातरोगघ्नं यवजं बलसौख्यदम् ।
रिपुभेदकरं मौद्गं स्त्रीदं श्यामाकसम्भवम् ॥८२॥
तिलपिष्टं धरादायी नीवारं[9] भयनाशनम् ।
सुबक्कन्नावनीतं तु गोमयं रोगनाशनम् ॥८३॥

---

१ नान्हिके, ख. पा. । नान्तिके, घ. पा. । २ एकाङ्गा, मू. अ. पा. । ३ शाङ्गं, ख. पा. । ४ कूर्मकामीक, ग. पा. । ५ नूनं, घ. पा. । ६ न्यच्छर्धतः, मू. पा. । ७ सद्धि, कृष्टक; ख. पा. । संबद्धकृष्टक, ग. ङ. पा. । ८ वृद्धिवर्धनम; मू. पा. । ९ सैद्धार्थ, मू. अ. क. ग. पा. ।

आन्नमायुःप्रदं ज्ञेयं गौडं प्रीतिप्रवर्धनम् ।
नानाफलोद्भवं [१] लिङ्गं नानाकामप्रदायकम् ॥८४॥

गुणदं सैकतं भूरि स्यात्सौभाग्याय लावणम् ।
उच्चाटने तु पांशव्यं मौलं [२] शत्रुक्षयावहम् ॥८५॥

वंशाङ्कुरसमुद्भूतं वंशवृद्धिकरं भवेत् ।
पुरक्षोभकरं पौरं [३] रामठं चौग्र्यकारकम् ॥८६॥

शत्रुमृत्युप्रदं सार्जं सैक्थ [४] माकर्षणे मतम् ।
मृद्बिम्बोद्भवमिष्टार्थं लेपात्स्युः सर्वसंपदः ॥८७॥

गन्धादिबिम्बजान्तानि न स्थिराणि चलानि नो ।
तावत्कालं तु [५] संपूज्य विसृज्य तानि [६] के क्षिपेत् ॥८८॥

पिष्टां गोशर्करां सूक्ष्मां [७] पक्वचिञ्चास्थियोजिताम् ।
निष्काथ्य [८] पटमालिप्य संशोष्य [९] परिमार्ज्य च ॥८९॥

खटिकालक्तकाकुष्ठनीलीदरदकज्जलैः ।
धातुविल्वरसैर्लेख्यं त्रिधा लिङ्गं पटादिके ॥९०॥

मधुरा [१०] चित्रलेखा च कार्या वै समसन्धिका ।
बलसंवर्तनीच्छाया दृष्टि [११] भावाश्रिता सदा ॥९१॥

---

१ लोहभवं; ख. पा. । २ मार्षं; ङ. पा. । ३ घोरं; मू. अ. क. ख. ग. पा. । ४ सित्थं; खं. पा. । सन्ध्यं; ग. पा. । ५ तारकोऽनन्त; ग. पा. । ६ विसर्ज्यैतानि; ख. पा. । ७ शुक्लां; घ. पा. । ८ निष्काठ्य; मू. पा. । निष्कास्य; घ. पा. । निष्काम; ङ. पा. । ९ संशोध्य, ग. पा. । १० मयूरा, ख. पा । ११ सृष्टि; क. ग. ङ. पा. ।

शृङ्गारवीरबीभत्सरौद्रहास्यभयानकाः ।
करुणाद्भुतशान्ताश्च नवभावात्मिकाः क्वचित् ॥६२॥

पटजा चित्रजा रक्ता [1] सम्यङ्मन्त्रविधानतः ।
स्वेच्छया पूजयेदेतन्मृन्मयान्युच्यते [2] ऽधुना ॥६३॥

अपक्कं पक्कजं [3] कार्यं मुख्यामुख्यव्यवस्थया ।
सद्योमन्त्रेण चापक्कं [4] कुमान्नवकरादिकम् ॥६४॥

पक्कं [5] त्रिहस्तकं कुर्यात् घोरमन्त्रान्वितं [6] वरम् ।
द्विजादिजातिभिर्मृद्भिरव्यक्तादि च कामतः ॥६५॥

पद्मिनीषु नदीतीरे वृक्षमूले च मृत्तिकाः ।
वापीकूपतडागेषु दीर्घिकायाः समाहरेत् ॥६६॥

सुमर्दितमृदा कार्यं पक्कं मृत्संभवं सदा ।
पुष्ट्यै त्रिलोहगर्भं च धनकोषविवृद्धये ॥६७॥

शुच्युपलांश्च [7] संगृह्य सद्योजातेन मन्त्रवित् ।
वामाख्येन चितां कृत्वा [8] घोरेण परिदाह्य च ॥६८॥

लिङ्गं शिवाग्निनामृज्य [9] पुरुषेणावलोक्य च ।
ईशानेन गृहीत्वा तु ततः संस्कृत्य पूजयेत् ॥६९॥

---

१ तज्ञा; क. ग. ग्र. ङ. पा. । २ ह्युच्यते, मू. अ. पा. । मयो ह्युच्यते; ख. पा. । ३ अपङ्कं पङ्कजं; क. ङ. पा. । ४ चापङ्कं; ङ. पा. ५ पङ्कं; ङ. पा. । पक्षं; ख. पा. । ६ चितं; ख. पा. । ७ शुच्युत्पलां; मू. पा. । भुव्युत्पलां; ख. पा. ८ धृत्वा; ङ. पा. । ९ मृद्य; मू. अ. पा.

पञ्चत्वङ्निम्ब १ पानीयं बिल्वमज्जा २ फलत्रयम् ।
सर्जहिङ्गुपुरंबोल ३ मतसीतैलमेव च ॥१००॥
सन ४ श्रीवालगोधूमयवमाषातसीरजः ।
मृदि क्षिप्त्वा व्यवस्थाप्य मासं तां परिमृद्य च ॥ ०१॥
अस्थिबन्धं ५ दृढं चादौ दृढलोहेन दारुणा ।
शणतन्त्वन्त्रितं ६ कृत्वा मृन्मयं घटयेत्कुम्भम् ॥१०२॥
क्षिप्त्वा धात्वौषधीरत्नलोहव्रीहीन् यथाक्रमम् ।
इत्येतेषामभावे तु रसेन्द्रं वज्रसंयुतम् ॥१०३॥
सुपुष्टैः ७ कर्करैः क्षीरदधिबालगुडान्वितैः
गव्यसर्जयुतैश्चैव स्थाप्यं वणक्पुष्टये ॥१०४॥
घनानु ८ काननं गच्छेद्दारूपलगृहीतये ।
सद्वारर्क्षर्तुयुक्ते ह्नि चारुलग्नसमन्विते ॥१०५॥
तदा गमनकाले तु शकुना ९ न्यथ लक्षयेत् ।
दिव्यान्तरिक्षभौमानि शुभाशुभफलाप्तये ॥१०६॥
सुप्रसन्नमरुत्संसादित्याम्भक्षणप्रभम् ।
इत्यादि शुभकृद्दिव्यमतोऽशुभकरं त्विदम् ॥१०७॥
उल्कापातोऽशनिस्तारापतनं केतुसम्भवः ।
दिग्दाहस्तीव्रवातश्च चन्द्रसूर्योपमर्दनम् १० ॥१०८॥

---

१ त्वग्नींश्च, मू. पा. । २ सर्जः मू. अ. पा. । ३ पुरः-गुग्गुलुः । पुरो गुग्गुलुराख्यातो इति धरणिः । बोलः-गन्धरसः, बोलगन्धरसप्राणः; इत्यमरः । ४ सनः=घण्टापारुलिवृक्षे । हल्किर्णेति बृहद्वाचस्पत्यम । ५ अस्थिरत्व; मू. अ. क. ख. घ पा. । ६ तत्सूत्रितं; क. पा. । ७ अगुष्टैः; ङ. पा. । ८ वनान्ध; क. पा. । ९ कुशला; ख. पा. । १० पसर्जनम्; मू. अ. ख. पा. ।

अकस्माद्गगने शब्दः प्रच्युतिः फलपुष्पयोः ।
वासवृक्षाग्रसंस्थायि [1] बलिभुङ्मधुरारुतिः ॥१०९॥

पक्षिमण्डलिका तद्वदान्तरिक्षमिदं शभम् ।
पांश्वसृग्वर्षणं घोरमान्तरिक्षमशोभनम् ॥११०॥

पार्थिवान्यधुना वक्ष्ये निमित्तानि शुभानि तु ।
दध्यक्षतयवा [2] दूर्वा दीपो गोरोचना ध्वजः ॥१११॥

शङ्खश्छत्रं फलं पुष्पं हेमधान्याब्जसारसाः ।
गोवृषश्च खरो वाजी भस्माक्षो भूपतिर्द्विपः ॥११२॥

पण्यस्त्रीमत्स्यमांसादि दर्शनादेव शोभनम् ।
शिवः शिवोदकुंभस्थः कौशिको वामतः शुभः ॥११३॥

सव्यत [3] स्त्वशुभं विद्धि रिक्तकुंभादिदर्शनम् ।
मुक्तकेशः पराक्षेपः क्षारोऽङ्गारश्च दारु च ॥११४॥

स्नेहाभ्यक्तो नरः सर्पः क्षपणः[4] शाक्यदण्डिनौ[5]
छिन्नाङ्गोऽलोचनो रोगी कपाली भूप्रकम्पनः ॥११५॥

तुषगोमयकर्पासतैलतक्रतृणानि च
क्षुत्क्षामोन्मत्तकौ तन्तुश्चौपधी पञ्चकः[6] ॥११६॥
शुभैर्गमनमिच्छन्ति त्वशुभैश्च निवर्तनम्
पक्षार्धार्धं तु संत्यज्य प्रस्थानं क्रियते शुभे ॥११७॥

---

१ श्रमस्थायि, ङ. पा. । २ दध्युद्धृतघरा; मू. अ. । परा; ख. पा. । ३ सव्यतः = दक्षिणतः 'सव्यं तु दक्षिणे' इति हैमः । 'सव्यं वामे च दक्षिणे' इत्यजयः । सवतः मू. अ. घ.पा. । ४ पक्षणः, ग. पा. ।५ कृपणः शाठ्यदम्भिनौ .ग. पा. ।६ पञ्चमः ग. पा. ।

कृत्तिकादिभरण्यन्तं प्राच्यादौ सप्तसप्तकम्
वेदस्रे स्याद्विने १ याता त्वग्निदण्डानतिक्रमात् ॥११८॥

शङ्खभेरीरवैस्तूर्यैर्माङ्गल्यैर्वैदिकैः स्वनैः ।
इष्टादौ २ शङ्करं शस्तं प्रागीशेन्दुवनं ३ व्रजेत् ॥११९॥

माघादिमासषट्के च न रिक्तायां तिथौ सिते ।
बुधार्केन्दुसिते जीवे वार्क्षे प्रागुत्तरस्थिते४ ॥१२०॥

योगेषु शुभसंज्ञेषु करणे विष्टिवर्जिते ।
एकान्तरासु ५ तारासु शेषे चानिष्टकर्मणि ॥१२१॥

मेरुश्च मन्दरः श्वेतो हिमाख्यो हेमकूटकः ।
निषधो नीलगन्धाख्यः शङ्खीकेतुर्नगाधिपाः ॥१२२॥

महेन्द्रः पारियात्रश्च हरिश्चन्द्रोऽथ शुक्तिमान् ।
नन्दाख्यो मलयो विन्ध्य उज्जयन्तो६ऽथ ऋक्षकः७ ॥१२३॥

श्रीशैलाख्यस्तथा सह्यो विख्याताः कुलभूधराः ।
योजनानि दशैतेषां गिरीणां निकटे वनम ॥१२४॥

तत्प्रसूत ८ नदीतीरे भवेदुपवनं सदा ।
एतत्क्षेत्रोत्थिता ये तु पाषाणास्तरवः शुभाः ॥१२५॥

स्वयमेव व्रजेत्कर्ता तद्धितोऽन्योऽपि वा जनः ।
साचार्यः साधकः शिल्पिजनैः परिवृतः शुभैः ॥१२६॥

---

१ युगास्रौ स्याद्धितैः, घ. पा. । २ इन्द्रादौ, ख. पा. । ३ शैन्द्रवनं; मू. अ. क. पा. । ४ स्थिरे; घ. पा. । ५ एकाकरासु; क. पा । ६ उर्जयन्त; क. पा । ७ ऋष्यकः; क. ग. पा. । ८ तत्वमूल; ग पा ।

चरुं भुक्त्वा दधिप्राश्य नत्वा पूर्णघटं तथा।
ध्यात्वाधः प्राकृतं तत्त्वं शिवतत्त्वमयीं महीम् ॥१२७॥

विद्याराज्ञीं ततो ध्यायेदग्रतोऽर्घकरां स्थिताम् ।
दिशो विरेच्य चास्त्रेण विघ्ननाशाय दैशिकः ॥१२८॥

सम्यग्विहितसम्भारो ध्यायमानस्त्रिलोचनम् ।
मन्त्ररक्षाविधिं कृत्वा संजप१ न्निष्टदेवताम् ॥१२९॥

इतिलक्षणसमुच्चये लिङ्गद्रव्यनिर्णयवनप्रवेशो नाम २ प्रथमो विधिः

---

१ संयजन्; ख. पा.।

अथ द्वितीयः

कर्तुश्च देशिकस्यापि शिल्पिनां मूर्तिधारिणाम् ।
स्वरूपं कथ्यते सम्यगिष्टानिष्टं च कर्मणि ॥१॥

ऋजुराढ्यः सुभक्तश्च शान्तात्माद्दृष्टभीरुकः ।
धीरः शास्त्रार्थकारी च कर्ता यः सात्त्विको वरः ॥२॥

दीनः [1] शठः कुधर्मश्च व्यसनी राजसो मतः ।
नास्तिकस्तार्किकः क्रूरः कर्ता यस्तामसोऽधमः ॥३॥

ईशसंचोदिताबुद्धिः शिवसंस्थापने भवेत् ।
तस्मात्ते गुरवोऽन्वेष्या ये तच्छास्त्रेषु भाषिताः[2] ॥४॥

औज्जन्या माध्यदेशाश्च कौरूषकाश्च [3] लाटजाः ।
अन्तर्वेदीप्रतिष्ठानश्रावस्त्या [4] गुरवो वराः ॥५॥

राढा वारेन्द्रकास्तैरा गौर्जरा मागधास्तथा ।
आङ्गा जाटो[5]द्भवाश्चेति सप्तैते मध्यमाः स्मृताः ॥६॥

---

१ पीनः, क. पा. । घन, ख. पा. । २प्रेषिताः, ग. पा. । ३ कौरुक्षेत्राश्च, घ. पा. । ४ चारप्त्या, मू. अ. पा. । चारक्ष्या, ग. पा. । चावन्त्या, क. पा. । ५ आर्यजातो, ख. पा. ।

आन्ध्राः कालिङ्गकार्णाटा माहाराष्ट्राश्च ढक्कजाः ।
चीरजा द्राविडापौण्ड्रास्त्वष्टैते[१] गुरवोऽधमाः ॥७॥

कामरूपाश्च चम्पाका[२] नेपालोत्थाश्च सैन्धवाः ।
वाङ्गगान्धारपौलिङ्गा एते सप्तान्त्यजा मताः ॥८॥

काञ्चिकाः[३] कौसलाः काञ्चाः कावेराःकौङ्कणोद्भजाः ।
सौराष्ट्रा दवराष्ट्राश्च अष्टैते[४] निन्दिता भृशम् ॥९॥

अशेषकामदाः श्रेष्ठा मध्यमा भूतिदायिनः ।
अधमाद्याः शुभे नेष्टा आर्यावर्ते हि[५] दोषदाः ॥१०॥

सिन्धोश्च करतोयाया हिमवद्विन्ध्ययोरपि ।
यो देशो मध्यभागः स्यादार्यावर्तः स कीर्तितः ॥११॥

चतुष्पदास्त्रिबोधाश्च षट्पदाध्वविभूषिताः ।
गोत्रगोचरसंयुक्ताः समयाद्युक्तलक्षणाः ॥१२॥

चत्वारो गोत्राः- गायत्री, सावित्री, सरस्वती, मनोन्मनीति ।
चत्वारो गोचराः-शिवः; शिखः; विमलज्योतिः; सावित्र श्चेति[६] ।

ऋचीकात्रेयदौर्वासगौतमा इति अन्तरे[७] ।
दीक्षागुणेनसंपूर्णा[८] ये आनन्त्यथ संहिताम् ॥१३॥

---

१ त्वष्टौ ते; घ. पा. २ चाम्पाका; क. पा. । लंपाका; ख. पा. । पन्याका; ग. पा. । ३ काथिकाः; ग. पा. । कारका; घ. पा. । ४ अष्टौ ते; क. ख. ग. घ. पा. । ५ न; ख. पा. । ६ सावित्राश्चेति चत्वारो गोचराः; इति लिखितपुस्तकेषु पाठः । ७ चत्वारः; ख. पा. ८ दीक्षास्थापनसंयुक्ताः; मू. अ. क. ङ. पा. ।

आचार्यास्ते तु विज्ञेया अन्यथा लोकदाम्भिकाः ।
आर्यावर्तोद्भवाः शैवाः सर्वलक्षणलक्षिताः ॥१४॥
विनीता भक्तियुक्ताश्च लिङ्गज्ञाः शास्त्रवेदकाः ।
पीठधामादिकुण्डज्ञाः प्रतिष्ठास्थानवेदकाः ॥१५॥
वारतारादिकालज्ञा अधिदैवप्रवेदकाः ।
लोभमोहपरित्यक्ताः शान्ता दान्ता विमत्सराः ॥१६॥
नियमव्रतसंपन्ना दयादाक्षिण्यसंयुताः ।
सात्विका निपुणा दक्षाः पञ्चश्रौतार्थ[1]वेदकाः ॥१७॥
तत्त्वस्थाश्छिन्नसंदेहाः समयाचारपालकाः ।
दृढव्रताजनद्रोहिसत्यवाग्भूतवत्सलाः[2] ॥१८॥
आज्ञाभिषेकसंपन्नाः षट्सु कर्मसु तत्पराः ।
दीक्षिताः शिवशास्त्रेस्मिंश्चत्वारो ब्राह्मणादयः ॥१९॥
सर्वानुग्रहकृत्यर्थमाचार्यत्वेन सम्मताः ।
योजितः शिवतत्त्वे यः शिवरूपमवाप्तवान ॥२०॥
जातिनाशो भवेत्तस्य शिवधर्मोपजीविनः ।
भूदार्वयो श्मरत्नानां जातिसंपादनं यथा
शूद्रादीनां तथा मन्त्रैर्युक्तानां श्रेष्टता[3] भवेत् ॥२१॥
ताम्रादि स्याद्यथा हेम सिद्धं पारदयोगतः ।
तथैव मन्त्रसंयोगाच्चातुर्वर्णः शिवी भवेत् ॥२२॥

---

१ तत्त्वार्थ, क. पा. । २ वाग्व्रतचालनाः, ग. पा. । ३ हीनानां श्रेष्ठतो, मु. अ. ग. ङ. पा ।

नगरीनिर्झराद्यम्भो गङ्गां प्राप्यैकतां यथा ।
दीक्षायोगात्तथेशस्य शूद्रादिः शिवतां व्रजेत् ॥२३॥

दीक्षातो मुच्यते देही तिष्ठन्मुक्तोऽपि विग्रहे[1] ।
यथा कुलालचक्रस्थो विच्छिन्नं भ्रमते घटः ॥२४॥

स्वकर्मबन्धनैर्बद्धः[2] पशुरात्मा मलाश्रितः[3] ।
मलं विषमदं यद्वद्धन्ति वै मन्त्रतेजसा ॥२५॥

पङ्कैः कलुषितं तोयं घटस्थं निर्मलं यथा[4] ।
स्यात्कतकफलैर्योगात्तद्वन्मन्त्रैस्तु मानवः ॥२६॥

कर्षकः कर्षयेद्[5] यद्वद् भ्रामको भ्रामयेद्यथा[6] ।
तथैव मन्त्रसामर्थ्यान्मलं हत्वा शिवी भवेत् ॥२७॥

यथार्ककरसंयोगाद्वन्हिरुत्पद्यते मणेः ।
तथेशमन्त्रसंसर्गा[7]च्छिवत्वं जायते पशोः ॥२८॥

शिवशक्त्यात्मका मन्त्राः शिवशक्तिभिरन्विताः ।
शैवाचार्याः प्रयच्छन्ति शिवत्वं स चराचरे ॥२९॥

यथा मृद्रत्नलोहानि[8] मन्त्रैर्गच्छन्ति देवताम् ।
आचार्योऽपि[9] तथैवात्र शिवत्वं याति मन्त्रवित् ॥३०॥

---

१ पवित्रता; ग. पा. । २ वश्यं, ग. पा. । ३ पशुरात्मा मनोयुतः; मू. अ. पा. । प्रभुरात्मा मनोयुत; क. ग. पा. । ४ यद्वद्घटस्थनिर्मलम्, ख. पा. । ५ कट्टकः कट्टयेद्, घ. पा. । ६ भ्रामयेद्भ्रामको यथा, ख. पा. । ७ संयोगा, मू. अ. क. ग. पा. । ८ लोहैश्च, घ. पा. । ९ मन्त्र तन्त्र, ख. पा. ।

मन्त्रतत्त्वे स्थिता देवा मन्त्रः साक्षान्महेश्वरः ।
संस्क्रियन्ते हि मन्त्रैश्च देवाचार्यतपस्विनः ॥३१॥

दार्वश्मलोहमृद्रत्नजातं लिङ्गं प्रतिष्ठितम्
यथापूज्यम[1]वेदज्ञस्तथा शूद्रोऽपि देशिकः ॥३२॥

मृदादिद्रव्यजातीनां[2] शिवत्वं यः प्रयच्छति[3] ।
स शिवः स्वयमेव स्यान्नान्यरूपः कदाचन ॥३३॥

सर्पदष्टा यथा सुप्ताश्चाण्डालान्ता द्विजादयः ।
मन्त्रयोगाद्विबुध्यन्ते नष्टानिष्टं तथा शिवे ॥३४॥

कर्णधारो यथा पारं द्विजादीन्नयति [4] क्षणात् ।
शैवाचार्यः [5] परं स्थानं तद्वत्ता [6] न्मन्त्रनौकया ॥३५॥

([7] कर्णधारो यथापारं नौकया याति तत्क्षणात ।
तथाचार्यः परं स्थानं याति वै मन्त्रनौकया ॥३६॥)

चतुर्दिव्याब्दसाहस्रैः कृत [8] सन्धिः शतं यथा ।
शेषे त्वेकैकहानिः स्यात्सहस्रे च शतक्रमात् [9] ॥३७॥

चतुर्युगसहस्रान्ते दिनमेकं प्रजापतेः ।
पितामहशतं यावद्विष्णोर्मानं विधीयते ॥३८॥

---

१ पूजम, घ. पा. । २ जातानां, मू. अ. क. ग. ङ. पा. । ३ प्रदीपयेत्, घ. पा. । ४ नौकया याति तत्, क. ख. ग. पा. । ५ शैवाचार्याः, मू. अ. क. पा. । ६ तत्त्वतो, ख. पा. । ७ कोष्ठान्तर्गतोऽयं पाठः घ. संज्ञकताडपत्रपुस्तके वर्तते, अन्येषु पुस्तकेषु नास्ति । ८ कृते, मू. अ. क. पा. । ९ दशते क्रमात्, मू. अ. क. पा.

रुद्रस्य[1] निमिषार्धेन सहस्राणि चतुर्दश ।
विनश्यन्ति तथोपेन्द्रा असंख्याताः पितामहाः ॥३९॥
ईशस्य वासरैवेन लीयन्ते बहवो हराः
सादाख्यनिमिषेणेशो लयं याति न संशयः ॥४०॥
स्वेच्छया परत्रुटया[2] तु सादाख्यस्तत्र लीयते ।
शिवात्परतरं नास्ति इति शास्त्रेषु निश्चयः ॥४१॥
एवं मानविशेषैस्तु मन्त्रवीर्यं तु तादृशम्
तस्माच्छिवदितो मन्त्रः सिद्धिमुक्तिफलप्रदः ॥४२॥
वागीशी जननी यस्य व्योमव्यापी पिता शिवः ।
मन्त्रैः शिवाध्वरे[3] जातः स शूद्रः स्यात्कथं पुनः ॥४३॥
मृन्मयानां घटादीनां संस्काराऩ्नमृदा यथा[4] ।
तथैव पापहानं च प्राकृतास्तु प्रजायते[5] ॥४४॥
हत्वा दीक्षाभिषेकादींश्चण्डेन पातितास्तु ते ।
लक्ष्या[6] विप्रादिकाचारान्नारकीणो न तारकाः[7] ॥४५॥

---

१ चन्द्रस्य, ग. पा. । २ परक्रुध्या, क. ग.पा. । ३ शिवपुरे, क.पा. । शिवापुरे, ख. ग. प. ।

४ अस्य समनन्तरः पाठोऽयं क. पुस्तके प्रक्षिप्तो यथाः–
ये विप्रादिकमद्वारमभिषिक्ताश्चरन्ति ते ।
वेदेन हत्वा दीक्षान्या पतिता रौरवे स्फुटम् ।
तथैव दीक्षामन्त्राणां तत्प्रकृत्या समागताः । इति

५ प्राकृतं तु न जायते, क. पा. । न प्रकृत्यास्तु जातः ख.पा. । ६ लोके, मू. अ.क.ख.पा. । ७ कारकाः, ख. पा. ।

नराणां शिवसंस्काराच्छिवत्वं न भवेद्यदि ।
न भवेयुस्तदा नूनं द्विजा देवादिदैशिकाः ॥४६॥

तस्मान्मन्त्रप्रधानत्वं निग्रहानुग्रहं प्रति ।
विषभूतग्रहाद्याश्च निगृह्यन्ते हि मन्त्रतः ॥४७॥

मन्त्रसंस्कारदीक्षाभिः संस्कृतं गुरुणा यदा ।
चराचरं प्रपद्येत शिवत्वं तत्क्षणाद्ध्रुवम् ॥४८॥

चातुर्वर्ण्यमनुग्राह्यं चातुर्वर्ण्यान्नभोजनम् ।
एतत्सिद्धं सदा शैवं गुरुरूपमजन्मकम्[1] ॥४९॥

कौपीनमेखलायुक्ता जटायज्ञोपवीतिनः ।
शिवान्तनामकाः सर्वे भस्माङ्गा[2] ब्रह्मचारिणः ॥५०॥

दीक्षया हन्यते दीक्षा पूर्वदीक्षा हि नश्यति ।
विशेषयातु सामान्या गुरुरप्येवमेव तु ॥५१॥

नगनान्तास्तु[3] वैशेषाः शैवाः शिवान्तसंज्ञकाः ।
अम्भोजं पङ्कजं यद्वत्तद्वच्छैवा न चेतरे ॥५२॥

हस्तोऽस्यास्तीति हस्ती स्याद्रूढितो नेतरो[4] यथा ।
तथैव शिवलिङ्गानां शैवाः पाशुपतादयः ॥५३॥

तपस्व्याचार्यदेवान् यः[5] पूर्वरूपेण मन्यते ।
लिङ्गभेदफलैर्युक्तो यात्यसौ रौरवं ध्रुवम् ॥५४॥

---

१ गुरुरूपमयात्मकम्, ख. पा. । २ भस्माक्षा, मू. अ. ख. घ. ङ. पा. । ३ नगणान्तास्तु, मू. अ. क. ग. पा. । नराणां, ख. पा. ४ नेतरे । मू. अ. क. ख. पा. । ५ देवानां मू. अ. पा.

दृष्टादृष्टविरोधेन नेतरेषां तथा विधिः।
अन्यथा पापकारी स्यादित्याज्ञा पारमेश्वरी ॥५५॥

गुरून्निरूपयेत्तस्माद् द्विविधं शैवमुत्तमम्
ब्रह्मचारीगृहस्थत्वभेदभिन्नं द्विधा स्थितम् ॥५६॥

अकामिकामिभेदेन वक्ष्यमाणगुणान्वितम् ।
काम्यकामिक्रियां वच्मि साम्प्रतं संप्रभेदतः ॥५७॥

तपस्व्य[1]कामिनामेव प्रतिष्ठादिक्रियोच्यते ।
भुक्तिमुक्तीच्छुकः कामी कुर्याद्दीक्षादिमाज्ञया ॥५८॥

गृहस्थस्तु द्विधा प्रोक्तः सान्तानिको व्रतार्पकः ।
प्रतिष्ठादिक्रियाशेषा तत्कृता संप्रशस्यते ॥५९॥

योषिद्युक्तः सकेशश्च जटादिपरिवर्जितः।
शिवाधिकारवृत्तिर्यः स सान्तानिक उच्यते ॥६०॥

व्रती व्रतासमर्थो यो विधिना व्रतमर्पयेत्।
पश्चात्कुर्याद्विवाहं च गृहस्थः स व्रतार्पकः ॥६१॥

ब्रह्मचर्यं चरेन्नित्यं जटाभस्मसमन्वितः।
भैक्ष्याशी संयतात्मा च व्रती स परिकीर्तितः ॥६२॥

गोत्रगोवरस तानसङ्केतैः[2] क्रमशो गुरुः ।
पुष्पपाताभिधानं तु मठी[3] मुद्राभिरिष्यते ॥६३॥

---

१ तपस्याः ग. पा. तपस्य, घ. पा. । २ सङ्गतैः, च. पा. सङ्कीर्तैः, ख. पा.। ३ मश्री, मू. ग. पा. । सत्री, क. पा ।

स्त्रीस्रग्गन्धार्थशय्यासिग्रानताम्बूलभूषणम् ।
सद्वस्त्रमञ्जनं तैलं नयते रमते ह तम् [१] ॥६४॥

भुक्त्यै [२] सान्तानिकं नित्यं भुक्तिमुक्त्योर्वनादकम् [३] ।
मोक्षाय व्रतिनं चैव वरयेन्मतिमान्नरः ॥६५॥

पुत्रौ द्वौ तु गृहस्थस्य पारलौकिकलौकिकौ ।
लौकिको द्रव्यभागी स्याद्विद्याभाक् पारलौकिकः ॥६६॥

व्रतिशिष्यस्य यच्छास्त्रमृणं चार्थं च तद्गुरोः ।
भ्रातॄणां गुर्वभावे स्याद्गृहस्थानां स्वपुत्रकम् [४] ॥६७॥

यति [५] पुत्रः प्रपौत्रो वा तत्सन्तानोद्भवास्तथा ।
अयोग्याः शिवकार्येषु घण्टासम्बन्धिनो हरेत् [६] ॥६८॥
व्रतिनः शिष्यपुत्रः स्याद्योग्यः सर्वेषु कर्मसु ।
ऋणे द्रव्ये च पिण्डे च स एवैकः प्रशस्यते ॥६९॥
शिष्याम्नायेन सम्भूत आचार्यः शुभशान्तिकृत् ।
चतुर्गोचरमध्ये च शैवो ज्येष्ठायते [७] परम् ७०॥
सर्वानुग्रहकृद्यस्मादाद्यः सर्वगतः शिवः ।
शैवाचार्यस्ततः श्रेष्ठः स्थापयेत्सर्वदेवताः [८] ॥७१॥

---

१ रमतेर्हितः, मू. अ. क. पा. । रमतोर्ध्वतः, ख. पा. । रयतेर्हितम्, घ. पा. । २ भुक्तं, मू. अ. पा. । भुञ्जे, ग. पा. । ३ भुक्तिमुक्तिव्रतार्पितम्, मू. अ. ग. पा. । भुक्तिमुक्तिप्रदार्पितम्, क.पा. । ४ स्वपुत्रगम, मू.अ.क.पा. सुपुत्रकः, ख.पा. । ५ यदि, मू. अ. क. ख. पा. । ६ घण्टामयुक्तिलोहवत् . ग पा. । ७ ज्येष्ठोयतेः, मू.अ.क.ग.पा. । ८ सह देवता, इति पाठान्तरम् ।

दक्षिणार्होत्तमं पात्रं दर्शनानां[1] शिवः प्रभुः ।
भुक्तिमुक्तिप्रदाता च नान्यो वै विश्वकृद्गुरुः ॥७२॥
सर्वेषामेव देवानां शैवः स्थापक इष्यते ।
तदभावे[2] तु कर्तव्याः स्वदेवव्रतचारिणः[3] ॥७३॥
जन्मना जायते शूद्रः क्रियया द्विज उच्यते ।
श्रुतेन श्रोत्रियश्चैव ब्राम्हणो ब्रम्हचर्यतः ॥७४॥
स्वमन्त्रसंस्कृतो विप्रः स्वकर्मव्रतपालकः ।
मनुष्यजातिसामान्ये को विद्वेषः शिवद्विजे ॥७५॥
स्त्रीपुंनपुंसकानां च यथाभेदास्त्रिलिङ्गतः ।
न तथा ब्राम्हणादीनां तस्माज्जातिर्नकारणम्[4] ॥७६॥
पञ्च[5] तत्त्वविशुद्ध्यर्थं पञ्च[6] ब्रह्मविनिर्मितम् ।
उपवीतं सदा धार्यं शैवाचार्यैर्न चेतरैः ॥७७॥
शिवो विप्रः शिखा[7]राजा ज्योतिर्विच्छूद्रजातिकः ।
सावित्र इत्यमी वर्णा प्रोक्ता नाना शिवागमे ॥७८॥
गुरुः शिवः शिखादीनां[8] त्रयाणां शिखसंज्ञकः ।
द्वयोः स्याज्ज्योतिरित्युक्तः सावित्रस्तु स्वगोचरः ॥७९॥
काहलातूर्यढक्काश्रीघण्टिकाशङ्खसुस्वनैः[9] ।
ध्वजैश्छत्रैर्युताः सर्वे शैवाचार्या नृपा इव ॥८०॥

---

१. त्तमः पात्रमर्हतानां, ग.पा. । २ यददावे, घ. पा. । ३ व्रतधारिणः, ख. पा. । ४ प्रकारणम्, ग. पा. । ५ यश्च, ख. पा. । ६ यश्च, ख. पा. । ७ शिवो, ग. पा. । ८ शिवादीनां, ख. पा. । ९ सुस्वरैः, मू. अ. क. ख. ग. ङ. पा. ।

गुरुः श्रेष्ठः प्रतिष्ठेत यत्र राष्ट्रे च तत्र च [१]।
स्याद्वृद्धिर्विजयः शान्तिरारोग्यं धर्मवर्धनम् ॥८१॥

एभिश्च स्थापिते देवे कर्ता जन धनान्वितः।
आयुषा यशसा लक्ष्म्या [३] पुत्रपौत्रैर्विवर्धते [४] ॥८२॥

पितरस्तस्य नन्दन्ति यावत्तिष्ठन्ति देवताः।
तावद्य गसहस्राणि रुद्रलोके महीयने ॥८३॥

स्थानस्य देवतायाश्च चिरवृद्धिः प्र [५] जायते ।
नाकाले म्रियते कर्ता परतः शिवतां व्रजेत् ॥८४॥

यावत्तत्कीर्तिविख्यातिस्तावत्तस्य महाफलम् ।
पदं संप्राप्य रुद्रस्य सुखमक्षयमश्नुते ॥८५॥

अथाधमादिदेशोत्था ये चान्यत्रातिनिन्दिताः [६]। [क]
तांस्तु सर्वान् प्रयुञ्जीत क्रूरकर्मसु सर्वदा ॥८६॥

हीनव्यङ्गाधिकाङ्गाश्च कुब्जवामनखञ्जकाः।
विकृताः शवला [७] रौद्राः शठाः क्रूराः [८] कुवृत्तिकाः ॥८७॥

पापिव्याधितकिञ्चिज्ज्ञा देवच्छायोपजीविनः।
धाक षडा बधिर : स्थूलाः कुनखाश्च कुमूर्धजाः ॥८८॥

---

१ राष्ट्रेऽद्भुत च, क. पा. । २ स्थापितैर्देवैस्तत्कर्ता च, घ. पा.। ३ लक्ष्मी, घ. पा. । ४ प्रवर्धते, घ. पा. । ५ वृद्धिश्च, घ. पा. । ६ न्यत्र विनिन्दिताः, मू. अ. क. ख. ग. ङ. पा. । (क) "तावद्युगसहस्राणि रुद्रलोके महीयते" पाठोऽयं घ. पुस्तकेऽधिकः, अप्रा..ङ्गिकश्च । ७ सचरा, ख. पा. । ८ सेघा, मू. पा. ।

सूचकास्तार्किका वैद्याः सेवकाः कर्षकास्तथा ।
पुरोधाः पण्यजीवी[1] च वणिजो धातुवादिनः ।।८९।।
लिङ्गधारी[2] कुशीलाश्च[3] द्यूतकारकलम्पटाः ।
वक्रनासाङ्गलम्बोष्ठा मूर्खाः स्पन्दनगात्रकाः ।।९०।।
कुसङ्गाकुलजा बालाः काकस्वरानुनासिकाः ।
ग्रन्थविप्लाका[4] वृद्धा व्यसनी समयच्युतः ।।९१।।
दन्तुराः श्लीपदाः स्तब्धा अर्बुदी[5] गलगण्डकाः ।
एतैस्तु स्थापिता देवा धनायुः पुत्रनाशकाः ।।९२।।
अन्याश्रमिमगामोत्थाः[6] पुनर्भूः कुण्डगोलकाः ।
कत्थकाः[7] कौशिका[8] स्तज्जास्त्रिकर्णाद्याश्च वर्जिताः ।।९३।।
चार्वाकाश्चार्हता बौद्धाः साङ्ख्यदर्शनिनो द्विजाः ।
सन्यासव्रतिनश्चान्ये स्थापने नाधिकारिणः ।।९४।।
शाकद्वीपात्पुरानीता मगा गोमांसभक्षकाः ।
निर्माल्यभक्ष्यणार्थं तु शाम्बेनाच्युतसूनुना ।।९५।।
शैवीं दीक्षां विना यस्तु शास्त्रमात्रप्रपाठकः ।
शिवादीन् स्थापयेन्नित्यं स्वयम्भूः स नराधमः ।।९६।।
प्राप्त (क) नं लिङ्गमुत्सृज्य यः शैवं व्रतमाचरेत्[10] ।
स पुनर्भूः परिज्ञेयो वर्जनीयः शिवागमे ।।९७।।
स्वधवे विद्यमाने तु जायते जारतो हि यः ।
कुण्डः क्रूरस्वभावःस्यान्मृते पत्यौ तु गोलकः ।।९८।।

---

१ श्वान्यजीवी, घ.पा. । २ चारी, घ.पा. । ३ कुशीलात्मा, घ.पा. । ४ विप्रोचका, ख. पा. । ५ अर्भदी, क. ग. पा. । ६ मगान्मोत्थ, ख. घ. पा । ७ कण्ठका, ख. ग. घ. पाः । ८ कौलिका. क. ग. पा. । ९ खादकाः, ख.पा. । १० तु तमाश्रयेत, मू.अ.क.पा. ।

आचार्यधर्मपत्नीषु यो जातः सगुरोः सुतः ।
प्राव्राज्यान्नश्यते [1] पूर्वं स्त्रीयोगादपर तथा ॥९९॥

उभाभ्यां यः प्रनष्टः स्यात्तस्यापत्यस्तु कत्थक ।
त्रिकर्णोत्थास्त्रिकर्णश्च त्रिकपालात्म [2] कर्णका ॥१००॥

नित्यनैमित्तिकागन्तुगुरुदेवाग्न्यपूजनात् ।
भस्माङ्कुरस्तु [3] कत्थोत्थस्तत्सुताः कौशिकादयः ॥१०१॥

भोजका व्रतिपुत्राश्च कौशिकान्याश्च [4] कुत्सिताः ।
राष्ट्रक्षयकरा ह्येते ये च पषाण्डिनो नराः ॥१०२॥

समयादिं विना मूढः स्थापनं कुरुते तु यः ।
शास्त्रावलोकनादेव चण्डेशस्तस्य शासकः ॥१०३॥

योऽशैवः स्थापयेदीशं लोभव्यामूढमानसः ।
स याति नरकं सद्यो याज्ञिकैः सह देशिकः ॥१०४॥

पञ्चस्रोतःसु ये पञ्चसमयाः शंभुनोदिताः ।
तेषामाचरणान्नित्यमाचार्य इति कीर्त्यते ॥१०५॥

आचार्यः शिवरूपेण लोकानुग्रहकारकः ।
तस्मान्न मानवीं बुद्धिं कारयेद्देशिकं प्रति ॥१०६॥

ईशं वक्त्रं तथाघोरं गुह्यं चाजात[5]संज्ञकम् ।
पञ्चवक्त्राणि देवस्य पञ्चागमविवृद्धये ॥१०७॥

---

[1] दुष्यते, मू. अ. ख. पा. । [2] त्रिकर्णस्तु त्रि, मू. अ. पा. । निरूपाणां, ख. पा. । [3] गुरुस्तु, ग. पा. ।
[4] कौशिकाद्याश्च, मू. अ. पा. । [5] च जात, मू. अ. क. पा. ।

कामिकं योगजं मान्त्री[१] कारणं चाजितं तथा।
दीप्तं सूक्ष्मं च साहस्रमंशुम[२] त्सुप्रभं दश ॥१०८॥
शिवभेदाः समाख्याता रुद्रभेदानतः (?) परम्
विजयं पारमैश्वर्यं निश्वासोद्गीतसंज्ञकम् ॥१०९॥
प्रोद्गीतं मुखबिम्बंतु सिद्धं सन्तानमेव च।
नरसिंहं चन्द्रहासं वीरं स्वायम्भुरौरवम्[३] ॥११०॥
माकुटं किरणं चैव ललितं विरसं[४] परम्[५]!
([६] रुद्रभेदाः समाख्याता दशाष्टादश चोर्ध्वगाः ॥१११॥
हरं हुङ्कारकं चैव बिम्बुसारं कला[७]मृतम्।
दवत्रासं च सुत्रास सावरं कालसावरम् ॥११२॥)
पक्षिराजं शिखायोगं शिखासारं शिखामृतम्।
पञ्चभूत[८] विभागं च शून्यभेद[९] विनिणयम् ॥११३॥
कालकाण्ठं[१०] च कालाङ्गं कालकूटं पटद्रुमम्।
कम्बोजं कम्बलं कङ्कं कालकुण्डं कटाहकम् ॥११४॥
सुवर्णरेख[११] सुग्रीवं तोत्तल तोत्तलोत्तम[१२]।
गारुडस्य त्विमे भेदा अष्टाविंशतिरीरिताः ॥११५॥

---

१ चिन्त्यं, मू. अ. पा.। चान्त्यं, क. ग. पा.। सित्रं, ख. पा.। २ अंशुमत्, क. पा.। ३ रोचनम्, ख. पा.। ४ विचरं, ग. पा.। ५ स्मरम्, मू. अ. क. पा.। ६ चापचिन्हान्तर्गतोऽय पाठः क पुस्तके नास्ति। ७ करा, ख. पा.। ८ पञ्चामृत, मू. अ. पा.। ९ मद, ख. पा.। १० मणिकण्ठं, ख. पा.। ११ सुवर्णाग्रण्यं, क. पा.। १२ तोतलं तोतलोत्तम्, मू. पा.। तोत्तरंतोत्तरोत्तरम्, ख. पा.।

स्वच्छन्दभैरवं चण्डं क्रोधमुन्मत्तभैरवम् ।
असिताङ्गं रुरुं चैव कपालीशं समुच्चयम् ॥११६॥
अघोरं घोषणं [1] घोरं निशासञ्चारदुर्मुखम् ।
भीमाङ्गं डामराराावं [2] भीमं वेतालमर्दकम् ॥११७॥
उच्छुष्मं वाम [3] कापालं शेखरं पुष्पमद्वयम् ।
त्रिशिरं चैकपादं तु सिद्धयोगेश्वरीमतम् ॥११८॥
पञ्चामृतं प्रपञ्चं च [4] योगिनी जाल [5] सम्बरम् ।
विश्वरिकण्ठःसङ्कोचां [7] तिलकोद्यानभैरवम् ॥११९॥
एवं द्वात्रिंशतन्त्राणि सोत्तराणि च तद्द्वयम् ।
चतुः षष्टिप्रमाणानि दक्षिणास्योद्भवानि च ॥१२०॥
नयं नयोत्तर मूकं मोहनं मोहनामृतम् ।
करपूजाविधानं तु वीणातन्त्रं तदुत्तरम् ॥१२१॥
जयं च विजयं चैव अजितं चापराजितम् ।
सिद्धनित्योदयं ज्येष्ठं चिन्तामणिमहोदयम ॥१२२॥
वागभवं कुहकं चित्रं कामधेनुकदम्बकम ।
आनन्दरुद्रभद्राख्यं [8] किङ्करं किङ्करानुगम् ॥१२३।
अनन्तविजयं शौक्रं दौर्वासं बीजभेदकम् ।
वामदं वामदेवोक्तं [9] चतुर्विंशतिभेदगम् [10] ॥१२४॥

---

१ घोरसं, ख. पा. । २ रागं, ख. पा, । ३ उच्छुष्मवाहि, घ. पा. । ४ प्रपञ्चाहि, घ. पा. । ५ जल, घ. पा । ६ विकण्ठ, म. पा. । ७ झङ्कार, ख. पा. । ८ भद्राक्षे, ख. पा. । ९ देवोत्थं, मू. अ. क. प. । १० भेदजम्, क. पा. ।

हलाहलं हयग्रीवं करकोटं कटङ्कटम् ।
करोटं [1] मुण्डमालं च कङ्कोटं खङ्गरावणम् [2] ॥१२५॥
चण्डासिधारं हुङ्कारं हाहाकारं शिवारवम ।
घोराट्टहासमुच्छिष्टं घुर्घुरं दुष्टत्रासकम् ३ ॥१२६॥
विमलं विकटं चैव सुधारणं ४ महोत्कटम्
यमघण्टं च भूताव्हं ५ विषभेदमजातजम् ॥ १२७॥
इत्येवं शैवतन्त्राणि ६ चतुःषष्ट्युत्तरं शतम् ।
पुनर्लक्षविभेदन प्रभिन्नः शास्त्रसङ्ग्रहः ॥१२८॥
शिवो रुद्रस्ततो देवा देवेभ्य ऋषयस्तथा ७ ।
ऋषिभ्यो मानुषाः शिष्याः सर्वशास्त्रावतारकाः ॥१२९॥
सिद्धान्तो गारुडं चैवं भैरवं वामभौतिकम् ।
इति सामयिकं प्रोक्तं शंभुनागमपञ्चकम् ॥१३०॥
सिद्धान्ते चतुर्वर्णान्नभोजनं गारुडे विषम् ।
एकत्रभोजनं घोरे वामे वामामृतं तथा ॥१३१॥
भूततन्त्रे शवस्पर्शः पञ्चस्रोतःस्वयं विधिः ।
आचरेत् समयान् पञ्च यः स आचार्य उच्यते ॥१३२॥
आचारमाचरेच्छैवं ८ शास्त्रोक्तं गुरुभाषितम् ।
तदवश्यं हि कर्तव्यमन्यथा पतनं भवेत् ॥१३३॥

---

१ कवाटं, मू.अ.ग.पा. । कल्फोटं, क.पा. । २ वारणम्, मू.अ.पा.
३ दुष्कृतासनम्, मू. अ. पा. । ४ स्वधावर्णं, मू. पा. । ५ भूताज्यं, ख. पा. । भूताङ्गं, मू. पा. । ६ सूत्राणां, ख. पा. । सूत्राणि घ. पा. । ७ सदा, मू. अ. क. पा. । ८ चैवं, मू. पा. ।

पूजा होमो बलिर्भिक्षा चरुश्चातिथिपूजनम् ।
षट्कर्माणि तु कार्याणि शिवाचार्येण नो परैः ॥१३४॥
व्याख्यानं श्रवणं चैव प्रदानं च प्रतिग्रहः ।
दीक्षां च स्थापनं चेति [1] षट्कर्माणि सदा गुरोः ॥१३५॥
न दीक्षां स्थापनं कुर्याच्छिष्य आचार्यसन्निधौ ।
क्रोशान् पञ्च परित्यज्य गुर्वादेशात्तदाचरेत् ॥१३६॥
समयी समयस्थः स्यात्पुत्रकश्चागम [2] श्रुतिः ।
साधकः साधयेत्सिद्धिराचार्यो दीक्षयेत्पशून् ॥१३७॥
समयादिक्रमेणैव योऽभिषिक्तः स दैशिकः ।
प्रतिष्ठादिक्रिया तस्य न पाठादग्र [3] जन्मनः ॥१३८॥
शिवादिस्थापने सम्यङ् न्यायमार्गेण धीमताम् ।
युक्तिः संसूच्यते काचिद्या चोक्ता पारमेश्वरे ॥१३९॥
पाठादेव द्विजो यत्र शिवं लोभात्प्रतिष्ठयेत् ।
नाश्मादौ शिवता तत्र ह्यशिवे दूरतः शिवः ॥१४०॥
प्रतिष्ठयेद् द्विजो यस्तु प्रमदाद्देवताः क्वचित् ।
चाण्डालोऽसावभोज्यान्नः पातकी नात्र संशयः [4] ॥१४१॥
शिवसंस्थापनाद्विप्रः श्वयोन्यां जायते ध्रुवम् ।
अन्यगोत्रे [5] कुशा [6] पातान्नारकी स्याद् द्विजाधमः ॥१४२॥
पठन्त्यादेशतो वेदानादेशेन यजन्ति ये ।

---

१ चैव, मु. पा. । २ पुत्रकः स्वागम, अ. क. ख. ग. ङ.
३ पाठान्नैवाग्र, मू. अ. पा । नयावदग्र, ख. पा । य स
विप्र, ग. पा । ४ नारकी भवेत्, ख. घ. पा । ५ श्रोत्रे, ए. अ.
पा. । त्याश्रे, क. पा. । ६ त्रेऽ ङ्कुशा, ख. पा. ।

लिङ्गादिस्थापका ये च ते चाण्डालसमा द्विजाः ॥१४३॥
शूद्रे चैवं भवे द्वृत्तं ब्राह्मणे न च विद्यते ।
मन्तव्यो विप्रवच्छूद्रः शूद्रात्पापतरस्तु सः ॥१४४॥
विश्वामित्रो द्विजीभूतः क्षत्रियो द्विजवृत्ततः ।
वृत्तात्सिद्धा वसिष्ठाद्या व्यासेनोक्तं च भारते ॥१४५॥
अग्निष्टोमादिकान्यज्ञान् विहाय स्थापयेच्छिवम् ।
नरके पतति क्षिप्रं कर्ता स्वपितृभिः सह ॥१४६॥
प्रतिष्ठार्थे नवर्तन्ते द्विजत्वे न च ये स्थिताः ।
स्वब्राह्मण्यं गतं तेषां ब्रह्महत्यां १ च संस्थितम् ॥१४७॥
ब्राह्मण्यहारकैर्विप्रैः स्थापिता ये शिवादयः ।
ते क्रूरा ध्वंसका ज्ञेया यजमानक्षयावहाः ॥१४८॥
शिवादिस्थापनाद्विप्र उभाभ्यां भ्रश्यति क्षणात् २ ।
दानार्चनाद्यनर्हः स्याद्विनष्टा ब्राह्मणी ३ यथा ॥१४९॥
दुष्टपात्रस्थितं क्षौद्रं यद्वदम्लं तु दोषदम् ।
तद्वद्देवाः कुविप्रस्थाः कर्तुः स्युरशुभप्रदाः ॥१५०॥
शिवः शिरस्तथा ज्योतिः सावित्रश्च चतुर्थकः ।
एते शैवाः समाख्याता न त्वेते ब्राह्मणाः क्वचित् ॥१५१॥
ब्रह्मक्षत्रियवैश्यानां शूद्राणां च शिवाध्वरे ।
संस्कृतानां यतस्तेषां नश्यन्ते पूर्वजातयः ॥१५२॥
ये ब्राह्मणा न ते शैवा ये च शैवा न ते द्विजाः ।

---

१ ब्रह्महत्वं, लि.पु.पा. । २ द्विजः, घ.पा. ३ नष्टो ब्राह्मणो, मू. अ.क.ख.ग.ङ.पा. ।

पृथङ्मन्त्रागमाचेषां १ व्रतानि क्रतवः पृथक् ॥१५३॥
लुब्धा द्विजाधमा मूर्खाः स्वब्रह्मघ्ना २ विकर्मगाः।
मुग्धाः कुर्वन्ति ये विप्राः शिवादिस्थापनं कलौ ॥१५४॥
द्विजबौद्धादियागेषु मन्त्राः शैवाद्यस्तथा ३।
तथैव शिवयागेषु न मन्त्रा वैदिकादयः ॥१५५॥
न वेदे त्रिविधं लिङ्गं न च ४ प्रासादलक्षणम्।
न द्वारं मण्डपादिश्च स्थापनं न शिवादिके ॥१५६॥
शिवसिद्धान्त एवोक्तं लक्षणं शाङ्करादिकम्।
तस्माच्छैवेन मन्त्रेण प्रतिष्ठेत ५ शिवादिकम् ॥१५७॥
चलाचल ६ प्रभेदेन द्विधा लिङ्गं शिवस्य यत्।
शिवमन्त्रैस्तयोः सम्यक् शिवत्वं नान्यमन्त्रतः ॥१५८॥
न वेदैः पञ्चरात्रैस्तु ऋष्युक्तैर्नापि चागमैः।
नान्यदर्शनमन्त्रैर्वा प्रतिष्ठा स्याच्छिवस्य तु ॥१५९॥
न वेदे शैवसंस्कारो नापि वेदे शिवव्रतम्।
न च शैवीक्रिया वेदे न च खड्गादिसिद्धयः ॥१६०॥
गर्भाधानादिसंस्कारा ७ स्त्रिभिस्त्रैवर्णिकं व्रतम्।
अग्निष्टोमादयो यज्ञा वेदोक्ता ईश्वरेण तु ॥ १६१ ॥
चातुर्वर्ण्यव्रतं शैवं चतुरर्थप्रसाधनम्।
सिद्धान्तस्थापनं दीक्षां नोक्तं वेदेषु शंभुना ॥१६२॥

---

१ श्चैषां, मू.अ.क.ख.पा.। २ ब्रह्मघ्ना, मू.अ.क.ख.ग.ङ.पा.। ३ शैवा यथेह न, मू. अ.क.ख.पा.। ४ नैव, घ.पा. ५ प्रतिष्ठेयं, मू.अ.पा. ६ चराचर, लि.पु.पा। ७ संस्कारान्, क.पा.। संस्कारैः ख.घ.पा.।

स्वल्प १ बीजो घटो २ (?) यद्वच्छिष्योऽप्येवं स्वबीजतः ।
स्वमन्त्रबीजजा देवा न वह्ह्नरडम्बरात् ३ ॥१६३॥
घन्दि ४ द्विजजनाश्छात्राः प्रकटाः ५ पाठजीविनः ।
नैते शिवाध्वतत्त्वज्ञाः स्तावका जनरञ्जकाः ॥१६४॥
वेदादिशब्द ६ शास्त्रैस्तु कैः स्तुतो न शिवः प्रभुः ।
स्तुत्यैव स्थापनं न स्याच्छिवलिङ्गे चलाचले ७ ॥१६५॥
प्रतिष्ठा पञ्चधा या च शिवेनोक्ता शिवागमे ।
शैवाचार्यैस्तु सा कार्या रुद्रब्रह्मार्कचक्रिणाम् ॥१६६॥
स्थाप्याःसुरा ८ग्रहाः सर्वे लोकपालास्तथोरगाः ९ ।
यक्षराक्षसयोगिन्यो गणा पार्षस्तथापराः ॥१६७॥
स्थित्युत्पत्तिविपत्तीनां कारणं सुखदुःखयोः ।
स्वसंवेद्ये १० ऽपि रागान्धा द्विजा ईश्वरनिन्दकाः ॥१६८॥
शैवान्तः पातिनो ये ऽपि पञ्चार्थाः ११ कारकादयः ।
तेऽपि त्याज्याः प्रतिष्ठादौ दूराद्बौद्धद्विजादयः ॥१६९॥
तस्माच्छिवात्मकेनैव शिवाचार्येण धीमता ।
शिवादिस्थापनं कार्यं नान्यैस्तु ब्राह्मणादिभिः ॥१७०॥
स्वदर्शनस्थिता नित्यमाचार्याश्चैव षड्विधाः ।

---

१ अल्प, ग.पा । २ टटा, ख.पा. । ३ न च हत्कण्ठडम्बरैः मू.अ.क.ग.पा. ।
४ वन्हि, क.पा. । ५ श्रु कटाः, ग.पा. । ६ शन्त, क.पा. । सर्व, ख.पा. । शठ.ग.पा. ७ चराचरे, लि.पु.पा. । ८ तारा, ख.पा. । ९ सहोरगाः मू.अ.क.ग.पा. । १० सुखं वेदे, ख.पा. । ११ यश्चार्थाः, ख.पा. ।

स्वकर्माभिरता विप्राः शैवाद्याः कापिलान्तकाः ॥१७१॥
श्रुतिस्मृत्यर्थविद्विप्रः स्वशास्त्रव्रतपालकः ।
स्वषट्कर्मान्वितो नित्यं नान्यकर्मा द्विजो भवेत् ॥१७२॥
दानं प्रतिग्रहः पाठो यजनं याजनं तथा ।
अध्यापनमिति स्युश्च षट्कर्माणि सदा द्विजे ॥१७३॥
ऋतुसेवातपो दानश्राद्धवैश्वानरार्चनैः[1] ।
तृणादिमूल्यभिक्षान्नवृत्तिः स्याद्ब्राह्मणो वरः ॥१७४॥
खड्गजीवो मषोजीवी[2] द्वारपालो पुरोहितः ।
आदेशी वेदविक्रेता षडेते शूद्रवद्द्विजाः ॥१७५॥
श्रुतिर्वेदाः समाख्याताः स्मृतयस्तूनविंशतिः ।
मनुर्दक्षो वसिष्ठोऽत्रिः कात्यायनोऽथ गौतमः ॥१७६॥
याज्ञवल्क्यश्च संवर्तो व्यासो विष्णुर्यमोऽङ्गिराः ॥
शङ्खलिखितहारीतशातातपपराशराः ॥१७७॥
आपस्तम्बोशनोजीवाः स्मृतयस्तु तदुक्तयः ।
न शैवादितिप्रष्ठायामेते विप्रा नियामकाः ॥१७८॥
प्रतिष्ठाकल्पकौमारं किरणं[3] पिङ्गलामतम् ।
देव्या मतं मयं नन्दि प्रतिष्ठा पारमेश्वरम् ॥१७९॥
भास्करं लिङ्गकल्पं च विद्यापुराणवातुलम् ।
शक्राख्यं वामदेवं च द्विधा पैतामहं तथा । ॥१८०॥
वाणगर्गमतं याम्यं हंसाख्यं वैश्वकर्मकम्[4] ।
प्रतिष्ठातन्त्राण्येतानि शिवोक्तान्येकविंशतिः ॥१८१॥

---

१ लेवानरार्चनैः, मू. पा. । २ मखाजीवी, मू. अ.क.ग.पा ।
३ केरणं म.पा. । केरलं, ग.पा. । ४ वैश्वसर्गकम, म.अ.ग.पा. ।

एतेभ्यः सारमादाय नारदात्पौष्करात्तथा ।
पद्मोत्थमार्कण्डेयाभ्यां रम्भा[1]सिद्धादि रम्भतः[2] ॥१८२॥
रत्नप्रयोजनाच्चाहितिलकेभ्यस्तथापरान् ।
मार्तण्डा[3]ह्वयतो लक्ष्यं सर्वमेत[4]त्समुच्चयम् ॥१८३॥
बहुधा गुह्यतन्त्राणि नैतानि ब्राह्मणस्य तु ।
शिवाश्रमस्थितैः शैवैः प्रतिष्ठा नान्यदर्शनैः ॥१८४॥
अशैवैः स्थापित लिङ्गमितरैर्वेदद्विजातिभिः ।
शैवास्तन्न नमस्यन्ति स्थापितं चान्यदर्शनैः ॥१८५॥
ब्रह्मव्रते[5]स्थितो नित्यं शैवादिव्रत[6]माचरेत् ।
शैवसंस्कारहीनस्तु उभाभ्यां पतति द्विजः ॥१८६॥
पतिते तद्गतं यच्च गृहीता या च दक्षिणा ।
कृतं यद्व्रतबन्धादि तत्सर्वं निष्फलं भवेत् ॥१८७॥
स्वयमन्यस्वरूपेण कर्माणि क्रियते तु यत्[7] ।
न भवेदीप्सितं तत्र वृथैवासौ परिश्रमः ॥१८८॥
सर्वार्थग्रहणे मुक्तिः[8] सिद्धयश्च शिवागमैः ।
शिवोक्तैश्च विना मन्त्रैस्तदेतत्प्राप्यते कथम् ॥१८९॥
यदि वेदैर्भवेल्लिङ्गं शूद्राद्याराधनं कथम् ।
मिश्रैर्वाप्यथ दोषाद्य[9]त्कुमाराद्युक्तशास्त्रतः ॥१९०॥
अन्यद् देवश्च मन्त्रश्च विधि श्चान्यां करोति यः ।

---

१ गौरी, ख.पा. । २ सौर्यतः, मू.अ.क.ग.पा. । ३ मार्कण्डा, ख.ग.पा. । ४ सर्वतत्व, ग.पा. । ५ ब्रह्मव्रते, ख.पा. । ६ वृत्ति, क.ख.ग.पा. । ७ नान्यकर्म तु, मू.अ.ग.पा. । ८ तुग्रहणे युक्तिः मू.अ.पा. । ९ दोषाढ्यं, क.ग.पा. ।

कर्मचण्डं भवेत्तस्य कर्म चण्डालकश्च स: ॥१९१॥
न स्वदर्शन उक्तत्वान्नापि रागाद् १ द्विजादिषु ।
मुक्तिसिद्धं २ हितं लोके स्कन्दोक्तं चात्र लिख्यते ॥१९२॥
सनकाद्यैर्व्यासाद्यैर्ऋषिभिर्या प्रचोदिता ।
क्रिया सा न भवेत्साध्वी मन्त्रसांकरदूषिता ॥१९३॥
क्षया विषयदोषाद्या वेदविद्या ३ प्रचोदिता: ।
अग्निष्टोमादयो यद्वत्प्रतिष्ठापीष्यते तथा ॥१९४॥
द्रव्याभिजनमन्त्राद्यै: शौचशुद्ध्यै प्रसारिता ४ ।
स्वर्गलोकफला साध्वी विज्ञेया वैदिकीक्रिया ॥१९५॥
स्वर्गलोकात्परिभ्रष्टा: सोमादादित्यमागता: ।
धानस्पत्यं समासाद्य संसरन्तीह याज्ञिका: ॥१९६॥
इष्ट्वा क्रतुशतं शक्र: स्वर्गलोकमवाप्तवान् ।
पुन: पुण्यक्रियाक्षीण: स्थावरादिषु जायते ॥१९७॥
सत्यलोकात्परं नास्ति ज्ञानस्यापि फलं महत् ।
तस्मात्ते मुनय: सर्वे शैवार्थे न विशारदा: ॥१९८॥
सर्वेषामेव वर्णानां क्रिया शैवी फलप्रदा ॥
त्रयाणां ब्राह्मणादीनां वेदविद्याप्रचोदिता ॥१९९॥
स्वर्गाख्यफलकामाय अग्निष्टोमादिके सदा ।
यज्ञे चरुपुरोडाशपञ्चगव्यादिभि: सह ॥२००॥
शूद्रादेर्नाधिकारोऽत्र वेदे च प्रतिषिध्यते ५ ।

---

१ नविरागाद्, मू.अ.पा. । भक्ष्याद्यानापिरागाद्, क.ख.पा ।
२ युक्तिसिध्दं, मू.अ.ख.पा. । ३ देवविद्या, मू.पा. । ४ प्रसाधिता, ख.पा. ५ न प्रतिशिष्यते, मू.अ.क.ख.ग.ङ.पा. ।

शूद्रादीनां च यो दद्याद्वेदविद्याप्रसाधितम् ॥२०१॥
हविष्यं स गुरुर्यायात्तैः सार्धं नरकं ध्रुवम् ।
तस्माच्छैवो विधिः प्राज्ञैः शैवैर्मन्त्रैःप्रसाधितः ॥२०२॥
शिवादिस्थापने यागे दीक्षायां च विशेषतः ।
सर्वेषामपि वर्णानामनु ग्रहकरः परः ॥२०३॥
लक्षकोटि सहस्राणि विंशतिरर्बुदानि च ।
कोटिखर्वाब्ज वृन्दं च मन्त्रास्त्वीशाद्विनिर्गताः ॥२०४॥
द्वासप्ततिसहस्राणि कोटि लक्षं तथार्बुदम् ।
अयुतानि च पञ्चाशन्मन्त्रा वक्त्रा १ द्विनिः सृताः ॥२०५॥
त्रिंश २ त्कोटिसहस्राणि समाष्टकशतानि च ।
नियुतानि च षट्त्रिंशन्मन्त्रा रुद्राद्विनिर्गताः ॥२०६॥
नवकोटिसहस्राणि पञ्चाशीत्ययुतानि च ।
कोटिशतानि पञ्चाशन्मन्त्रा वामाद्विनिः सृताः ॥२०७॥
सप्तकोटिसहस्राणि सप्तत्रिंशच्छतानि च ।
शतं सहस्रलक्षं च सद्योजाताद्विनिर्गताः ॥ २०८ ॥
पञ्चवक्त्रोद्भवैर्मन्त्रैः शिवोक्तैः सिद्धिमुक्तिदैः ।
तैस्तु लिङ्गादि संस्थाप्यं नान्यैर्वेदादिचोदितैः ॥२०९॥
अकारादिक्षकारान्ताः सदाशिवाङ्गनिर्गताः ३ ।
तैः कृतं पञ्चधा शास्त्रं शैवाख्यं सिद्धिमुक्तिदम ॥२१०॥
अणिमादिमहासिध्द्यै सिध्द्यन्ति खेचरादयः ।
लिङ्गाश्रयाद्यथासिध्दाः प्रागुक्ता वेधसादयः ।

१ रुद्रा, ग.पा. । २ विंशत्, घ.पा. । ३ शिवाद्विनिर्गताः, मू अ.क.ख.ग.पा.

तथा व्याडीन्द्रदन्ताद्याः कम्बला भ ङ्कगा १ दयः ।
निर्मत्सरा वदन्त्याशुर सिद्धाः ३ ।श.वोक्तमः प्रतः ॥२१२॥
नासत्यमैश्वरं वाक्यं केनसिद्धा युगे युगे ।
सम्यग्विधान .स्वशैर्दीक्षितो मुच्यते पशुः ॥२१३॥
सबीजाः सस्फुराः ४शैवाः सचेतो ऽ ५ग्निशिवान्६ गाः ३।
सर्वानुग्राहका मन्त्राश्चतुर्वर्ग७प्रसाधकाः ॥२१४॥
ऋगथर्वतथा सामयजुश्चेति क्रमेण च ।
प्राग्याम्येन्दुजलाशास्यैर्लक्षग्रन्थैः कृता श्रुतिः ॥२१५॥
न ८वग्रहात्मका ८ देषा वेदेषु स्तुतिपूर्वकाः ।
सिद्धिमुक्ती विना सर्वं शब्दमात्रपरा मताः ॥२१६॥
त्रयीनिबन्धहेत्वर्थं त्रयाणां च प्रते ऽ श्वरे ।
ईशोनोक्ता श्रुतिः पश्चात्त्रवर्गाख्यफलसाधने ॥२१७॥
शैवागमपुराणेषु तथा शास्त्रान्तरेषु च ।
अवधूतोक्तितो ऽ ज्ञत्वं ब्रह्मविष्णोर्नमह्वरः९ ॥२१८॥

आस्तां तवान्यदपि तावदतुल्यकक्ष-
मैश्वर्यमीश्वरपदस्य निमित्तभूतम् ।
त्वच्चेह सोऽपि भगवन्नगतोऽवसानं
विष्णुः पितामहयुतः किमुतापरस्य ॥२१९॥

सर्वैर्ब्रह्मादिभिर्देवा कृताश्चेद्दोपकारिणः ।

---

१ लोभास्थिरा, ख.पा । २ द्रव. ख.पा. । ३ शिवाः, ख. पा. । ४ सफलाः, खः पाः । ५ सर्वतो, ख. पा. । ६ न्तकाः, मू. पा. । ७ चतुर्दश, क. ग पा. ८। नवग्रहान्महा. ग. पा. । ९रतज्ञतम्, ख. पा. ।

गोनराश्वादिकं हत्वा यज्वनां नरको भवेत् ॥२२०॥

[1]सर्वज्ञतां तृप्तिमनादिबोधं
स्वतन्त्रतां नित्यमलुप्तशक्तिम् ।
अनन्तशक्तिं च विभोर्विदित्वा[2]
प्राहुःषडङ्गानि महेश्वरस्य ॥ २२१ ॥

वेदाःप्रमाणमंशोक्ताः स्वर्ग[3]ःसर्वज्ञकारणम् ।
ईश्वरं कारणं न्यायाद्वदन्ति तर्कवादिनः ॥२२२॥
भेदः साङ्ख्या[4]यनश्चैक आश्लायको[5] द्वितीयकः ।
शतानिदश मन्त्राणां ब्राह्मणो द्विसहस्रकः ॥२२३॥
ऋग्वेदो हि प्रमाणेन स्मृतो द्वैपायनादिभिः ।
एकोने द्वे सहस्रे च मन्त्राणां यजुषस्तथा ॥ ४ ॥
शतानि दश विप्राणां षडशीतिश्च शाखिकाः ।
काण्व[6] माध्यन्दिनासंज्ञा कठी प्राच्यकठी तथा ॥ २२५ ॥
मैत्रायणीयसंज्ञाच्च तैत्तिरीयाभिधानिकाः ।
वैजवाप[7] निरेतश्चान्याः शाखा यजुषि संस्थिताः ॥ २२६ ॥
सामन कौथूम[8] संज्ञैका द्वितीया च चरायणी[9] ।
गानान्यपि च चत्वारि वेद आरण्यकस्तथा ॥ २२७ ॥
ऊह[10]उह्य[11]चतुर्थं च मन्त्रा नवसहस्रकाः ।

---

१ श्लोकस्यास्य प्रथमान्तः पाठः, मू.अ.ख.ङ. पुस्तकेषु । २ चिधिज्ञा, मू.अ.क.ख ग ङ.पा.। ३ वेदःप्रामाण्यमीशोक्तया स्वर्ग, मू.अ.पा. ४ साङ्ख्या, क.ग.पा.। ५ आश्नीयको, मू.अ.ख.ग.पा.। ६ काण्व क ख.घ.पा. । ७ वैजवाप, घ.पा. । ८ कौस्तुम, घ.पा. । ९ चरायणीः मू.पा. । १० ऊहं, क.ख.घ.पा.। ११ ऊह्यं, क.पा.।

स तु; शतकाश्चै वृह्मप्रभवका: १ स्मृता: ॥२२८॥

पञ्चविंशतिरेवात्र खाम्नो मानं प्रकीर्तितम् ।

सुमन्तुर्जाजलिश्चैव श्लोकायनिस्तथापर: ।

शौनक: पिप्पलादश्च मुञ्जकेशादयोऽपरे ॥२२९॥

ऋषिभिर्बहुभिस्तज्ज्ञै: प्रोक्तोऽथर्वसमुच्चय: ।

मन्त्राणा युतं साष्टशतं चोपरि षट्शतम्३ ॥ २३० ॥

तस्मात्मन्त्रदशनाचार्यैर्मन्त्र: कार्यस्तथाध्वर:४ ।

शिवादीनां प्रयत्नेन ह्यन्यथा दोषदायका: ॥ २३१ ॥

सौगता५तवेदादिमन्त्रर्वा स्थापिते शिवे ।

राष्ट्रराज्ञोभवेद्दोष: कर्तु कारयितुस्तथा ॥२३२॥

द्विजराजन्यविट्शूद्रा शैवसंस्कारवर्जिता:।

नारकास्ते६समाख्याता: कर्तु: कुलान्तकारका: ॥ २३३ ॥

पुस्तकाध्ययनादेव लिङ्गादीन् स्थापयेद्द्विज:।

संकीर्णवृत्तिर्विज्ञेयस्त्वभोज्य: सर्वदा बुधै: ॥२३४॥

उपरोधात्प्रमादाद्वा भुक्त्वा तत्र शतं जपेत् ।

बहुरूपस्य मन्त्रस्य निर्दोषो वै भवेत्तत: ॥२३५॥

सबलो ग्रेप ७ विख्यातो नाममात्रेण स द्विज:।

आचार्यो गीयते लोके न ह्यसौ पारमार्थिक: ॥ २३६ ॥

दीक्षा ८स्थापनमन्त्राद्यैर्वर्जितस्तु पितामहे ।

---

१ हटका:, घ.पा. । २ श्लोकाध्याय, घ.पा । ३ नोत्तरनिषत्कुलम,घ,पा. । ४ध्वज:,क.पा. । ५ राष्ट्रे राज्ञो भवे, घ.पा । ६ नो रक्षिण:, ख.पा. । नारकिन:, घ.पा. । ७ सबलो घेब,सू. ब.क.पा. । ८ व्याख्या ख.घ.पा. ।

देशिकास्त्रिविधा ग्राह्याःप्रागुक्ता ये गुरुक्रमात् ॥ २३७ ॥
देव१कर्तरि नाशो२ऽथाभोगो वा यत्प्रतिष्ठिते ।
शिवतुल्योऽपि स त्याज्यो३दग्धहस्तो गुरुःस हि ॥ २३८ ॥
शैवसंस्कारसंपन्नाःशास्त्रज्ञाःसाधकोत्तमाः ।
प्रतिष्ठेयुःसुरान्सर्वानभावे देशिकस्य तु ॥ २३९ ॥
विनीतो धनवान्दक्षो निरालस्यो विमत्सरः ।
ऋजुर्लज्जान्वितः साधुर्जितक्रोधो जितेन्द्रियः ॥ २४० ॥
लक्ष्यलक्षणमानज्ञो वास्तुकालादि वेधकः ।
सुदृष्टिः४ कुलजो धीमानोद्वेगी सूक्त ५ तत्परः ॥ २४१ ॥
पत्रं चतुष्पदं लिङ्गस्तम्भं पिण्डिं च रूपकम् ।
प्रासादं मण्डपं द्वारं विद्याद्यो६हि स७कारुकः ॥ २४२ ॥
सर्वावयवसंपूर्णाःशिवसंस्कारसंयुताः ।
शिवधर्म८विधानज्ञा मूर्तिपा देशिकादयः ॥ २४३ ॥
सहायाः कुलजा धीराः समर्था भक्तितत्पराः ।
विनीता निपुणा दक्षा गुरोरादेशवर्तिनः९ ॥ २४४ ॥
इति लक्षणसारसमुच्चये कर्तुराचार्यादिपरीक्षा नाम द्वितीयो विधिः

---

१ देवे,घ.पा. । २ विनाशो, मू.अ.पा. । ३ ग्राह्यो,मू. पा. । ४ अतृष्णिः, क.ग. पा. । ५ सूत्र, घ. पा. । ६ विन्द्याद्यो, लिं पु. पा. । ७ हेम,ग.पा. । ८ कर्म, घ.पा. । ९ राज्ञानुवर्तिनः, क.ख.पा. ।

अथ तृतीयः

दैशिकैः शिल्पिभिः सार्धं ग्राह्या ये तरवः शुभाः ।
शिला वा जाति १ भेदेन अधुनैव निरूप्यते[2] ॥१॥
घनपुष्पाकुला भूर्या वारुणी सा बहूदका ।
काश्मीरी प्राचि याम्ये वा खदिरो ब्रह्मवृक्षकः ॥२॥
यस्याःमलिकपोताहिशिखिगृध्रामिषाशिनः ।
अन्तर्गत जलंस्तोकं साग्नेयी रूपतो धरा[3] ॥३॥
श्रीहिक्षेत्रं च याम्ये स्यात्क्षीरवृक्षश्च पश्चिमे ।
सौम्ये तोयं च माहेन्द्री पीलूद्दालस्नुहीयुता ४ ॥४॥
शर्करार्कद्रुमाकीर्णा मृगतृष्णान्विता च या ।
अतृणाम्बुश्रृगालाढ्या वायवी सा मही स्मृता ॥५॥
आसु भूषु [5] क्रमाज्जाताः शिला वृक्षास्तदात्मकाः ।
माहेन्द्रीवारुणीजाताः शस्ताश्चान्ये च गर्हिताः ॥६॥
स्पन्दनो मधुकः शिग्रो ६ रुद्राक्षो धवचन्दने७
शमी द्राक्षा सुराह्वश्च नवैते विप्रशान्तिदाः ॥७॥
श्रीवृक्षारग्वधारिष्टशिरीषारुणचन्दनम् ।

---

१ राजाभि, मू.अ. क.ग. पा. । २ निरूप्यन्ते ऽ धुनोच्यते, ख.पा. । ३ परा, ख. पा. । ४ द्दालस्तु संयुता, ग. पा. । ५ आरवृक्ष, क. ग. पा. । ६ सिग्रो, क. ख. घ. पा. ।७ नागकेशरः, क. पा.

कद्रा[१] शोकशाकं च शङ्की[२] च नृपभूतिदा । ॥८॥
श्यामावकुलकाश्मीरीजम्बुचम्पकशिंशपाः ।
सरलः पनसो बीज इत्येते वैश्यवृद्धिदाः ॥९॥
कर्णिकारोऽर्जुनो निम्बः[३] सहसारोऽथं[४] तिन्दुकः ।
काञ्चनासन[५] लोध्राश्व साल. शूद्रस्यपुष्टिदाः ॥१०॥
ग्राह्याः स्निग्धा महाकायास्त्वग्राह्याः पत्रसङ्कुलाः ।
सुभूस्था[६] शोभना हृद्या आरोग्या यौवनोद्वहाः ॥११॥
अन्येऽपि शोभना[७] वृक्षा घनाः क्षीरसमन्विताः ।
सारमध्या द्रढीयांसो नान्यकार्येषु योजिताः ॥१२॥
संश्लिष्टान्स्फुटिताव् वक्रान् कृम्याद्यान् कोटरान्वितान् ।
ग्रन्थितुल्यशिरायुक्तान वृद्धबालातुरांस्तथा ॥१३॥
शुष्कान वज्राग्निदग्धांश्च खगभूतादिसेवितान् ।
वल्मिकोत्थाञ्श्मशानोत्थान् फलाम्भः सेवितांस्त्यजेत् ॥१४॥
मध्याकाशान्स्वयं पाताम्नदीम[८]मरुताहतान् ।
सत्त्सन्नमदेवोत्थांस्तापसाश्रमजां[९]स्त्यजेत् ॥१५॥
अचलांश्चालयेद्यस्तु प्रासादान् ग्रा हा गान्द्रुमान्[१०] ।
अचिरेणैव कालेन चालको न भवेदसौ ॥१६॥
विधिमन्त्रोपचारेण तेषां छेदन[११]चालने ।

---

१ कद्रः=श्वेतखदिरः, इति वाचस्पत्याम् । २ वृक्षी, ग. पा. ३ हेम, क. ख. घ. पा. ।४ सारश्च, घ. पा. ।५ मर, ख.पा. ६ अस्वस्थाः, ग. पा. ।७ सानमा, ख. पा. ।
८ नदीद्र०, मू.अ.पा. ।९ श्रयजां, मू.अ.क.पा.। १० कचित,मू.अ. क.पा.। ११ भेदन, मू० अ० पा० ।

देवकार्ये न दोषः स्यादित्युक्तं पारमेश्वरे ॥१७॥
दृष्ट्वा कुलक्षणं वृक्षं कुर्यात्तस्याधिवासनम् ।
शोधयेद्भूमिभागं तु चतुर्दिक्षु समन्ततः ॥१८॥
दक्षिणाभिर्गुरुः पूज्यो वस्त्रैः स्वर्णविभूषणैः ।
ततःशिल्पिप्रधानाश्च सहायाःकुसुमादिभिः ॥ १९ ॥
यद्वामन्त्रितो वृक्षः कम्पते मानवीं वदेत् ।
विपरीत तदा मन्त्री दूरतस्तं विवर्जयेत् ॥२० ॥
क्षालयेद्वारिणा वृक्षं शिलां वाथ मनोरमाम् ।
गोमयेन ततो भूमिं लेपयित्वा गुरुस्तदा ॥ २१ ॥
कृताह्निक शुचिस्तत्र ब्रह्माङ्गकृतविग्रहः ।
ध्यात्वा देवं च विज्ञाप्य कृत्वाचार्यं विचक्षण.३ ॥ २२ ॥
आत्मपूजां पुरा कृत्वा कुर्याद्दिगवलोकनम् ।
अस्त्रं ध्यात्वा यजे४न्मन्त्री वर्मणा५परिवेष्टयेत् ॥ २३ ॥
भूमिशुद्धिं ततः कृत्वा दक्षिणे स्थण्डिले यजेत् ।
शिवं संपूज्य वह्निमथ नैवेद्यं ढौकयेच्चरुम् ॥ २४॥
मन्त्रसन्तर्पणं कृत्वा पूर्णां दद्याच्छिवेन तु ।
विज्ञाप्य कर्मशस्त्राणि पूजयेत्तर्पये६दपि ॥ २५॥
दिशमाश्रित्य कौबेरीं वायवीं वा समाहितः
ततो विज्ञाप्य देवेशं कुर्यादालंभनं पुनः७ ॥ २६ ॥
तज्जातीयेन कुम्भेश्च चतुर्भिः स्नापयेदपि ।

---

१ वृक्ष,क.ख घ.ग.पा.। २ सच,ग.पा.। ३ कृत्वाचार्यं विचक्षणम,क.पा.। ४ जपे,ख.पा.। ५ चर्मणा,मू, पा। ६ दर्पये, ख.पा.। ७ कृत्वा चालंभनं पुरा,घ.पा.।

॥२७॥
ताडनं भस्मनास्त्रेण प्रोक्षणं शिववारिणा
लेखनं चास्त्रदर्भेण वर्मणा१, परिरक्षणम् ।
वस्त्रं त्रिसूत्रं वृक्षस्य शिलायाश्च कुशान्वितम् ॥२८॥
ज्ञात्वा शुभनिमित्तानि२ यजेताथ गुरुस्तरुम् ।
संहितोक्तेन मन्त्रेण स्नानवस्त्रादिकं भवेत् ॥२९॥
गन्धेन पुष्पधूपाभ्यां नैवेद्यैः पूजयेद्द्रुमम् ।
दद्याद् बलिं च माषान्नैरामिश्रासवसंयुतैः ॥३०॥
ऐन्द्रागारेऽथ होतव्य रुद्रस्या३ष्टोत्तरं शतम् ।
अर्घ्यं दत्वा च वृक्षस्य४मन्त्रं संश्राव्यकं वदेत् ॥३१॥
ॐ५श्रीनिकेत नमस्तुभ्यं देवजुष्टवनस्पते ।
सङ्क्रमान्यदितः स्थानाद्गुणवयन्मनोहरम ॥३२॥
ॐ श्रीँ ह्री वौषट् ॥ इति संश्राव्यमन्त्रः ॥
पूर्णाहुतिं शिवेनैव ततो दद्याद्बहिर्बलिम् ।
यो यस्मिन्६विहितो मन्त्रः शास्त्रे स्याद्बलिकर्मणि ॥३३॥
स एव बलिमन्त्रः स्यात्७स्वनामप्रणवोऽथवा ।
स्थानेऽस्मिन् यानि भूतानि पिशाचा राक्षसाश्च ये ॥३४॥
सिद्धाविद्याधरा नागा देवाश्चैव सदानवाः ।
तांस्तु संपूज्य विधिवत्प्रियवाक्यैः प्रतोषयेत् ॥३५॥
शिवलिङ्गार्थमस्माकं यात्रा चैषा८शिवाज्ञया ।

---

१ चर्मणा, मू.अ.पा.२ शुभानि सिद्धानि, क ग पा. ।३ वृक्षस्य। क. पा.।४रुद्रस्य, मू, अ, पा, ।५ प्रणवो तुयं.मूल.अ.ख.पुस्तकेषु नास्ति । ६ यत्र, मू.अ, ख, ग, पा, । ७ विहितो मन्त्रः, मू, अ, क.ग, पा, ८ येषा, ख, पा, ।

शिवार्थं यद्भवेत्कार्यं युष्माकमपि तद्भवेत् ॥३६॥
अनेन बलिदानेन प्रीता भवत सर्वदा ।
सुखेन गच्छतान्यत्र मुक्त्वा स्थानमिदं द्रुमम् ॥३७॥
ततश्चाचम्य विधिवत्सकली[1]कृतविग्रहः ।
शिवं संपूज्य विधिवत्[2]स्वप्नमाणवकं जपेत् ॥३८॥
च॰ं प्राश्य स्वपेत्तत्र कुशतल्पेषु याज्ञिकः[3] ।
स्वप्नमाणवकं रात्रौ शतमष्टोत्तरं जपेत् ॥३ ॥
ॐनमो जय त्रिनेत्राय पिङ्गलाय महात्मने ।
वामाय विश्वरूपाय स्वप्नाधिपतये नमः ॥४०॥
स्वप्ने कथय मे तथ्यं सर्वकार्येष्वशेषतः ।
क्रियासिद्धिं विधास्यामि त्वत्प्रसादान्महेश्वर ॥४१॥
ॐ हिलि २ मातङ्गिन् महेश्वर ४ शूलपाणे दुःस्वप्न
हन २ शुभं दर्शय २ हुँ फट् स्वाहा ॥

इति स्वप्नमाणवकमन्त्रः ।

निर्धूमं ज्वलितं[5] वृक्षं पुष्पितं फलितं[6] श्रिया ।
रुद्रेण चान्वितं स्वप्ने दृष्ट्वा वाच्यं शुभं सदा ॥४ ॥
सिच्यमानं तु रक्तेन रक्षोभूतस्तु तथा ।
कप्युष्ट्रैर्भक्ष्यमाणं वा तं त्यजेदशुभप्रदम् ॥४ ॥

---

१ सफली, ख,पा, । २ विज्ञाप्य, मू.अ.क.ख. ग. पा. । ३ तल्पे तु याज्ञिके, घ.पा. । ४ महेश्वर, इति पाठः ख. घ' पुस्तकयोर्नास्ति । ५ फलितं, क. पा. । ६ ज्वलितं, क. पा. । हरितं ख.पा. । जेच्चाशुभ, क. पा. ।

न शक्यते यदा त्यक्तुं लक्षणाढ्यं सुशोभनम् ।
जुहुयाच्च तदा स्नात्वाघोरं दोषनिवृत्तये ॥४४॥
ऊर्ध्वं वनस्पतेर्मूर्धा स्यादधः पादकल्पना ।
ऐन्द्रे सौम्ये तथैशाने अव्यक्तादिमुखं क्रमात् ॥४५॥
ईशाशायां द्रुमं हन्यात् सिद्धार्थैस्तज्जपक्रिया १ ।
क्षौद्राज्यास्य कशस्त्रेण घोरास्त्रेणाभिमन्त्र्य च ॥४६॥
आत्मानं शिववद्ध्यात्वा शस्त्रं चैवास्त्ररूपिणम् ।
आचार्यः प्रथमं हन्याच्छिवास्त्रं संजपंस्ततः ॥४७॥
पश्चात् सुनिपुणः २ शिल्पी कर्म ३ कुर्याद्यथोदितम् ।
पार्श्वे स्वान्तर्दिकं ४ (?) वै घटयेल्लिङ्गमादरात् ५ ॥४८॥
इन्द्रेशानशशाङ्काशा भूतिदाः पततस्तरोः ।
संछिन्ना६त्पतितं वृक्षमजातेनैव ७ भक्तिमान् ॥४९॥
रक्तकृष्णं वरं ८ सारं मध्यमं पीतरक्तकम् ९ ।
गृह्णणीयाद्दारु लिङ्गार्थं त्यजेदापाण्डरं लघु ॥५०॥
यच्छाखा वृक्षपार्श्वे १० तु तत्तथैव प्रतिष्ठयेत् ।
स्थापितं विपरीतं तु राष्ट्रविभ्रममादिशेत् ॥५१॥
वृक्षस्योर्ध्वं शिरो ज्ञेयमधोमूलं सुखावहम् ।
अधः शिरो यदा लिङ्गं तदा गोत्रक्षयो भवेत् ॥५२॥

---

१ जयक्रियः, मू. पा. । २ निपुणं, मू. पा. । ३ कर्क, ग. पा. । ४ दिदं, ग. पा. । ५ तदनुक्रमात्, क. ग. पा. । ६ संचिन्त्या, मू. अ. पा. । ७ जातेनैव च, क. पा. । मथ तेनैव, ग. पा. । ८ कृष्णांवरं, ख. पा. । ९ वतरुम्, ग. पा. १० पार्श्ववृक्षं, क. ग. पा. ।

प्रपातोऽन्य दिशोभागे वृक्षस्य न सुखावहः ।
ततो दिग्देवताशान्तिं कुर्याद्दोषविमुक्तये ॥५३॥
पाशुपतेन शास्त्रेण हुत्वा चाष्टोत्तरं शतम ।
अन्यदिक्पातदोषेण मुच्यते शान्तिमाप्नुयात् ॥५४॥
इत्थं दिक्शोधनं कृत्वा शिवं संपूज्य तर्पयेत् ।
दद्यात्पूर्णाहुतिं चापि ततः कामानवाप्नुयात् ॥५५॥
प्रमादाद्यदि वृक्षस्य छेदने रुधिरं स्रवेत् ।
पतने मध्यभङ्गः स्यात्तदा होमो विधीयते ॥५६॥
आज्याहुतिसहस्रं वै बहुरूपेण होमयेत् ।
दद्यात्पूर्णाहुतिं चापि शिवेनाशिवहारिणा ॥५७॥
जुहुयाद्दुर्निमित्ते तु घोरमन्त्रं शतं १ शुभम् ।
शिलादाने तथा पूजा दार्वादाने यथोदिता ॥५८॥
शिलाः सम्प्रत्यहं वच्मि युवादिस्त्र्यादितस्त्रिधा ।
द्विजादिवर्णभेदेन रूपभेदेन च स्थिताः ॥५९॥
द्वात्रिंशल्लक्षणा ह्यष्टादशातिदोषविवर्जिताः ।
युवती सा शिला ग्राह्या त्रिषु लिङ्गेषु नेतराः ॥६०॥
धर्मायुर्धनभूनाथप्रजाराष्ट्र३कुलस्य च ।
वृद्धिं दद्याच्छिला नूनं तरुणी लक्षणान्विता ॥६१॥
आकरौ द्वौ तु विज्ञेयौ वनोपवनसंज्ञकौ ।
त्रयोऽङ्कुरा दिशस्तिस्रो गन्धास्वादौ४चतुर्विधा ॥६२॥

---

१ च घोरमन्त्रेण तं, मू.अ.क.ख.ग.ङ, पा. । २ ज्येष्ठा, ख.पा.
३ प्रजानां स्व, ख.पा. । ४ गन्धस्वादौ, मू.पा. ।

:ख नव त्रय १ शब्दाश्चतस्रो जातयस्तथा।
ता:०० मेकमित्येवं द्वात्रिंशल्लक्षणानि तु ॥६३॥
विस्तीर्णा महती स्थूला समा दीर्घैकवर्णिनी।
स्निग्धानिम्ना शिला धन्या सिक्ता पुण्यनदीजलैः ॥६४॥
कुलाद्रिजा च भूगुप्ता भशं गम्भीरशब्दकृत्।
सुगन्धी निविडाङ्गी च द्रुमच्छायास्थिता सदा ॥६५॥
अरोगा गर्भहीना च रेखा कीलकवर्जिता।
दृढा मनोरमा गुर्वी मधुरध्वनिभूषिता ॥६६॥
गुडाभ राध्र नस्वानामास्वादेन द्विजादितः।
न गाः जा यगोत्र र्वी मूत्रगन्धाः शुभाःशिलाः ॥६७॥
मेघवीणारवा घण्टाशङ्खशब्दाः शिला वराः।
शान्ति जयं धन चायुश्चातुर्वर्ण्ये प्रयच्छति ॥६८॥
पुण्यतीर्थाश्रिता साध्वी मुनिषेव्या २ सुशीतला।
सुतेजा रूपसपन्ना धनदेशेन्द्र४दिक् स्थिता ॥६९॥
पाण्डरा जोपमा श्वेता कुमुदाभा शिला द्विजा
नक्षत्रं च मृगं तस्यास्तद्देवः शशलाञ्छनः ॥७०॥
कुलत्थाभारुणाश्यामा ह्युत्पला ५ भा च सा नृपा।
अस्या ऋक्षं भवेज्ज्येष्ठा देवता च शतक्रतु ॥७१॥
हरित्पीता कपोताभा गुडाभा कपिला च विट्।

नव.स्त्रय', मू. अ.पा.। नवाध्वय', क. ख. पा.।
२ गोचर्वी, मू.अ.घ.पा.। ३ सेव्या, क.ख.ग.घ.पा.। ४ शेन्द्र, ख पा.। ५ या स्याद्धुत्पला, .अ.क.ख.पा.। मू

नक्षत्रं फल्गुनी चास्या देवश्च १ भगसंज्ञकः ॥ ७२ ॥
माषपारावताभा या कृष्णा शूद्रेति सा स्मृता ।
नक्षत्रमश्विनी २ चास्या देवौ चैवाश्विनौ ३ मतौ४ ॥ ७३ ॥
घना च सुस्वना५ स्निग्धा विशाला बहलच्छविः ।
शीतला च सुखस्पर्शा निबिडाङ्गी मनोरमा ॥ ७४ ॥
कदलीदलतुल्या स्त्रीशिला स्त्रीणां सुखार्थदा ।
एकवर्णः स्थिरः स्निग्धो गजकण्ठो ६ घमस्वनः ॥ ७५ ॥
बहलो वृत्तदीर्घश्च वटपत्रनिभच्छविः ।
पाषाणोऽयं गुरु पुमान् पुरुषाणांविभूतिदः ॥ ७६ ॥
नपुंसकं द्विरूपं स्यान्नपुंसकविवृद्धिकृत् ।
स्त्रिया स्त्रीप्रतिमा कार्या षण्ढं षण्ढेन ना नृभिः ॥ ७७ ॥
भग्नकांस्यस्वरं रूक्ष गैरिकाखटिकोपमम् ।
शिराढ्यं कर्कशं त्वर्जु७ इदमश्म नपुंसकम् ॥ ७८ ॥
पुंलिङ्गलक्षणोपेतःपाषाणःशिवकर्मसु ।
शैवाणां स्त्रीशिलाः प्रोक्ताः पीठिकाद्याश्च ८ शूलिनः ॥ ७९ ॥
कृष्णे सिताङ्कुराः श्रीशाः पीताश्मनि च लोहिताः ।
सर्ववर्णात्मके श्वेताःशेषाश्च शुभदाः ९ स्मृताः ॥ ८० ॥
श्वेता. पद्मोपमा रेखा द्विजातीनां विवृद्धिदाः १०

---

१ देवता मू.पा. । २ मश्विनी, मू.अ.पा. । ३ द्वौ चाश्विनौ, घ.पा. । ४ स्मृतौ, मू.पा. । ५ सुस्वरा, मू.अ.क.पा. । ६ घण्टो, ख पा. । ७ वर्ज, क.पा. । वक्ष्य, ख.पा. । त्वज्जा, ग.पा. । ८ याश्च, ग.पा. । ९ स्त्वशुभदा, म.अ.क.ख.ग.ङ.पा. । १० द्विकृत,मू.पा.

रक्ता पीता च भूपस्य विशः श्यामकुलत्थभाः ॥८१॥
शूद्राणां हरिताःकृष्णाः स्ववर्णा१दधिकाश्च याः ।
इन्द्रचापोपमारेखाः सर्वाश्रीवसुभूतिदाः ॥८२॥
हीनरेखोत्तमा हीना हीनरेखोत्तमा शुभा ।
लक्षणाढ्यालपदोषा या ग्राह्या सा होमशोधिता२ ॥८३॥
हृन्मन्त्रेणाङ्कयेद्दिक्षु सद्योमन्त्रेण चोद्धरेत् ।
इन्द्रेशानेन्दुकाष्ठासु तस्या मस्तकमिष्यते ॥८४॥
तदूर्ध्वाधो यथालक्ष्यं पृष्ठं वक्त्रं च लक्षयेत् ।
त्रिविधेष्वपि लिङ्गेषु शिलायां नापरो विधिः ॥८५॥
दिगादिजातिपर्यन्तं द्वात्रिंशल्लक्षणाः शिलाः ।
दोषान् वृद्धादिकान ब्रूमश्चाष्टाशीतिप्रभेदतः ॥८६॥
वृद्धबालकबिम्बानि छिद्रकीलकसन्धयः ।
शुषिरं स्फोटकं३ व्योमं गारा४पटलजालकम् ॥८७॥
द्वादशैते महादोषाः सर्वस्थानेषु वर्जिताः ।
लक्षणं कथयाम्येषां संक्षेपेण प्रभेदतः ॥८८॥
या सर्पभेकमीनाङ्कै५श्चित्रिता चातिकर्कशा ।
निष्ठुरा चातिरूक्षा च वृद्धा कार्यविनाशिनी ॥८९॥
तन्वी मृद्वी च बाला स्यादीषद्दग्धेष्टकोपमा ।
टङ्कघातासहिष्णुश्च न तां देवाय योजयेत ॥९०॥
मण्डलाज्जायते गर्भो गर्भाद्दोषोऽवगम्यते ।
तस्माद्बिम्बात्मकं चाश्म संछिन्द्याद्दारु वै तथा ॥९१॥

---

१ सुवर्ण, मू. अ. क. पा.। २ शोभिता, ख.पा.। ३ स्फाटिकं, ख. घ.पा. । ४ गला, ख.पा. । ५ मीनाङ्कै, मू.अ.ग.पा. ।

सान्द्राणि सर्वदृश्यानि दशाष्टौ मण्डलानि च।
सप्तान्यानि च चित्राणि चतुर्धा लेपनं तथा। ॥६२॥

पाण्डरं गुडखण्डाभं माञ्जिष्ठं रक्तपीतकम्।
कापिलं हरितालाभं कापोतमलिवर्णकम् ॥६३॥
कृष्णं नीलं च मध्वाभं चाषाभं २ भस्मरूपकम्।
किंशुकाभं कुसुम्भाभमतसीपुष्पसन्निभम् ॥६४॥

शुद्धाष्टादशबिम्बानि सप्तचित्राण्यथो ब्रुवे।
चम्पकाभं च नीलाभं मिश्रलोहितपीतकम् ॥६५॥

कृष्णं ३ नानाविधं चित्रं वा ४ स्पदं शिमिका ५ तथा।
रक्तं ६च पाण्डरं चैव गर्भदोषान् वदाम्यत ७ ॥६६॥

मत्स्यः पाण्डरके बिम्बे म्रियन्तेऽजाविकास्ततः।
गुडवर्णे शिलान्या स्यात्तेनावृष्टिर्भवेच्चिरम् ॥६७॥
खड्गाभे ८ स्फाटिके वापि ९ गर्भहृत्स्वामिहृच्च तत्।
मञ्जिष्ठाभे भवेद्भेकः शस्यनाशो जलाद्भयम् ॥६८॥
लोहिते कृकलासः स्यात् सकुष्ठघनहानिकृत्।
पीते गोधा नृपं हन्याद्भवां पीडाकरी च सा ॥६९॥
आखुःकपिलके शो१०ऽथवासतस्करभीतिकृत् ११
तालाभे कर्कटःपित्तरोगदुर्भिक्षकृच्च सः ॥१००॥

---

१ मल्लिकाधौतवर्णकम, ख.घ. पा.। २ वासाभं, मू. अ. क.पा.।
३ कृत्स्नं, ख.पा.। ४ चान्यदा, मू.अ.पा.। ५ शिविका,मू.पा.।
६ रूक्षं,ख.पा.। ७ स्यहम्, ख.पा.। ८ खण्डाभे,मू.पा.। ९ वायो,
घ.पा.। १०सो ऽथ, घ.पा.। भीतिदः, घ.पा.।

भृङ्गाभे च विषं तच्च विषकोऽपि न वृश्चिकत् ।
ज्येष्ठा कपोतकण्ठाभे व्याधिदारिद्र्यभीतिदा ॥१०१॥
कृष्णेऽहिः स प्रजा हन्ति कर्तुश्च कुलनाशकृत१ ।
नीलके मक्षिका सा च हन्याद्भार्यां सपुत्रकाम२ ॥१०२॥
खद्योतः क्षौद्रवर्णे स्यात् स दारिद्र्याग्निभीतिदः ।
नृपक्षी चापवर्णे स्यात्तेन कर्तुःप्रजाक्षयः ॥१०३॥
भस्माभे वालुकाखं वा नैःस्वं चौरभयं ततः ।
किंशुके शक्रगोपः स्यात्तेन राज्ञो धनक्षयः ॥१०४॥
शतपादी कुसुम्भाभे भवेत्तेनामयो महान् ।
अतसीपुष्पसंकाशे गर्भे विद्यात् पिपीलिका ॥१०५॥
तया चिन्ता भय शोकः शत्रुवृद्धिश्च जायते ।
इत्यष्टादश बिम्बानि कथितान्यत्र सख्यया ॥१०६॥
गुडवर्णात्मके बिम्बे चित्रिते चम्पकाभया ।
भवेयुः क्रमयो गर्भे नाशो देहार्थयोस्ततः ॥१०७॥
नीलचित्रे भवेत्काको गृध्रो ३ वाथ कपोतकः ।
तेन राजा च मन्त्री च कारको म्रियते क्रमात् ॥१०८॥
मध्वाभे शवले चित्री तया शस्यधनक्षयः ।
रक्तचित्रे च शृङ्गी स्यात्तया शोकभयं मुहुः ४ ॥१०९॥
पीतचित्रे पतङ्गः स्यात् स वै ५ स्वस्थानहानिदः ।
कृष्णचित्रे च गोनाशः सोऽनेकव्याधिकारक ॥११०॥

---

१ नाशनः, मू. अ. क. ग. ङ. पा. । २ सपुत्रिकाम् . ख. पा.
३ मृगो, क. पा. ।
४ शोककरं बहु, घ. पा. । ५ सर्व, घ. पा. ।

वृश्चिको बहुचित्रे स्याच्छूल१रुग्विषभीतिदः।
सप्तैतानि तु चित्राणि ज्ञेयानि बाह्यलक्षणैः ॥ १११॥
बाह्याद्यनु२परलब्धिर्नो तदा भ्रान्तः प्रलेपयेत् ।
चतुर्विकारभेदेन गर्भं विद्यात्प्रलेपतः ॥११२॥
ब्रम्हाणं करवीरं च ऋद्धिवृद्धिसमन्वितम ।
सौराष्ट्री तालसंयुक्तं ३ सौवीरेण ४ च पेषयेत् ५ ॥११३॥
तेन लिप्ताःस्थिता६रात्रौ वाष्पस्वेदादिसंयुताः ।
भृङ्गाही कृष्णमत्स्यं वा ज्ञात्वा ता दोषदास्त्यजेत् ॥११४॥
त्रिफलाश्वघ्नमांसी च मेघकुष्ठ७समन्विताः ।
पिष्ट्वैवं समभागं तु नारीक्षीरेण लेपयेत् ॥११५॥
लेपाच्छिमिशिमां ज्ञात्वा ८ गर्भं विद्यान्महाविषम् ।
तेन कर्तुर्भवेन्मृत्युस्तस्मात्तां सलिले क्षिपेत् ॥११६॥
क्षीरपिष्टैः प्रलिप्याश्म कारीषविषगैरिकैः ।
अहोरात्रोषिते रक्तं त्याज्यमूर्मान्वितं च यत् ६ ॥११७॥
पिशाचाश्वघ्नवज्राणि अभया वैष्णवाङ्किताः ।
तीक्ष्णं रुद्रजटायुक्तमविक्षीरैः प्रपेष्य च ॥११८॥
लिप्ता शिलोषिता पश्चात्पाण्डरादि प्रदर्शयेत् ।
द्वयोर्द्विरूपकं गर्भं ज्ञात्वा प्राग्दोषदांस्त्यजेत् ॥११६॥

---

१ स्याद्गल, ग.पा. । सच्छूल, घ.पा. । २ द्यनुप, मू.पा. । द्यस्त्युप, ग.पा. । ३ कलसंयुक्तैः, ख.पा. । ४ सौरीरेण, मू.अ.पा. । ५ पाचयेत्, घ.पा. । ६ सिता, मू. पा. । ७ मुस्त. क.पा. । ८ शिलां ज्ञात्वा, मू. पा । च्छिमां जप्त्वा, ख. पा. । ६ द्र्मान्वितं यतः, ख. पा. ।

छिद्रं चोभयतश्छिद्रं १ रन्ध्राकारं बहिर्गतम् ।
कर्तुस्तत्कुलहन्नूनं गुरोर्दद्यात्क्षयामयम् ॥१२०॥
कीलकं कीलकाकारं कारोः कर्तुश्च नाशकृत् ।
टङ्काघाताद्विदारकारी सन्धिः कर्तृविनाशकः ३ ॥१२१॥
शुषिरं शुषिराकारं कर्तुस्तद्वंशनाशकम् ४ ।
स्फोटं ५ स्फुटितकं विद्याच्छस्त्रघातान्तदायकम् ॥१२२॥
सूक्ष्मगर्भैं ६ रसङ्ख्यातैः परितःपरिवेष्टितः ।
व्योमाकारो भवेद्व्योम सोऽचिरात्कर्तृनाशकः ॥१२३॥
(७स्फटिकाभा भवेद्गारा ८ टङ्कभङ्गकरी च सा ।
तया कर्तृप्रजानाशः शीघ्रमेव न संशयः ॥१२४॥)
भूर्जत्वगुपमो ऽ ंशमा ९ यःपटलीति स कीर्तितः ।
तेन कुर्वन्न लिङ्गानि कृते च द्वौ विनश्यतः ॥१२५॥
जाळकं पट्प्रकारं स्यान्मधुकोषपुटोपमम् ।
पीतं सितं तथा कृष्णं रक्तं नीलं च मिश्रकम् ॥१२६॥
नाशनो वन्धदश्चैव भार्यापुत्रार्थहृत्क्रमात् ।
नवत्यर्धं महादोषा भेदभिन्ना इति स्मृताः ॥१२७॥
मध्यदोषान् प्रवक्ष्यामि नाम्ना षोडशधा स्थितान् ।

---

१ श्छिद्रैः, घ. पा. । २ ताद्भया, ख. पा. । ताभिदा, मू. पा. । ३ कर्तुर्विनाशकृत्, मू. अ. पा. । ४ कृत् मू. पा. । ५ स्फाटं, घ. पा. ।
६ गर्तें, मू. पा. । ७ चापान्तर्गतो ऽयं पाठो मूलपुस्तके नास्ति । ८ द्वारा, क. ख. पा. । ९ मोष्मा, मू. अ. ग. पा. ।

ब्रह्मोपेन्द्रविभागस्थांस्त्रिधा लिङ्गेष्वदोषदान् १ ॥१२८॥
रुद्रभागाश्रितान् दुष्टांस्त्यजेत्तानशुभप्रदान् ।
शिराग्रन्थितुषारैश्च विमलं दद्रु बिन्दुभिः ॥१२९॥
छिन्नरेखा कुरेखा च मूषिकावर्तहीरकौ४ ।
बिडालाश्वोष्ट्रगोमायुकाकपादाङ्कितांस्त्यजेत् ॥१३०॥
या विवर्णलताकारा सा शिला बहुदोषदा ।
ग्रन्थिरूपोन्नतग्रन्थिर्जठरामयदायक, ॥१३१॥
पद्मपत्रस्थपानीयकणिकासदृशं तु यत् ।
तुषारं तद्विजानीयात्पुत्रशोकार्तिदायकम् ५ ॥१३२॥
चतुर्थं वै मलंरूपं मीनगन्धोपलक्षितम् ।
हेमघोपामयं ताम्रं तद्दुष्टं पिङ्गलामते ॥१३३॥
दुर्भिक्षाद्वृष्टिदं हैमं घोषं कर्तृविनाशकम्६ ।
जनं हन्त्यायसाक्रान्ता शिला ताम्री च७ शिल्पिनम् ॥१३४॥
मृती वृत्ता च धूम्राभा दद्रुः स्याददतिरोगदा ।
कृष्णः पीतो ऽरुणो बिन्दुः स शोकभयरोगदः ॥१३५॥
मूर्ध्नि बिन्दौ सिते मृत्यू रक्ते पाप भवेद्ध्रुवम् ।
पीते धनक्षयः कर्तुः कृष्णे बन्धो द्वयोर्द्विधा ॥१३६॥
स्थूलातिदुर्बला रूक्षा रेखाहिकुटिला च या ।
रेखा रेखानुविद्धा वा न पार्थिवं सा विनाशयेत् ॥१३७॥

---

१ लिङ्गेषु दोषदान्, सू. पा. । २ शिराशब्दो ऽयं तालव्यो दन्त्यश्चोत्यूष्मभेदे । ३ घर्ति, घ,पा. । ४ हीरकैः, क. ख. पा. । हीतकैः, घ.पा. । ५ कारकम्, ख.घ.पा. । ६ शदम, ख.ग.पा. । ७ ताम्राच, घ. पा. । ८ च, सू.अ.क.पा. ।

भार्याघ्नी छिन्नरेखा स्याद् द्वित्रिच्छिन्ना सुतार्थहृत् ।
स्वामिघ्नी च चतुश्छिन्ना बहुच्छिन्ना कुलान्तकृत् ॥१३८॥
धूम्रा नीलासिता रेखा दुःखदुर्भिक्षरोगकृत् ।
मक्षिका मक्षिकाकारा तया कुष्ठं सुदारुणम् ॥१३९॥
आवर्त इव चावर्तो रुद्रदेशे तु[1]चेत्स्थितः[2] ।
तदा नाना गदान् कुर्यात् कर्तुश्चैव न संशयः । ॥१४०॥
नाना स्थानेषु वामाङ्ग आवर्तो यदि दृश्यते ।
त्याज्यं तदा त्रिधा लिङ्गं नृपराष्ट्रप्रजार्थिना ॥१४१॥
लक्षणस्य तु मध्यस्थ आवर्तो यदि दृश्यते [3] ।
वामपार्श्वाश्रितः किंचिद्धन्याद्राष्ट्रं सराजकम् ॥१४२॥
रक्ताङ्गी पीतहीरा [4] या सा दुर्भिक्षगदप्रदा [5] ।
सर्ववर्णा भृशं [6] नूनं प्राणहृत्कृष्णहीरिका ॥१४३॥
चतुर्भिः सन्धिभि[7]र्युक्ता [8] नखैः पञ्चभिरन्नतः ।
उन्नतो लक्ष्यते यश्च [9] विडालाङ्घ्रिः स दोषभाक् [10] ॥१४४॥
हयोष्ट्रजम्बुकध्वाङ्क्षपदकाक्रान्तपङ्कवत् ।
शिलाया रूपमालक्ष्य त्यजेत्तामशुभप्रदाम् ॥१४५॥
मध्यदोषास्त्रयोविंशद्धेदैरुक्ता इमे मया ।
स्वल्पदोषान् प्रक्ष्यामि यथा शास्त्रेषु भाषितान् ॥१४६॥
त्याज्या शिलान्यसंश्लिष्टा श्लिष्टा या पादपाङ्घ्रिणा ।
वल्मीकोपरचित्युत्था कोष्णा क्षाराम्बुमध्यगा ॥१४७॥

---

१ रंध्रेषु,ख पा. । २ चोत्थितः, मू.अ. पा. । ३ जायते,ख. घ. पा. । ४ हीना;घ. पा. । ५ भयप्रदा,घ. पा. । ६ दृश, ख. घ. पा. । ७ पञ्चभि,मू. पा । ८ मुक्ता,घ.पा । ९ यत्र,मू. पा. । १० कृत्, ख पा ।

१पुण्यक्षेत्रसंजाता भिल्लादिजनसेविता ।
कुदिक्स्था सूर्यसन्तप्ता कटुस्थाऽपि यदूषिता ॥ ४८॥
दुर्गन्धा कुरसा चैव तथा वज्राग्निदूषिता ।
दुष्टजीवस्वरा या च योजिता चान्यकर्मणि ॥ ४९॥
चाण्डाली चान्त्यजा चैव आसां लक्षणमुच्यते ।
या योपलानुलग्ना सा स्नेहविच्छित्तिकारिका ॥ ५०॥
अध्वदा नरमूलस्था वल्मीकस्था रणप्रदा ।
ऊषरस्थार्थहृज्ज्ञेया चितिस्था दुःखदायिनी ॥ ५१ ॥
कोणा चिद्रेपकृत्क्षारः वारिस्था दुर्भगत्वदा४ ।
पापदापुण्यदेशस्था वधकृद्भिल्लसेविता ॥ ५२ ॥
हुताशयमरक्षोऽम्बुमरुद्दिक्स्था यथाक्रमम् ।
दाहं हानिं च शोकं च नैःस्वं रोगं तथावहेत् ॥ ५३॥
तेजोहृत्सूर्यतप्ता स्यादपुत्राधर्मकृत्सदा६ ।
सुराण्डक्षिवसागन्धा उद्वेगजननी शिला ॥ ५४ ॥
लवणा कटुका या च सा क्षुधातृप्तिकारिणी ।
वज्रदग्धाग्निदग्धा च राज्ञोऽनलभयप्रदा ॥ ५५॥
भिन्नभाण्डोष्ट्र७काककङ्कपादातिरोगदा
अन्यकर्मार्थमानीतोन्मादानिष्पत्तिकारिणी ॥ ५६॥
निस्तेजा बहुवर्णा या लघुरव्यक्तवर्णिनी ।

---

१ भूषिता, क. ग. पा. । २ कारणम्, मू. अ.पा. । ३ चोर क. ग. पा. । ४. दुर्भगं ददा, क. ग. पा. । ५. लिङ्ग. ख. पा. । पुत्राद्भूताहरसदा, घ. पा. । ७ शाण्डज, क. पा ८ वाचाङ्ग, मू. पा. । ९. कट्वणा, ख. पा. । १०. वर्ण ग. पा. ।

अन्त्यजा सा शिला ज्ञेया द्विजादीनां विगर्हिता[1] ॥१५७॥
धूम्रा नीला च रूक्षा या स्थूलरोमा मनोरमा।
नान वर्णा च चाण्डाली सा कर्तु[3] कुलनाशिनी ॥१५८॥
लघुदोष विना ग्राह्या मन्त्रसंस्कारसंस्कृता।
प्राकृतानां हि ग्राह्य कामं मुक्त्यर्थिनां नृणाम् ॥१५९॥
अन्त्यजा ह्यन्त्यजानां तु चाण्डालानां हितावहा[4]।
स्वरूपतो इमे ख्याता विंशतिर्लक्षभेदतः ॥१६०॥
वर्णतो नागो रेखा लाञ्छनानि च मण्डलम्।
([5]अन्य भूमभूतस्य पाषाणस्य द्रुमस्य च ॥१६१॥
अन्य वर्णा शिला या स्यादन्यवर्णस्य कल्प्यते।)
मज्ज तीरेन मन्त्रेण तज्जातिजननं भवेत् ॥१६२॥
यथाभिमतमानेन लिङ्गाद्यर्थं शिलां द्रुमम्।
लक्ष्य यत्वा यथान्यायं कर्तयेच्छोधयेदपि ॥१६३॥
यद्वर्णं तन्मयं लिङ्गं तन्मयं पीठमिष्यते।
पिण्डिकासहितं तच्च विष्णुभागान्तमुन्नतम् ॥१६४॥
लिङ्गायामेन विस्तीर्णं वर्तुलाभि[6] रलङ्कृतम्।
एक ब्राडेन कर्तव्या पिण्डिका वै शिवस्य तु ॥१६५॥

---

१. तु गर्हिता, घ. पा.। २. पूज्या, ख. पा.। ३. सान, ख. पा.। ४. स्वका, मू. अ. घ. पा.। ५. चापान्तर्गतोऽयं पाठः क. ख. ग. पुस्तकेषु नास्ति। ६. वर्तनाभि, मू. अ. क. ङ. पा.।

ब्रम्हपीठं बहुदलं१ कार्यमेकदलं तथा ।
प्रणालमैन्द्रसौम्ये वा जलाधारमधस्तथा ॥१६६॥
लाञ्छयित्वा शिलामादौ पिण्डिकार्थं समाहरेत् ।
अन्यक्षेत्रादपि ग्राह्या पिण्डिका लिङ्गवर्णिका ।
न तु ब्रम्हशिला प्राज्ञैरिति शास्त्रेषु२ भाषितम् ॥१६७॥
लिङ्गमूलावशिष्टा तु ग्राह्या ब्रम्हशिला शुभा ।
लिङ्गच्छेदोर्ध्वभागस्था तथाधो३भागगापि वा ॥१६८॥
लिङ्गस्य सा त्रिभागेन चतुर्थांशेन वा भवेत् ।
उच्छ्रायेन तु लिङ्गानामेकखण्डो विधीयते ॥१६९॥
हस्तमात्रस्य लिङ्गस्य निःसारा त्र्यङ्गुलाधिका ।
अन्येषामपि लिङ्गानां क्रमेणैका४ङ्गुलाधिका ॥१७०॥
यद्वा कर्गायतं सूत्रं ब्रम्हभा[illegible]स्य मध्यतः ।
तच्चतुर्थेन भागेन लिङ्गविस्ततोऽधिका
अथवा सा रसांशेन ब्रम्हांशो ऽधिकविस्तरा ।
(६स्वमानान्मेखला तस्याः खातं वा तत्प्रमाणतः ॥१७२
पदभागोऽपि तुल्यश्च स्वतलश्च प्रशस्यते ।
ब्रह्मांशा७दधिकः खातो यवैः षड्भिः प्रविस्तरः ॥१७३॥
ज्येष्ठोऽर्धार्धयवैर्न्यूनास्तदन्येषां क्रमेण तु ।
रत्नाधाराणि तन्मध्ये वृत्तानि नव८कल्पयेत् ॥१७४॥

---

१. च सदलं, क. ग. पा. । २. तन्त्रेषु, क.ग.पा. । ३. तदधो, मू. अ. क पा. । ४ णै १, ध. पा. । ५ च सांशेन ब्रह्मणो, मू. अ. क. ग. पा. । ६. चापान्तर्गतोऽयं पाठः क. ग. पुस्तकयोर्नास्ति । ७ ब्रह्माङ्गा, घ.पा । ८ न च. मू. पा. ।

कार्या कूर्मशिला चापि[1] शुद्धा ब्रह्मशिलापि वा[2] ।)
स्वमानविस्तरार्धेन बाहुल्येन समन्विता ॥१७५॥
अपि मानाधिका कार्या न मानाद्ध्रासयेद्बुधः ।
वार्क्षी ब्रह्मशिला वार्क्षे लिङ्गे स्यात्पिण्डिका तथा ॥१७६॥
चतुरस्रां शिलां कृत्वा चन्दनेन विलिप्य च ।
अर्चयेदस्त्र[3] पुष्पाद्यैरानेतुं मन्त्रवित्तमः ॥१७७॥
पूजयेत्तत्र शिवं साङ्गं तर्पयेच्च प्रयत्नतः ।
तापसाञ्छिवभक्तांश्च तर्पयित्वानयेद्रथम ॥१७८॥
तं रथं महिषाञ्ज्येष्ठान् योजयित्वा च देशिकः ।
रथे कृत्वा च देवेशं पूजयित्वा तमानयेत् ॥१७९॥
शान्तिर्दिनेदिने कार्या यावत्प्राप्तं गृहं भवेत् ।
यदा रथे रथाङ्गानां[4] प्रमादात्स्खलितं भवेत् ॥१८०॥
शिवाग्निं जनयित्वा तु तर्पयेद्बहुरूपिणम् ।
शतमष्टोत्तरं हुत्वा मुच्यते सर्वदुष्कृतैः ॥१८१॥
शिवं ध्यात्वा स्मरेदस्त्रमर्घं लिङ्गे समुत्क्षिपेत्।
रथं मार्गगतं कृत्वा शनैः स्वपुरमानयेत् ॥१८२॥
समीपं यजमानस्तु प्रत्युद्गम्य[5] समर्चयेत् ।
शोभां ध्वजपताकाद्यैः स्त्रीभिर्मङ्गलगीतकैः ॥१८३॥
कारयित्वा द्विजान् स्वस्तिवाचयित्वा तमानयेत् ।

---

१. चापि, मू. पा. । २. धिका, घ. पा. । ३. च्छत्र, घ. पा. ।
४. रथरथाङ्गानां, मू. पा. । ५. प्रत्यङ्गस्य, क. ख. पा. ।

प्रासादस्योत्तरे पार्श्वे कर्मकुटीं निवेदयेत् ॥१८४॥
प्रासादोत्तरदिग्भागे कन्यसादिविभागतः ।
पञ्चसप्तैकादशभिः करैः कर्मकुटी मता ॥१८५॥
अन्यदिक्संस्थिता भद्रा गृहीता विधिना शिला ।
प्रासादोत्तरदिग्गर्ते क्षिप्त्वा तां पूरयेन्मृदा ॥१८६॥
तस्योपरि शिवं चेष्ट्वा वारुण्यां दिशि संस्थितः ।
तर्पयेदस्त्रराजं च महापाशुपतं च यत् ॥१८७॥
शतमष्टोत्तरं हुत्वा दद्यात्पूर्णाहुतिं पुनः ।
एवं सन्तर्पिते ह्यस्त्रे[1] दिग्दोषैर्मुच्यते शिला ॥१८८॥
आकृष्टस्यापि यस्यार्थं ज्ञायते न शिरोमुखम् ।
तस्य लिङ्गस्य सद्विप्रः कन्या शिल्पी च पूजिता ॥१८९॥
एकोऽपि यद्विशेश्दङ्गं स्पृष्ट्वा तच्च शिरोमुखम् ।
ध्रुवं कर्तव्यमित्याह भगवान् परमेश्वरः ॥१९०॥
अन्यकर्मोपयुक्ता च संस्कृता येन केनचित् ।
शिलां तां वर्जयेद्यत्नान्नशस्ता लिङ्गकर्मणि ॥१९१॥
पिण्डिकादिदलं सर्वं वृषभं च यथाविधि ।
एवं दारुमयं चापि[4] लिङ्गादिद्रव्यमाहरेत् ॥१९२॥
लक्षणाढ्याल्पदोषायाः संस्कारे कथ्यते विधिः ।
प्रागुत्तरेशकाष्ठासु शिलां न्यस्य कचिन्मते ॥१९३॥

---

१ ज्येष्ठे, क. ग. पा. । २ आकृष्णां, मू. अ. पा. । आकृष्ट, क. ग. पा. । ३ यद्दिशो, मू. पा. । ४ चापि, मू. अ. क. ख. पा. ।

घोरमन्त्रशतं[1] हुत्वा षडङ्गान्तं यजेद्धरम् ।
अथवा मृत्युजेतारं विद्याङ्गैः[2] षड्भिरन्वितम् ॥१६४॥
इत्थं मुञ्चन्त्यमी दोषाः शिरोवक्त्रादिमौढ्यजाः ।
इत्यनेन विधानेन गृहीत्वा दारु चाश्मम्[3] वा ॥१६५॥
शोभने दिवसे सम्यङ् मङ्गले सकले कृते ।
लिङ्गं गुर्वाज्ञया कुर्यात्त्रिधा मानोपलक्षितम् ॥१६६॥
इति लक्षणसमुच्चये दारुशिलाग्रहणं नाम तृतीयो विधिः ॥

अथ चतुर्थः

लिङ्गमानं प्रवक्ष्यामि चतुर्भेदात्मकं भवेत् ।
चतुरङ्गुल[4]मानेन द्वारगर्भकरैः स्थितम् ॥१॥
भानूस्त्रैर्जालगैरष्टरेणुभिः[5] स्यादणुर्भृशम् ।
केशाग्रलिक्षायूकाभ्यां[6] क्रमादष्टाष्टभिर्यवः ॥२॥
तुषहीनैर्यवैः श्रेष्ठैर्मृदि सिक्थेऽथवा स्थितैः ।

---

१ मन्त्रेण तं, मू. अ. ख. ङ पा. । २ विद्याहृवैः, ग. पा. । ३ रश्म, क ख. पा. । ४ चलमङ्गुल, मू. अ ख. ग. घ. ङ. पा. । ५ भानूले जालगेऽष्टाभी, मू. अ. क. ख. पा. । ६ यूकानां, मू. पा. ।

तियक् समोदरैः प्रोक्तं मानार्थं पारमेश्वरे ॥३॥
यवं रर्गवित्संख्यैर्ज्येष्ठादि त्र्यङ्गुलं भवेत् ।
कलागोलकनेत्राङ्क्माचाभिर्ज्यङ्गुलं स्मृतम् ॥४॥
चतुरङ्गुलकं धर्मः शतयाख्यं च षडङ्गुलम् ।
अधहस्तं वितस्ति च तालं च द्वादशाङ्गुलम् ॥५॥
द्वितालकं करं विद्यात्करेण स्वेच्छया क्रिया ।
लिङ्गधामासनादीनां सर्वकर्मविधौ मता ॥६॥
अङ्गुलाद्गृहलिङ्गं स्याद्यावत् पञ्चदशाङ्गुलम् ।
द्वारमानात्त्रिसङ्ख्याकं नवधा गर्भमानतः ॥७॥
नवधा करमानेन लिङ्गं धामिन प्रपूजयेत् ।
एवं लिङ्गानि षट्त्रिंशज्ज्ञेयानि ज्येष्ठमानतः ॥८॥
मध्यमानेन षट्त्रिंशत् षट्त्रिंशदधमेन च ।
एवमेकत्र लिङ्गानां शतमष्टोत्तरं भवेत् ॥९॥
एषां प्रमाणभेदेन सामान्येन निरूपणाम् ।
यानि यानि च नामानि तानि तानि पृथग्ब्रुवे ॥१०॥
भूम्यम्बुवह्न्यानिलाकाशं दिगम्बरसरूपकम्[३] ।
स्पर्शशब्देश्वरो नासा जिह्वाक्षित्वक्श्रुतीश्वराः ॥११॥
उत्तमाङ्गुल[४]लिङ्गानां विद्यात्पञ्चदशैव तु ।
वचनग्रहणोत्सर्गानन्दप्रगमनेश्वराः ॥१२॥
वाक्पाणिपायुगुह्याङ्घ्रिमनोऽध्यहङ्कृतीश्वरान् ।

१, नेत्राह्व, घ. पा. । २ भवेत्, ख. पा । ३ स्वरूपकम्, क. पा. । वै गन्धरसपूरकम् ग. पा. । ४ङ्गुलि, लिपु.. . पा. ।

प्रकृतीशः पुमांश्चैव मध्यानां दश पञ्च च ॥१३॥
ईश्वरोऽनन्तरुद्रौ च श्रीकण्ठस्त्रिशिखस्त्रिदृक् ।
विद्येश्वरः पतिः स्रष्टा गरुत्मान सकलोऽकलः ॥१४॥
मायायोगेश्वरौ शर्वौ[1] दशपञ्चाधमेषु तु ।
अनन्तश्चाजो[2] महातेजा द्वारमानादुत्तमं त्रयम् ॥१५॥
सुधामा त्र्यम्बकः[3] शुद्धो मध्यमं द्वारतस्त्रिकम् ।
स्कन्दः सूक्ष्मोऽ[4] म्बिकानाथस्त्रयं द्वारात्तथाधमम् ॥१६॥
चण्डेशोऽ[5] थ कपालीशः खड्गी पाशी ध्वजी गदी ।
भुजङ्गी वृषभी सिंही उत्तमा नव गर्भजाः ॥१७॥
([6]वली शक्ती हरी रणी श्मशानी भैरवी तथा ।
पिङ्गी क्रोधी च मायी च मध्यमा नव गर्भजाः ॥१८॥)
उग्रश्चाग्रः पिनाकी च चक्री नादी महाव्रती ।
व्यापी शूली विशाली[7] चेत्यधमा नव गर्भजाः[8] ॥१९॥
अव्यक्तः पुंश्चलीशश्च नियामकोऽथ कालजित् ।
सर्वज्ञोऽथ वृषध्वजो नियामः पापहा[9] ध्रुवः ॥२०॥
हस्तेषूत्तममानेन नवलिङ्गेषु देवताः ।
शम्भुः स्थाणुर्हरो डिण्डी हर्ता कर्ता शिवोऽव्ययः ॥२१॥

---

१ सर्वा, लि. पु. पा. । २ 'तेजो, मू. पा. । श्चादौ, ख. पा. । ३ सुधा मात्रा स्वकः, मू. पा. । ४ स्कन्धः सूर्यो, मू. पा. । ५ चण्डीशो, मू. ग. पा. । ६ चापचि-न्तान्तर्गतोऽयं श्लोकः मूलपुस्तके नास्ति । ७ किराती, ग. पा. । ८ गर्भिकाः, घ. पा. । ९ नियामः पाशहा, घ. पा. ।

नवमश्च सुरेशाख्यो मध्यमा हस्तमानतः ।
भद्रोऽथ विमलो ज्येष्ठो गाण्डीवः पुष्टिवर्धनः ॥२२॥
स्वयंभूर्भुवनेशश्च श्रेष्ठः पालयिता तथा ।
नवैते हस्तमानेन त्वधमाः परिकीर्तिताः ॥२३॥
एकाङ्गुलादिपञ्चान्तमधमं१ चलमुच्यते ।
षडादिदशपर्यन्तं चललिङ्गं च मध्यमम् ॥२४॥
एकादशाङ्गुलादि स्यात् क्रमात्पञ्चदशान्तिकम् ।
श्रेष्ठलिङ्गप्रमाणं तज्ज्येष्ठाद्यङ्गुलिलक्षितम् ॥२५॥
षडङ्गुलं महारत्नैरन्यरत्नैर्नवाङ्गलम् ।
रविभिर्हेमतारोत्थं लिङ्गं शेषैर्स्त्रिपञ्चभिः ॥२६॥
इच्छासिद्धिः सुतो धर्मः सौभाग्यं च रिपुक्षयः ।
आरोग्यं राज्यसौख्यं च नृपश्रीजयलोककृत् ॥२७॥
धैर्यं तु स्त्रीधनायुश्च लिङ्गादेकाङ्गुलादितः ।
चललिङ्गाद्भवेत्कार्यं साधकानां क्वचिन्मते३ ॥२८॥
षोडशांशश्च वेदास्त्रे युगं लुप्त्वोर्ध्वदेशतः ।
द्वात्रिंशत्षोडशांशाश्च कोणयोस्तु विलोपयेत् ॥२९॥
चतुर्द्विवेशनात्कण्ठो विंशति त्रियुगैस्तथा ।
पार्श्वाभ्यां तु विलुप्ताभ्यां चललिङ्गं भवेद्वरम्४ ॥३०
धाम्नो युगर्तुनागांशैर्द्वारं हीनादितः क्रमात ।

१. न्तं कन्यसं, घ. पा. । २. शेषैरन्यै, मू. अ. का. पा. ।
३. त्समा, ख. पा. । ४. द्ध्रुवम्, मू. अ. पा. ।

लिङ्गं द्वारोच्छ्रयादर्धाद्भवेत्पादोनतः शतात्१ ॥३१॥
गर्भार्धेनाधमं लिङ्गं भूतांशैः स्यात्त्रिभिर्वरम् ।
तयोर्मध्ये च सूत्राणि सप्त संपादयेत्समम् ॥३२॥
एवं स्युर्नवसूत्राणि भूतसूत्रैस्तु मध्यमम् ।
व्यन्तरे रामरामं च लिङ्गानां दीर्घता नव ॥३३॥
हस्ताद्विवृध्य हस्तो यावत्स्युर्नवपाणयः ।
कनिष्ठमध्योत्तम लिङ्गं त्रिविधं२ त्रिविधात्मकम् ॥३४॥
एकैकलिङ्गमध्ये च त्रीणि त्रीणि च३ पादशः ।
लिङ्गानि कल्पयेद्धीमान् षट्सु वाष्टान्तरेषु वा ॥३५॥
स्थिरदीर्घप्रमैषा४ तु द्वारगर्भकरात्मिका ।
तदेकं स्थापयेल्लिङ्गं हस्तात्पादजमव वा ॥३६॥
शान्तिर्जीवितमानं च द्वारमानात्क्रमतः फलम् ।
गर्भायशोऽर्थपुत्रस्त्रीभूर्जयोऽर्थौ घृतायुषी ॥३७॥
मुक्तिः पुष्टी रिपोर्नाश आयुर्ज्ञानं यशो धनम् ।
सिद्धी राज्यं करैः कार्या लिङ्गादन्तरजात्तथा ॥३८॥
(५लिङ्गानामीप्सितं दैर्घ्यं तेन कृत्वाङ्गुलानि वै ।
ध्वजाद्या यैः स्वरैर्भूतैः शिखिभिर्वा हरेत्कृती ॥३९॥
तान्यङ्गुलानि यच्छेषं लक्षयेच्च शुभाशुभम् ।

---

१ समात, मू. अ. क. ग. ङ. पा. । २ त्रिधैव, क. ख. पा. । ३ तु सूत्राणि त्रीणि, मू, अ. क, पा. । ४ स्थिरा दैर्घ्यप्रमेया, मू. पा, । ५.ख. पुस्तके नास्त्ययं, ३९ श्लोकतः ५० श्लोकं यावत् चापचिन्हान्वर्गतः पाठः ।

ध्वजादिषु ध्वजं सिंहं वृषाख्यं च गजं शुभम् ॥४०॥
अशुभान् वर्जयेद्धीमान धूमश्व[1] खरवायसान् ।
ध्वजे राज्यं जयं सिंहे वृषे लाभं श्रियं गजे ॥४१॥
धूमे दोषाः[2] शुना मृत्युः खरेणोच्चाटनं सदा ।
ध्वाङ्क्षेण सर्वनाशः स्यात्तस्मात्तान् परिवर्जयेत् ॥४२॥
स्वरेषु षड्जगान्धारपञ्चमाः शुभदायकाः ।
लक्ष्मीप्रदो भवेत् षड्जो गान्धारो जनवृद्धिकृत् ॥४३॥
पञ्चमः श्रीप्रदो नित्यं भूमिलाभकरो नृणाम् ।
ऋषभेणारिवृद्धिः स्यान्मध्यमः सुतनाशकृत[3] ॥४४॥
धैवतेन क्षयः कर्तुर्निषादः सर्वनाशकः ।
भूतेषु क्ष्माचराश्चान्ये तोयाद्या[4]श्चाशुभा भृशम् ॥४५॥
पृथ्वी सर्वप्रदा पुंसामापो भार्याक्षयङ्कराः ।
सज्वरो[5] दाहकृत्तेजो वायुस्तु कुलनाशकृत् ॥४६॥
भ्रातृपुत्रकलत्रार्णनभो नृपतिनाशकृत् ।
शस्तोऽग्निश्चाहवनीयो द्वावग्नी चाशुभौ मतौ ॥४७॥
आद्योऽग्निः सर्वदः पुंसां द्वितीयः सुत[6]नाशकृत् ।
कर्तुर्मृत्युप्रदो ह्यग्निस्तृतीयो नृपभीतिदः ॥४८॥
आयशून्येषु हस्तेषु हस्तादेकाङ्गुलं क्षिपेत् ।
षड्वा तदायभागं तु कृत्वैकं संक्षिपेद्वरम् ॥४९॥

---

१. गजाश्व, मू. पा. । २, दाघ, घ. पा. । ३. शुभनाशनः, मू. अ. क. ग. ङ. पा. । ४. तोयाढ्या, घ. पा । ५. सद्वीरो, क. ग. पा. । ६. शुभ, मू. अ. क. पा. ।

द्विभागं मध्यमेनाह त्रीणि भागानि कन्यसे ।
भागेश चाष्टमांशं च देवेज्यं तुल्यसञ्ज्ञकम् ॥५०॥
चत्वारि लिङ्गरूपाणि विष्कम्भेन तु लक्षयेत् ।
दैर्घ्यं मायान्वितं कृत्वा लिङ्गं कुर्यात्त्रिरूपकम् ॥५१॥
चतुरश्रास्त्र[1]वृत्तं च तत्तत्त्रयगुणात्मकम् ।
उक्तायामस्य चार्धांशे[2] नागांशै[3]र्भाजिते क्रमात् ॥५२॥
रसभूताम्बु[4]षष्ठांशत्र्यंशाधिकशतैर्भवेत् ।
आयामाच्चतुरेज्याहृत[5]तुल्यानां चतुरस्रता ॥५३॥
पञ्चानां यवनानाढ्यं [6]व्यासानाहान् प्रवृद्धितः ।
त्रिधा भेदाद् बहून्यत्र वक्ष्यन्ते[7] विश्वकर्मतः ॥५४॥
[8]आद्यादीनां त्रिधा स्थौल्याद्यवृद्ध्या तदष्टधा ।
त्रिधा हस्ताजितनाढ्यं च युक्तं सर्वसमेन च ॥५५॥
पञ्चविंशतिभेदान्यनाद्ये[9] देवार्चिते तथा ।
पञ्चसप्ततिरेकत्वाज्जिनैर्भक्तं भवन्ति हि ॥५६॥
चतुर्दशसहस्राणि चतुःशतयुतानि[10] च ।
एवमङ्गुलवृद्ध्या च नवैककरगर्भतः ॥५७॥

---

१ चतुरस्रास्, मू. अ. पा. । चतुरस्राष्ट्, क. ख. पा. । २ चायांशे, मू. पा. । ३ भागार्धैः, क. ख. पा. । ४ भूतांशु, मू. पा. । ५ ज्याङ्क, मू. पा. । ६ व्यसानाहत्य, मू. पा. । ७ लक्षन्ते, क. ग. पा. । ८ लिङ्गानि न द्य, मू. पा. । ९ यश्च, मू. पा. । १० शतायुतानि. मू. अ. ग. पा. ।

तेषां कर्णार्धकोणस्थैश्छिन्द्यात्कोणानि सूत्रकैः ।
विस्तारं सप्तधा कृत्वा स्थाप्यं वा मध्यतस्त्रयम् ॥५८॥
द्विभागादूर्ध्वमष्टांशो द्व्यष्टांशैः[1] स्याच्छिवांशकः[2] ।
एकैकांशं चतुर्भागं कोणह्रासं द्विभागतः ॥५९॥
तत्तीर्यक्सूत्रसंपाताद्दृशनास्रं भवेत्पुनः ।
तदेकैकं युगं कृत्वा एकैकांशं समाहरेत् ॥६०॥
द्व्यन्तयोस्तु क्रमात्सूत्रैर्दशनास्रं पुनर्द्विधा ।
क्वचित्कर्णप्रवेशेन लाञ्छयित्वास्रिशातनम् ॥६१॥
षोडशास्रं भवेत्तद्वत्तद्वदेव द्विषोडश ।
तन्मध्ये सूत्रसभ्रान्ते रुद्रो भवति वर्तुलः ॥६२॥
शुभार्थमायैः[3] संहृत्य बाणाग्निनगभागिभिः ।
क्षिपेद्वा शून्यदोषघ्नं हस्तादेकाङ्गुलं क्रमात् ॥६३॥
षोढा ब्रह्मादिभिर्योज्या तत्त्वपक्ष[4]गुणैः क्रमात् ।
षोडशांश क्षिपेदाद्ये[5] वेदांशममरार्चिते ॥६४॥
देयं हेयं[7] च वस्वंशमाद्ये सर्वसमेन तु ।
पिङ्गलाया मते प्रोक्तमायामरार्चितेन तु[6] ॥६५॥
स्वायामाज्जिनभागास्रमङ्गुलात्कररन्ध्रतः[8] ।

---

१. सष्टांशो द्व्यष्टांशैः, मू. पा. । २. च्छिरांशकः, क. पा. ।
३. रमायैः, मू. अ. ग. पा. । ४. तनुपक्ष, क. ख. पा. ।
५. नाद्ये, ख. ग. घ. पा. । ६. समाख्यत्रिसमैः सुराः, ख. पा. ।
७. देयं, मू. अ. क. ख. ग. ङ. पा. । ८. भागाग्र, म. अ. क. ख. ग. । ङ. । पा. । ९. चक्रतः, क. । ग. । पा. ।

भवेयुर्वर्धमानानि वसुद्विषट्[1]शतानि च ॥६६॥
अथाद्यादित्रिलिङ्गानां छायादोषविमुक्तये ।
विश्वकर्ममतं[2] दृष्ट्वा दकार्यं पीठवर्तनम्[3] ॥६७॥
अधो मध्योर्ध्वदेशे च भागत्रयसमन्वितम् ।
तच्च सर्वसमं लिङ्गं प्रासादे वा गृहे हितम् ॥६८॥
एवं सर्वसमं कार्यं सर्वकामफलप्रदम् ।
द्वौ पादौ जानुपर्यन्तं चतुरस्रे पितामहः ॥६९॥
तदूर्ध्वं नाभिपर्यन्त विष्णुरष्टास्रके स्थितः ।
आमूर्ध्नं नाभितश्चोर्ध्वं वृत्तभागे हरः स्वयम् ॥७०॥
यथाव्यक्ते तथार्चायां मुखलिङ्गे स्थितः क्रमात् ।
पञ्चधाऽव्यक्तलिङ्गानि समपीठानि तानि च ॥७१॥
तुल्याख्यं समुखं[4] कुर्यादीशानं वा सुरार्चितम् ।
एवं लिङ्गानि कार्याणि दोषाय स्युरतोऽन्यथा ।
पञ्चलिङ्गव्यवस्थेयं शिरोवर्तिन्यथोच्यते[5] ॥७२॥
छत्राभं कुक्कुटाण्डाभं बालेन्दुंत्रपुषाकृतिं ।
एकैकस्य चतुर्भेदैः काम्यरूपात्फलं वदेत् ॥७३॥
वस्वंशेश्वरमेऽर्धांशैः[6] पुण्डरीकं तपक्षयात् ।
यशान्तेन भवेत्कतुर्विशालं द्विक्षयाच्छ्रिये ।
श्रीवत्सं त्रिक्षयात् प्रीत्यै[7] दिङ्मर्दनं चतुः क्षयात् । ॥७४॥

---

१. वस्त्विपट्, घ. पा. । २. मते, घ. पा. । ३. पीठवर्तने, घ. पा. । ४. सुमुखं, घ. पा. । ५. वतन्यथोच्यतेः क. ख. पा. । वर्तनमुच्यते, मू अ. पा. । ६. मेथांशैः, मू पा. । ७. प्रीतिः, घ. पा. ।

चिराज्यप्रदं ख्यातं छत्रमेशाश्चतुर्विंशाः ॥७५॥
युगांशे चष्मेऽष्टाभिर्विमलं तत्त्व१शातनात् ।
मानदं२ पक्ष३लोपाच्च विपुल ख्यातिदं भवेत् ॥७६॥
षर्धम नं त्रिन शाच्च४ ध. दं५ वेदलोपनात् ।
श्रीवत्सं पुत्रदं कर्तुर्दक्षाण्डं स्याच्चतुर्विधम् ॥७७॥
त्र्यंशात्त्राप्तैर्युगांशश्च एकहान्यामृनाहृवयम६ ।
पुष्टिदं द्विक्षयात्पूर्णं महाल्हादकरसदा७ ॥७८॥
त्र्यंशत्यागाद्बलं ख्यातं सौभाग्यं च८ युगक्षयात् ।
आयुर्दं कुमुदं ज्ञेयं चन्द्रं चतुर्विधं मतम्९ ॥७९॥
त्र्यंशरांत्रष्मे वेदैर्विजयं भवनाशनम् ।
सर्वकामप्रदं प्रोक्तं विनाशं द्विक्षयाच्छ्रिये ॥८०॥
त्रित्यागाज्जयदं भीमं चित्राकं१० वेदशातनात् ।
वल्लभत्वप्रदं तच्च चतुर्धा त्रपुषं भवेत् ॥८१॥
त्रपुषं छत्र चन्द्राभं कुक्कवाकण्डकं११ क्रमात् ।
कुर्याद्विप्रादिकार्यार्थमेकं वा कुक्कुटाण्डकम्१२ ॥८२॥
त्रपुषादिष्टसंसिद्धी राज्यं स्यादातपत्रतः ।
दीर्घायुश्छत्रमथ चेन्दोः१३ कुक्कवाकण्डतः प्रजाः ॥८३॥

---

१ तनु, क. ख. ग. घ. पा. । २ मानाङ्ग, मू. पा. । ३ पद्म, क. ख. ग. पा. । ४ त्रिभागाच्च, मू. क. ख. घ. पा । ५ पददं, क. पा. । वनदं, ग. पा. । ६ ह्वकम्, घ. पा. । ७ तथा, ख. पा. । ८ सौभाग्यदं, ख. पा. । ९ ज्ञेयं चन्द्रं चतुर्विधम्, मू. पा. । १० विदाव्हं, ख. पा. । चित्राङ्कं, क. ग. पा. । ११ कण्डवत्, मू. पा. । १२ टाण्डभं, ख. पा. । १३ मथार्धेन्दोः, मू. अ. क. ख. ग. ङ. पा. ।

लिङ्गनाहविकारांशं कृत्वा तु गुणयेत्ततः ।
जिनविंशतिशार्दूलैराद्यं ब्रह्मादिवेष्टनम् ॥८४॥
नखात् षष्टि१ विकारांशैरनाद्ये चर२ तथा भवेत् ।
विकारेण स्मरेणांशतृतीयांशयुतेन च ॥८५॥
भागस्यार्धविभागेन युक्तांशेन ३ सुरार्चिते ।
भागतृतीयभागेन नखचन्द्रान्वितेन च ॥८६॥
अंशतृतीयभागेन चात्यष्टांशयुतेन च ।
ससप्तदशमिश्रांशैः परिधिः स्यात्समांशके४ ॥८७॥
चतुर्दोभिरजोवेष्टं५ कृत्वा सप्तांशकं भुजम् ।
सार्धद्वित्रिभुजैर्विष्णुः साङ्ख्यैकत्रिभुजैर्हरः ॥८८॥
मूर्ध्न्युन्नते६ महाभोगः पृष्ठे गोलाभे [illegible] च ।
यवगर्भे भवेत्पुष्टिः पानान्नं जठरोन्नते ॥८९॥
सर्वाङ्गवतुले सौख्यं प्रजालक्ष्मीविवर्धनम् ।
समकुक्षौ भयं हन्यात् स्थूलमूले त्वरोगता७ ॥९०॥
शूलाभे विकले मूर्ध्नि प्रजा हन्ति सकर्तृकाः ।
निम्ने च लुञ्चिते कुर्याद्धनधान्यविनाशनम् ॥९१॥
क्षतं च मूर्ध्नि यल्लिङ्गं तद्धन्यात्कर्तृभूभुजौ ।
छिद्रान्वितं च सद्भार्यां८ ललाटे निःनकं सुतम् ॥९२॥
मूर्ध्नि स्थूलं च कर्तृघ्नं वक्रं [illegible]र्थशिल्पिहत् ।

---

१ दृष्टि, क. ख. पा. । २ चै, मू. पा. । ३ युक्तार्केण, क. ख. पा. । ४ समाहृदके, मू. पा । ५ मू. रजोवेष्टयै, क. । ख. घ. पा. । ६ मूर्ध्न्युन्नते, क. ख. पा. । ७ हारोगता, मू. पा. । ८ तथा भाया, मू. अ. क. पा. ।

मध्ये कृशं च शोकाय दुर्भिक्षदमधः कृशम् ॥९३॥
हीनाङ्गे चिपिटाङ्गे च भयं पीडा च जायते।
व्रणितामयवृद्धिश्च दुर्भिक्षं चातिकोटरे ॥९४॥
हन्याद्दीर्घकृशो राष्ट्रं ह्रस्वे व्याधिः प्रकुप्यति।
धनघ्नं पृष्ठनिम्नं स्याद्रोगं पार्श्वे तथोदरे ॥९५॥
सुनिष्पन्नं यदा लिङ्गं घृष्ट्वा शाणादिभिर्बुधः।
सम्यक् सुनिर्व्रणं धौतं तदा चिन्हानि लक्षयेत् ॥९६॥
स्वस्तिका१ब्जाङ्कुशच्छत्रचक्रासिध्वजकम्बु च२।
मकरादर्शचापोर्मिस्रक्कमण्डलुतोरणाः ॥९७॥
मत्स्यकूर्माद्रिभान्विन्दुयव३सिंहाक्षसूत्रकाः।
श्रीवत्सनन्दिकावर्तरथहारेभभूषणैः ॥९८॥
नेत्रकुंभजटालिङ्गस्त्रीताराशूलचामराः
मयूरवाजिवासोभिस्तरुवस्रपवित्रकाः ॥९९॥
प्रासादकरवह्न्यर्चिर्भंगाकारा४ च रेखिकाः।
लिङ्गाङ्गे यत्र तत्र५ स्यान्नृपराष्ट्रविवृद्धिदाः ॥१००॥
कबन्धकपिमार्जारव्याघ्रभल्लूकपेचकैः।
करङ्ककङ्कगृध्राहिश्येनकाकखराखुभिः ॥१०१॥
बलाकानिगडोलूकपाशसंदंशकीटकैः।
पतङ्गमुण्डमालोष्ट्रवृकाकारश्वरूपकैः।
यजमानप्रजाराज्ञां लिङ्गं भीशं६ कर्ददायकम् ॥१०२॥

---

१. मुष्टिका, क. ग. पा. । २. कम्बुभिः, घ, पा. । ३. वृष, मू. पा. । ४ भयाकारा, मू. अ, ग. पा. । भयाकारा, क. ख. पा. । ५. यत्र यत्र, घ, पा. । ६. स्त्रीशोक, मू. पा. ।

(१इईछलद्वयं२ चैव तथा पञ्चानुनासिकाः ।
एते च पार्थिवा वर्णा लिङ्गचिन्हानि भूतये३ ॥१०३॥
ऊ४ं अवडङा४क्षाधःकसहाजावसा५शिति ।
एते च६ वारुणा वर्णा प्रजायुर्धनलाभदाः ॥१०४॥
ऋॠआयरऔघाओन्निसर्गश्च दृश्याः पृथक् ।
आग्नेया अग्निसन्त्रासदुर्भिक्षव्याधिवर्धनाः ॥१०५॥
ऐओएउपगाभाथठढकारांवषाविति ।
वायव्या वायुसन्त्रासकलहोद्वेगकारकाः ॥१०६॥
मिश्रास्त्वेते फलं दद्युर्हीनाधिकसमं ततः ।
साधने चासिलिङ्गं च दिग्लिङ्गं चैव वक्ष्यते७ ॥१०७॥
एकास्रं शत्रुनाशाय द्व्यस्रं पुत्रविवृद्धिदम् ।
त्र्यस्रं चाशेषसिद्ध्यर्थं वेदास्रं चेप्सितप्रदम् ॥१०८॥

---

१. अत्र पार्थिवादितत्त्वानां वर्णविभाजने वर्णोल्लेखने च भिन्नक्रमः । आकाशतत्त्वं च नैव वर्णितम् । ग्रन्थान्तरेषु तु पञ्चैव तत्त्वानामुल्लेखः समुपलभ्यते । पाठोऽयमशुद्धः अपूर्ण इव च प्रतिभाति । शैवागमविद एवात्रप्रमाणम् । तत्त्ववर्णविभाजनक्रमस्तु पुरश्चर्यार्णवस्य प्रथमतरङ्गस्य दीक्षाप्रकरणे कुलाकुल चक्रे प्रकारान्तरेण कृतः । स च यथा—
वाय्वग्निभूजलाकाशाः इति । अआएकचटतपयषाः मारुताः । इईऐखछठथफरक्षा आग्नेयाः । ऋॠओघझढधभवसाः जलीयाः । लृॡअंङञणनमशहा नाभसाः इति । २, लृ लॄ घ. पा. । ३. भूतले, क. पा. । ४. फटा, क. ख. घ. पा. । ५. कहोजव ऋसा, मू. पा. । ६. तु, घ. पा. । ७. लक्ष्यते, ख, पा. ।

पञ्चास्रं शत्रुनाशाय षडस्रं भोगदायकम् ।
सप्तास्रं द्वेषकृत्ख्यातमष्टास्रं कीर्तिवर्धनम् ॥१०६॥
उच्चाटने नवास्रं स्याद्दशास्रं रोगनाशने ।
रुद्रास्रं रोगवृद्ध्यर्थं भयघ्नं द्वादशास्रकम् ॥११०॥
कामास्रं शत्रुनाशाय स्तंभने भुवनास्रकम् ।
तिथ्यस्रं पुण्यकृल्लिङ्गं विकारास्रं सुखप्रदम् ॥१११॥
पूर्ववत्कल्पनैतेषां मानमस्तकरूपतः[१] ।
नवावधिकरान्तस्य शून्यदोषो न कस्यचित् ॥११२॥
वसुकृते दिशालिङ्गे अङ्गुलं वा करक्रमात् ।
त्रिधा मानेन चैकेन[२] षोडशास्रं शतद्वयम् ॥११३॥
तद्द्वैध्यैः सूर्यवत्कार्यौ बिष्कम्भो वेदभागतः ।
चतुरष्टषडस्रं तु इन्द्राङ्कं[३] वज्ररूपकम् ॥११४॥
अष्टास्रं पूर्ववत्कार्यं त्र्यस्रांश[४] मिन्दुयाम्ययोः ।
बिन्दुर्मपातसंयोगात्तिर्यक्सूत्रैर्विवर्तयेत् ॥११५॥
नाहार्धं रुद्रभागं[५] च बाणांश[६] श्चतुरस्रकम् ।
वस्वस्रोर्ध्वं तु[७] समास्रं शतयाग्नेय च दाहकृत् ॥११६॥
किन्तुस्वांशान्[८] विना शत्रोर्याम्यं चिपिटकं ततः ।
नाहार्धं नवधा कृत्वा शरैर्हृत्पृष्ठकोटिभिः ॥११७॥

---

१. रूपकम, क ख. घ. पा. । २. चैकयेन, घ. पा. । ३. चन्द्राङ्क, ख. पा. । ४. त्रिस्रंशत्र, क. ख. पा. । ५. रुद्रभागेन. मू. पा. । ६ बाणांशे, क. पा. । ७. वस्वस्रोर्ध्वे तु, मू. पा. । ८. स्वसां, मू. पा. ।

पार्श्वात्र्यश्वस्त्रैर्ग्रहैःषड्भिः कोणेष्वस्त्रुविनाशनात् २।
एवं चाष्टास्त्रवृत्तं स्याद्यास्यदण्डं ३ रुजप्रदम् ॥११८॥
दैर्घ्यार्धं ४ रुद्रवत्कृत्वा भूतांशैश्चतुरस्रकम्।
अष्टास्त्रोऽर्ध्वं ५ दशास्त्रं स्यात्खड्गाभं राक्षसं भयम् ६ ॥११९॥
नाहार्धं मुनिवत्कार्यं विष्कंभं युगभागतः।
चतुरष्टास्त्रवृत्तं स्यात्पाशवद्वारुणं शुभम् ॥१२०॥
दर्घ्यार्धं रविभागेन वेदास्त्रं ७ मुनिभागतः।
कृशं प्राग्रूपकं दीर्घं चलमुच्चाटकृद्ध्वजम् ७ ॥१२१॥
कुर्यात्सर्वसमं लिङ्गं स्थूलोदरविनिर्मितम्।
याक्षं ८ गदाग्रमूर्धानं बलवृद्धिकरं शिवम् ॥१२२॥
नाहार्धं रुद्रभागेन विष्कंभं षड्विभागतः १०।
चतुः पञ्चास्त्रकं ११ त्र्यस्त्रं शूलं रौद्रं तु मुक्तिदम् ॥१२३॥
रसभाग १२ कृतं नाहं १३ पक्षांशे १४ चतुरस्त्रकम्।
अष्टास्त्रोऽ १५ र्ध्वं च वेदास्त्रं ब्राम्हं स्वर्गाय पद्मवत् ॥१२४॥

---

१. पार्श्वं, मू. पा.। २. कोणेषु स्वविनाशकृत्, मू. अ. ङ. पा। ३ यामदण्डं, मू. अ, क. ग. ङ. पा। ४ दैर्घ्यैवं, घ. पा.। ५ ऽर्धं, मू पा.। ६ क्षये. क. ख. पा.। ७. चन्द्रास्त्रं, ख. पा.। ८. पाक्षं, क. पा.। माक्षं: ग. पा.। ९. धन, घ. पा.। १० विभागजम्, मू. पा.। ११ चतुरस्त्रास्त्रकं, मू पा.। १२ रसभागे. क. ख. ग. पा.। १३. नाहात्, घ. पा.। १४. पक्षांशैः, ख. पा.। १५. अष्टांशो, ग. पा.।

बाह्यार्धं नगभागेन विष्कंभं तुर्यभागतः

चतुरष्टास्रवृत्तं स्याद्दैर्घ्येणैवं शङ्खवच्छुभम् ॥१२५॥

ऋतूदये द्विभागार्धत्यागाद्वज्रशिरो भवेत् ।

रुद्रात्त्रिहानितः शक्तिर्दण्डो दिग्भ्यस्त्रिहानितः ॥१२६॥

त्रिभिर्हृतैरसिः शैलद्व्यालेन्दुर्चारुणे शिरः ।

कुक्कुटाण्डं च वायव्ये भूतांशाद्धियते गदा ॥१२७॥

ग्रहांशात्त्रिविनाशात्स्यात्त्र्युन्नत शूलसंज्ञकम् ।

दक्षाण्डमज वेण्वोश्च इत्थ रेखा मणेरपि ॥१२८॥

ह्रस्वं दीर्घं कृशं स्थूलं कुब्जं खञ्जं च वामनम् ।

स्फुटितं गर्भवद्दृष्टं स्थापयेदाभिचारिके ॥१२९॥

एवमव्यक्तलिङ्गानि कीर्तितानि शुभाशुभम् ।

व्यक्तलिङ्गानि चान्यानि नाना रूपाणि वक्ष्यतः ॥१३०॥

इति ४ लक्षणसमुच्चयेऽव्यक्तलिङ्गलक्षणं नाम ५ चतुर्थो विधिः ।

अथ पञ्चमः

व्यक्तार्चालक्षणं सम्यगिदानीं प्रवक्ष्यते ।

पूर्वाङ्गुलप्रमाणेन दशपञ्चाङ्गुलाङ्गुलात् ॥१॥

गृहेषु प्रतिमा पूज्या नाधिका हि प्रशस्यते ।

कश्चिद्धस्तप्रमाणा सा कश्चिच्च त्रिंशदङ्गुला ॥२॥

अधिकां स्थापयेद्धाम्नि द्वारहस्तप्रमाणिकाम् ।

---

२१ शक्तिवत्, मू. अ. पा. । २ हेतेः, मू. अ. क. ख. ग. ङ. पा. । ३ खञ्जकुब्जं, घ. पा. । ४ इति प्रतिष्ठातन्त्रे, लिखितपुस्तकेषु पाठः । ५ लिङ्गनर्तनाविधिः, इति लिखित पुस्तकेषु पाठः ।

द्वारोच्छ्रयं विभज्यादावष्टधैकं[1] विधाय च ॥३॥
पुनस्त्रिधा विभज्याथ भागेनैकेन पिण्डिका।
विधातव्या द्विभागेन कन्यसी प्रतिमा च सा ॥४॥
द्वारदैर्घ्यं नवधा कृत्वा त्यक्त्वैकांशं त्रिधा परम्।
मध्यमा स्याद्द्विभागेन[2] कार्यैकांशेन पीठिका ॥५॥
द्वारनाहं त्रिधा कृत्वा भागेनैकेन पिण्डिका।
कर्तव्या तद्द्विभागेन प्रतिमा सोत्तमा मता ॥६॥
करमाने करादेः स्यादेकैकस्योत्तरोत्तरम्।
नवान्तं[3] त्रित्रिकान्तेषु कन्यसाद्याः प्रकीर्तिताः ॥७॥
गर्भकर्णविभागेन प्रतिमालिङ्गोच्छ्रयम्।
पीठश्द्वारप्रविस्तारं मयश्चक्रे स्वके मते ॥८॥
बाह्ये तु प्रतिमा कार्या महती करमानतः।
तिथिमासनवत्यर्धैहीनमध्योत्तमास्त्रिधा ॥९॥
सालङ्कारास्त्रिधा भूता[4] वेतालाः स्थूल[5]वामनाः।
पङ्गुरूपाश्च[6] कूष्माण्डाः सप्तधार्चाश्च[7] घटयेत् ॥१०॥
निर्दोषोच्छ्रायसंयुक्तां चतुरस्रायतां शिलाम्।
विभज्य शक्तिसूत्रेण त्र्यक्षादिभ्यः[8] शुभे दिने ॥११॥
संपूज्यादौ गुरुं कारुं कृत्वा स्वस्त्ययनादिकम्।
पीठात्माश्रयजीवांश्च प्रमादींश्च प्रकल्पयेत् ॥१२॥

---

१ वष्टधैकं. मू. अ. क. पा.। २ मध्यमार्चा विभागेन. घ. पा.। ३ पीठं, घ. पा.। ४ स्त्रियो भूत्वा, मू. अ. पा.। ५ स्थल, ग. पा.। ६ पङ्गुरूपाः स, घ. पा.। ७ घार्चाश्च. मू. पा.। धार्याश्च, क. पा.। ८ त्र्यक्ष्यादित्यः, मू. अ. क. ख. पा.।

विस्तारद्विगुणं[१] क्षेत्रं पञ्चधा प्रविभज्य च।
कृत्वाधोंऽशगतः[२] पीठं त्रिभागे जीवकल्पना ॥१३॥
भूतांशेन प्रभाश्चैव अन्तं विद्याधरादिकम्
सात्माश्रयां सन्मूर्तीं[३] च प्रतिमां वर्तयेत्ततः ॥१४॥
सूत्राणि सप्तत्रिंशत्स्युस्तिर्यक्सार्द्धशतं तथा।
भागैकमङ्गुलं कृत्वा महार्चां वर्तयेद्बुधः ॥१५॥
दैर्घ्यं च नवधा कृत्वा तत्रैकं सूर्यसम्मितम्।
एकभागेऽङ्गुलं तस्या[४] स्तेनाङ्गं परिकल्पयेत् ॥१६॥
मौलिभालाक्षनासाभ्रूनाभिमेढ्राङ्घ्रिकेषु[५] च।
मध्ये सूत्रं समं न्यस्य कुर्यादर्चां कारयेच्छुभाम् ॥१७॥
पादाङ्गुष्ठाल्ललाटान्तमष्टोत्तरशताङ्गुलम्।
जीवः स्याद्देवमानेन प्रत्यङ्गान्यधुना ब्रुवे ॥१८॥
तालेन मुकुटोच्छ्रायस्तद्विस्तारो दशाङ्गुलम्।
मात्राभिस्तत्परिसंख्याभिर्मुकुटे[६] वेष्टनं भवेत् ॥१९॥
तालैकं मूर्ध्नि विस्तार उच्छ्रायो गोलकद्वयम्।
तालमानं भवेद्वक्त्रं ग्रीवा च चतुरङ्गुला ॥२०॥
कण्ठकूपहृदयश्चूचूनाभिगुह्यं यथाक्रमम्[८]।
तालैकैकप्रमाणं स्यादूरू तालचिनिर्गमौ ॥२१॥
द्विकले जानुनी तस्या जङ्घे चैव द्वितालके।

---

१ विस्ताराद्द्विगुणं, मू. अ. ङ. पा.। २ चाधोगतः, मू. पा.। ३ सभूर्तां, मू. पा.। ४ तस्यां, घ. पा.। ५ मेढ्रादिकेषु, क. ख. पा.। ६ मुकुटे, मू. अ क. ख. पा.। ७ शिरस्तु, ख. पा.। ८ पराक्रमम्, मू. अ. ग. पा.

ज्ञेयौ गुल्फौ द्विनेत्रौ च पार्ष्णी द्व्यङ्गुलके मते१ ॥२२॥
वृत्ते च त्र्यङ्गुलोच्छ्राये पादौ सप्ताङ्गुलायतौ ।
मध्ये कलाद्वयोच्छ्रायोवग्रे सार्धार्धरमात्रकौ ॥२३॥
तद्विस्तारौ (त्रि) द्विनेत्रौ च अङ्गुष्ठत्र्यङ्गुलस्तयोः३ ।
पञ्चाङ्गुलौ! वेष्टनेन सार्धाङ्गुलद्विपर्वणी ॥२४॥
प्रदेशिनी च दैर्घ्येण सा च त्र्यङ्गुलका मता ।
त्र्यङ्गुला परिणाहेन कथ्यन्ते त्वधुनापराः ॥२५॥
अन्या दैर्घ्यविकाशांशहीनावेष्टेन चाष्टभिः ।
पादाङ्गुल्यस्त्रिपर्वाणः पर्वार्धनखशोभिताः ॥२६॥
पादाङ्गुष्ठनखौ निम्नावग्रे४ कार्यौ यवोन्नतौ ।
कराङ्गुष्ठ५तलकं रक्तं नखाः सर्वोन्नतारुणाः ॥२७॥
वक्षो द्वितालविस्तारं बाहुमूले षडङ्गुले ।
उपबाहू दशाष्टांशौ षोडशाङ्गुलकौ भुजौ ॥२८॥
सप्ताङ्गुलकर यामः पञ्चाङ्गुलप्रविस्तरः ।
भूताङ्गुला भवेन्मध्या अर्धहीना त्वनामिका ॥२९॥
तत्समा तर्जनी धर्माङ्गुलाङ्गुष्ठकनिष्ठिके ।
मध्यमाद्यास्त्रिपर्वाणो द्विपर्वाङ्गुष्ठको मतः ॥३०॥
मध्य ६य७ः कलायामस्त्व न्यिङ्गुलार्ध विनाग्रतः ।
तर्जन्यनामिकापर्व सपादयववर्जितम् ॥३१॥

---

१ क्रमात् क. पा. । २ सा चार्धः ख. पा. । ३ द्वयोः, ग. पा. ।
४ वत्र, मू. अ. क. ख. ङ. पा. । ५ नखाङ्गु, मू. अ. क. ख.
ग. ङ. पा. । ६ मध्या, मू. पा. । ७ यामा त्व, मू. पा. ।

सा च द्वियवहीना स्यात्प्रतिपर्वकनिष्ठिका ।
द्व्यङ्गुलोऽङ्गुष्ठकग्रन्थिरासां पर्वार्धगा नखाः ॥३२॥
अथ त्र्यंशविभक्तास्यं ललाटं नासिकामुखम् ।
नासोत्सेधः सविस्तारो द्व्यङ्गुलो द्विपुटः[१] शुभः ॥३३॥
अर्धाङ्गुलसमे वृत्ते नासाया विवरे शुभे ।
द्व्यर्धं यवं पुटे स्थूले मध्ये वंशः[२]त्रिभिर्यवैः ॥३४॥
([३]नासाधोऽर्धाङ्गुलं गोजी गोज्या चाधो[४]ऽङ्गुलोऽधरः ।
अधोऽधरोऽङ्गुलकं तु[५] द्व्यङ्गुले चिबुकरिर्थतः ॥३५
पेदाङ्गुलं मुखं ख्यातं[६] यवमानं तु सृक्कणी ।)
नासिकामूलतश्चैव तु लोचने द्व्यङ्गुलायते[७] ॥३६॥
मीनोदरा च चापाभा[८] नवद्रक[९] कुमुदाकृतिः ।
इन्दीवरदलपत्राभा पटोलफलवत्स्त्रियाः ॥३७॥
तद्विस्तारोऽङ्गुलं चैकं तारा स्यात्तत्त्रिभागिका ।
पञ्चमांशं भवेज्ज्योतिः सृक्कणीसूत्रतुल्यतः ॥३८॥
रुचिरौ यवमानौ च घ्राणपुटौ[१०] समसूत्रकौ ।
अर्धाङ्गुलसमा द्रोणी सार्धद्व्यङ्गुलदीर्घता ॥३९॥
नेत्रार्धे द्व्यङ्गुलायामे भ्रुवौ द्विरवविस्तरौ ।

---

१ द्विकुटः, मू. अ. पा. । २ विंशः, क. ख. पा । ३ कोष्ठान्तर्गतोऽयं पाठः ख. पुस्तके नास्ति । ४ चाधो, मू. पा. । ५ ङ्गुलकर्ण, क. ग. पा. । ६ ख्यातं, मू. पा । ७ लोचनमङ्गुलायते, ग. पा. । ८ चषाभा, घ. पा. । ९ नवद्रक, मू. पा. । १० द्वौ पुटौ, मू. पा. । नासापुटौ, ग. पा. ।

तयोर तरमात्रार्धं स्त्रियां यथार्धविस्तृते१ ॥४०॥
कार्मकाभे समे शस्ते भ्रूसमा कर्णयो ७ स्थितिः ।
कर्णौ नेत्रद्वयायामौ तदर्धाद्रिस्तरस्तयोः ॥४१॥
यवद्वयोन्मिति२वती शष्कुली तत्समा भवेत् ।
कलार्धं (तुड्कौ३ खलौ ?) पाशौ कुर्याद्यथेप्सितौ ॥४२॥
सार्धंत लं भवेन्मूर्ध्नि कर्णयोरूर्ध्वदेशतः ।
इन्द्रसङ्ख्याङ्गुलं पश्चात्कर्णयोरन्तरं विदुः ॥४३॥
सार्धं यवं तु कर्णं तु दलं कुर्यान्न चाधिकम्४ ।
ललाटोऽष्टाङ्गुलायामस्त्र्यङ्गुलः शङ्ख उच्यते ॥४४॥
तदूर्ध्वं द्व्यङ्गुले शुक्ती५ त्रिता ६ द्वेष्टनं शिरः७ ।
सप्ताङ्गुलौ कपोलौ तु साङ्गुलौ सयवोच्छ्रयौ ॥४५॥
द्विकलार्धाक्षिसृक्कान्त तु त्वपाङ्गौ सावकाङ्गुलौ ।
हनू कला त्रदीर्घौ च द्विकलश्चिबुकोद्गमः ॥४६॥
श्रीवाष्टाङ्गुलविस्तारा वेष्टनेन द्वितालका९ ।
स्कन्धोऽष्टाङ्गुलविस्तारस्तनायामश्चतुष्कलः ॥४७॥
त्रिगोलावशकौ ख्यातौ षडङ्गुलपृथू भुजौ ।
विस्तारः कूर्परस्तस्माद्भूताङ्गुलैर्यवैस्तथा ॥४८॥
पञ्चाङ्गुलोपबाहू च तन्मध्यं च१० कलाद्वयम् ।

---

१ यथास्तुविस्तृते घ. पा.। २ द्वयमिति, घ. पा.। ३. तुद्रुकौ, मू. अ. पा.। तुड्कौ, क. ग. पा.। तुपुकौ ख. पा.। ४ नराधिकम्, ख. पा.। ५ शक्तिः, ख. पा। ६ त्रिकाल, क. पा.। ७ शिवः, ग. पा.। ८ सूका, मू. अ. ग पा. ९ तालिका, ख. घ. पा.। १० तन्मध्ये तु घ. पा.।

चतुरङ्गुलविस्तारो मणिबन्धः प्रकीर्तितः ॥४६॥
क्रमात्त्रिगुणकं बाह्वोः परिवेष्टनमेतयोः।
स्तनयोरन्तरं तालं तयोः प्रान्तौ द्विनेत्रकौ ॥४८॥
चूचुकं यवमात्रं[1] तु द्वियवं स्तनमण्डलम्।
नाभिः प्रदक्षिणावर्ता निम्नतोऽर्धाङ्गुलोदिता ॥५०॥
विस्तारेणाङ्गुलं विद्यान्नाभ्यधो द्विकलोदरम्।
हृद्विंशत्यङ्गुलं प्रोक्तं नाभिदेशश्चतुर्दश ॥५१॥
अष्टादशाङ्गुला श्रेणी विस्तारेण प्रचोदिता।
पञ्चादशाङ्गुलं[2] वक्षो हृद्देशः पञ्चभिर्विना ॥५३॥
वेष्टनेन ततो नाभिर्द्विचत्वारिंशदङ्गुलम्।
कटिः संवेष्टनेनोक्ता शताच्च[3] द्व्यधिकाङ्गुला ॥५ ॥
स्फिचौ पीनौ सुवृत्तौ च समौ च द्विकलोन्नतौ।
चतुर्नेत्रप्रविस्तारौ गजकुम्भोपमौ शुभौ ॥५५॥
वृषणौ द्व्यङ्गुलायामौ तन्मध्ये मेहनस्थितिः।
मेहनस्त्र्यङ्गुलो दैर्घ्यात्परिणाहे[4] षडङ्गुलः ॥५६॥
तत्कोशाग्रं द्विनेत्रं च परिणाहेन कीर्तितम्।
पायोश्चवृषणस्यान्तर्विस्तारेण द्विगोलकम ॥५०॥
ऊरुमूले च तन्मध्ये जानू द्वे जानुदेशतः।
तदधः पिण्डिकायां च जङ्घायां घण्टिकोर्ध्वतः ॥५८॥
एकैकं क्षीयते तालो[5] यावत्पञ्चाङ्गुल[6] स्थितिः।

---

१ चूचुकौ यवमात्रौ, घ. पा.। २ पञ्चाशदङ्गुलं. मू. अ. क. ग. पा.। ३ स तावत, क. ख. पा.। ४ परिणाहात् मू. पा। ५ तालाद्, घ. पा। ६ पश्चाङ्गुल, घ. पा.।

एवं विस्तार एतेषां वेष्टनं त्रिगुणाधिकम् ॥५९॥
यवगर्भे कशे लिङ्गे कराङ्गुल्यग्रके तथा ।
भुजजङ्घाग्रके चैव स्वविस्तारात्त्रिवेष्टनम ॥६०॥
एतदुक्तं च सामान्यं स्त्रियाः पुंसश्च लक्षणम्[१] ।
नार्यष्टांशा च तन्वङ्गी[२] चक्षुः श्रोणी स्तनाधिका ॥६१॥
गण्डास्थिसूत्ररामेण (?) त्र्यस्रं कूर्मोन्नतं भगम ।
तन्मध्यतस्त्वधोभागे रन्ध्रं स्यात् कुञ्जरोष्टवत् ॥६२॥
दक्षाण्डाभं तिलाकारं देवदैत्योर्मुखं वरम ।
वृत्तं वेदास्रकं चास्यं कुर्यात्प्रेतादिरक्षसाम् ॥६३॥
नवाङ्गेरितरे ख्याताः प्रधाना दशभागिकाः ।
ब्रह्मविष्णुहरादीनां संक्षेपाल्लक्ष्म चोच्यते ॥६४॥
मुकुटाद्यङ्गुलैकैकं प्रक्षिपेच्चरणान्तिके ।
वक्षोबाहूरुजङ्घानां[४] करादीनां क्रमेण तु
तालैरेकादशभिः कुर्याद्भूतप्रेतालरक्षसाम् ॥६५॥
द्वे द्वे चैवाङ्गुले देये वक्त्रादिषु यथाक्रमम ॥६६॥
किङ्कराः स्थूलह्रस्वास्त्र सप्ततालोच्छ्राया मताः ।
वामनः पञ्चतालश्च भूतांशैः पङ्गुकुब्जकौ ॥६७॥
कूष्माण्डकश्चतुस्तालैरुन्मानेन प्रकल्पयेत् ।
बुद्ध्वा बुद्ध्वा तु यत्नेन सूक्ष्मदृष्ट्या विचक्षणः ॥६८॥
पोषणं हरणं कुर्यात्सर्वेष्वित्येव रूपके ।

---

१ वेष्टनं, पू. पा. । २ तरङ्गी, पू. अ. ख. पा । ३ मुकुटाद्यङ्गुल, ग. पा. । ४ जङ्घानां, ग. पा ।

अचतन्मानतः कार्याः सर्वावयवभूषिता ॥६९॥
सर्वशान्तिकरी धन्या न हीना नाधिकाङ्गिका ।
स्थानकैः करणैर्युक्ता प्रतिमैषा फलप्रदा ॥७०॥
विक्षिताधोमुखी स्तब्धा हीना शुष्का कुनेत्रिका ।
वकाङ्गी१ चिपिटा दीना कृशाङ्गात्री च रौद्रिका ॥७१॥
विक्षिताङ्गी क्षयं कुर्यात् पापदाधोमुखी मता
सङ्कोचकारिका स्तब्धा हीनवक्त्रा च रोगदा ॥७२॥
यानघ्नी ३ कटेर्हीना स्याज्जनहृत्पाणिपादतः४ ।
हीनजङ्घारिसौख्यार्थं शुष्का स्यान्नृपनाशिनी ॥७३॥
शुष्क ५ पाण्यङ्घ्रिकद्या स्यादाचार्यं शुष्कजङ्घिका ।
उद्वेगजननी सा तु भ्रामणी च सदा भवेत् ॥७४॥
कुनेत्रा नेत्रहृत्ख्याता वक्रघ्राणा तु दुःखकृत् ।
वकाङ्ग्यर्थाङ्गनाशाय चिपिटा दुःखदायिनी ॥७५॥
दीनार्चा६ शिल्पिनं हन्याद्रौद्री कर्तृविनाशिनी ।
धनघ्नी च ७ कृशाङ्गी स्यात्क्षयघ्नी तु कृशोदरी ॥७६॥
गण्डोत्तमाङ्गहृद्वक्षआदौ निम्ना ध्रुवं हरेत् ।
सुहृद्धनसुतांस्तस्मात्कार्या सल्लक्षणाः सदा ॥७७॥
ऋजुन्दचक्षुगतं साची कृतकं गण्डभीतिदम्९ (?)

---

१ चक्राङ्गी, मू.अ.क.ख ङ. पा. । २ भूष,ख.पा. । ३ दानघ्नी, क.ख.पा. । ४ पादपाणितः, ख.पा. । ५ गुह्य,ग.पा. । ६ नीचार्चा, मू. पा. । ७ तु, मू. पा., ८ ऋज्वा, क. पा. । ऋद्धा । ख, पा. । ऋद्, ग. पा. । ९ भीतिकृप्. घ.पा. ।

छायागतं च सर्वाङ्ग१भित्तिकं क्षिप्तकं तथा ॥१८॥
परावृत्तभितीमानि नवस्थानानि रूपके ।
करणानि शतं चाष्टौ व्यन्तरा२श्चातिविस्तराः (?) ॥७६॥
इति लक्षणसमुच्चये व्यक्तलिङ्गलक्षणं नाम पञ्चमो विधिः॥

अथ षष्ठः

नवशक्तयः३-

वृषस्था जटिलास्त्र्यक्षा अग्निज्वालासमप्रभाः ।
कपालाभयहस्ताग्र्या वामाद्या नवशक्तयः ॥१॥

शिवः४—

चतुर्भुजो ऽरविन्दस्थः शिवः कुन्देन्दुनिर्मलः ।
द्वीपिचर्माहिभृच्छान्तस्त्र्यक्षो जटेन्दुभूषितः ॥२॥
कपालशूलपाणिश्च पुरोत्तानकरद्वयः ।
अङ्गषट्कसमायुक्तः शीघ्रं स्यात्सिद्धिदायकः ।

---

१ सर्वाङ्क घ. पा. । २ प्यन्तरा, क. ख. पा. ।
३ अस्य ग्रन्थस्य पूर्वभागात्मके देवता चित्रसंग्रहे पुस्तके मुद्रितानां चित्राणां नामानि क्रमसंख्या चात्र तत्तत्स्थाने दत्तानि । अत्रोक्तलक्षणानामुदाहरणानि तत्रैव द्रष्टव्यानि । यथा— (नवशक्तयः) इत्यस्योदाहरणे १ संख्याकं चित्रं द्रष्टव्यम् । एवं सर्वत्र ज्ञेयम् । ४ अस्य. २ सं. चित्रं द्रष्टव्यम् ।

शिवभेदः१–

स एवाब्जस्थितो देवो दिग्बाहुर्द्वक्त्रिपञ्चकः ।
२युवयौवनवृद्धस्त्रीबालाभः पञ्चवक्त्रभृत् ॥४॥
सव्ये कर्तरिकादर्शकुण्डीवरदशूलभृत् ।
वामेना३भयमन्त्राङ्कु४कपालोत्पलपूर५भृत् ॥५॥
हृत्सितं कपिलं मुण्डं पीता शिखा सितच्छदम् ।
दूग्रक्त्ऽसिहुताशाभाः सर्वे त्र्यक्षा जटान्विताः ॥६॥
द्विभुजाश्चकवक्त्राश्च कपालशूलपाणयः ।
बभ्रुभ्रूश्मश्रुदृग्भीममस्त्रं पीतं स्वशस्त्र६भृत् ॥७॥

शिवभेदः७–

कुण्डी पाशाङ्कुशं घण्टा शूलं च वामहस्तके ।
शक्ति८वज्राक्षमालासिचक्राणि दक्षिणे क्वचित् ॥८॥
द्वीपिचर्माम्बरोऽब्जस्थो नागयज्ञोपवीतवान् ।
एकास्यः पञ्चवक्त्रो वा त्र्यक्षो जटेन्दुभृच्छवः ॥९॥
अनन्तायाश्चतुर्दिक्षु रक्तनीलसितारुणाः ।

---

१ अस्य, ३सं. चि. द्र. । २ अत्र क. पुस्तकस्था टिप्पणी– युव= ईशः, यौवनः= पुरुषः, वृद्धः= अघोरः. स्त्री= वामदेवः, बालः= सद्योजातः, इति । ३ दक्षेण, ख. पा. । अत्रैव क. पुस्तकस्य टिप्पण्यां 'अक्षमाला' इति शब्दश्च प्रक्षिप्तः । ४ मन्त्राह्व, घ. पा. । ५ अत्रापि क. पुस्तकस्य टिप्पण्यां 'बीजपुर' इति प्रक्षिप्तः । ६ सुशस्त्र, क, ख. ग. . पा. । ७अस्य ४ सं. चि. द्र० । ८ शान्ति, पा. ।

कोणेषु चैक१रुद्राद्याः सितासङ्नीललोहिताः ॥१०॥
सर्वे चाष्टभुजाः सौम्याश्चतुरास्या जटान्विताः ।
शिवायुधधरास्त्र्यक्षाः सृण्यसिभ्यां विना क्वचित्॥११॥
दिग्वर्णा२ जटिलास्त्र्यक्षाः स्थूलत्रि३शूलधारिणः ।
पुराञ्जलिकराः सर्वे विघ्नेशश्चैकवक्त्रकाः ॥१२॥

सोमेश्वरः४– (प्रथमः)

सितश्चतुर्मुखस्त्र्यक्षः कञ्जस्थो भूषणान्वितः ।
वराभयकपालाब्जजटेन्दुजिननागभृत् ॥१३॥

सोमेश्वरः५— (द्वितीयः)

कार्यः सोमेश्वरो रक्तश्चतुरास्योऽष्टबाहुकः ।
दक्षिणे शूलनिस्त्रिंशकुठाराभयधारकः ॥१४॥
घण्टाकपालखट्वाङ्गपाशहस्तस्तु वामके ।
मुण्डमाली शवारूढो द्वैताद्वैते क्रमात्स्मृतः ॥१५॥

नाट्येश्वरः६—

पीनाङ्गं यौवनोद्भिन्नं दशबाहुं ७ त्रिलोचनम् ।
सौम्यं प्रहसितास्यं च चन्द्रमौलिं जटाधरम् ॥१६॥
व्याघ्रचर्मांशुकं शान्तं व्यालयज्ञोपवीतिनम् ।
नागेन्द्रमेखलायुक्तं सर्वाभरणभूषितम् ८ ॥१७॥

---

१ चैव, मू. पा. । २ दिग्दण्डा, मू अ. पा. । ३ स्तूरत्री, मू. अ. ख. पा । स्तूरस्त्री घ. पा. । ४ अस्य. ५. सं चि. द्र० । ५ अस्य ६ सं. चि. द्र. । ६ अस्य. ७ सं. चि. द्र० । । ७ दशघाङ्ग, ग. पा । ८ मण्डितम् , ख. पा.

ऊर्ध्वमेढ्रं महादीप्तं वैशाखकरणे स्थितम् ।
नृत्यन्तं महाहृष्टमायुधाकुल[1]पाणिनम् ॥ ८॥
दण्डासिशक्तिशूलानि बिभ्राणं दक्षिणे करे।
वलनाकारकं बाहुमेकं कृत्वा हृदि स्थितम् ॥ १९॥
कपालं चैव खट्वाङ्गं खेटकं नागनायकम् ।
वामे प्रतानितभुजं सम्यक् कृत्वा सुशोभनम् ॥२०॥
कपालमालिनं दिव्यं सुप्रसन्नं सुभूतिदम् ।
([2]सर्वशान्तिकरं कुर्यादित्येवं सौम्यरूपकम् ॥२१॥
वृषस्थितं हरं कुर्याद् देवासुरसमावृतम् ।
स्कन्दनन्दिमहाकालगणेश[3]गणसंयुतम् ॥२२॥
कूष्माण्डाद्यप्सरोभिश्च वृतं विद्याधरादिभिः ।
सानन्दै रूपसम्पन्नैर्वीक्ष्यमाणं महेश्वरम् [4] ॥२३॥
दिव्याम्बरपरीधानैः सर्वाभरणभूषितैः ।
तदग्रे च प्रनृत्यंश्च भृङ्गीकार्यः कृशो भृशः ॥२४॥
पुरः प्राङ्मध्यतोऽन्ते च दीप्तोग्राः कामरूपिकाः [5] ।
विकृतास्तीक्ष्णनासाश्च गौराग्न्यात्रिप्रदाः[6] क्रमात् ॥
यथार्कस्य भवेद्रूपमादिमध्यान्तसंस्थितम् ।
हरस्यैवं भवेदर्चा स्थाने स्थाने फलप्रदा ॥२६॥

---

१ मायुधोज्ज्वल, मू. अ. पा. । २ कोष्ठान्तर्गतोऽयं पाठः क. पुस्तके नास्ति । ३ च नादेशं, ख. पा । ४ वीक्षमाणैर्महेश्वर, ख. घ. पा. । ५ दीप्ताङ्गाः सौम्यरुपिकाः, मू. अ. क. ख. पा. । ६ प्रपदाः, ख. पा. ।

चण्डभैरवः१—

चक्रनेत्रं च पीनाङ्गं पिङ्गभ्रूश्मश्रुमूर्धजम् ।
भ्रूकुटीभीषणं कृष्णं लेलिहानं च दंष्ट्रिणम् ॥२७॥
मुण्डमालाकुलं दिव्यं कपालाभरणोज्ज्वलम् ।
नागोपवीतिनं दीप्तं नागाभरणभूषितम् ॥२८॥
वीरासनं शवस्थं च गजचर्मोत्तरीयकम् ।
चतुर्दशकरैकास्यं सौम्यं व्याघ्राजिनाम्बरम् ॥२९॥
शूलासिशक्तिबाणांश्च शान्तिकं दक्षिणे करे ।
खट्वाङ्गं खेटकं पाशं चापाभयकपालकम् ॥३०
बिभ्राणं वामहस्तेन२ द्वयोश्च गजचर्म तु ।
मातृभूतान्वितं कुर्याद्भैरवं शान्तिकारकम् ॥३१॥

अघोरघण्टेशभैरवः३—

एतत्सर्वसमायुक्तं कुलिशमुद्गराधिकम् ।
कुर्यादघोरघण्टेशं द्विरष्टभुजमण्डितम् ॥३२॥
(४अष्टवक्त्रं महारूपं द्विवर्णं त्रिनलोचनम् ।
उपविष्टं सदा कृष्णं सर्वकामप्रदायकम् ॥३३॥

अन्धकान्तकभैरवः५—

उच्चालीढं६स्थितं क्रुद्धं प्राग्रूपं पञ्चवक्त्रकम् ।

---

१ अस्य ८ सं. चि. द्र. । २ हस्ते च, घ पा. । ३ अस्य ६ सं. चि. द्र. । ४ कोष्ठान्तर्गतोऽयं पाठः घ. पुस्तके वर्तते, अन्येषु नास्ति । ५ अस्य १० सं. चि. द्र. । ६ ऊर्ध्वालीढ, मू. अ. क. ख. ग. ङ प. ।

अष्टादशभुजं कुर्याद्वरदाभय१वर्जितम् ॥३४॥
पाणिद्वयस्थसच्छूलसंभिन्नान्धकदानवम् ।

घण्टां डमरुकं चैव कुठारं मुद्गरं२ तथा ॥३५॥
धारयन्तं स्फुरद्दंष्ट्रं भैरवं त्वन्धकान्तकम् ।
सर्वशत्रुहरं नित्यं मातृभिः परिवारितम् ॥३६॥

वैद्यनाथः३–

षड्भुजं जटिलं श्वेतं त्रिनेत्रं चन्द्रभूषितम् ४ ।
व्याघ्राजिनांशुकं सौम्यं नागयज्ञोपवीतिनम् ॥३७॥
त्रिशूलं चाक्षसूत्रं च ५ कपालं कुण्डिकां क्रमात् ।
याम्ये सौम्ये च बिभ्राण द्वाभ्यां व्याख्यानकं तथा ॥
पद्मासनस्थितं कुर्याद्वैद्यनाथं हरं प्रभुम् ६ ।
गौरं सिताम्बरं शान्तं कमण्डलुसमन्वितम् ॥३९॥
धन्वन्तरिं सुषेणं तु वानरास्यं नराङ्गकम् ।
अमृतागमहस्तं च कुर्यात्तत्पार्श्वयोः सदा ॥४०॥

सदाशिव ७–

सदाशिवं तदाकारं८ कुण्डिकाद्यविवर्जितम् ।
अर्धचन्द्रासनासीनं श्वेतराजीवमध्यगम् ॥४१॥
दलाष्टके च विद्येशैरनन्ताद्यैश्च दिक्षु च ।
विदिक्षु चैक९रुद्राद्यैस्तथा गौर्यादिभिर्गणैः ॥

---

१ भवदाभय, ग. पा. । २ मुद्गलं, क. ग. पा. । ३ अस्य ११ सं चि. द्र० । ४ चन्द्रमौलिनम्, ख. पा. । ५ तु, घ. पा. । ६ विभुम्, ख. पा. । ७ अस्य. १२ सं. चि. द्र० । ८ तथा कालं, ख. पा. । ९ चैव, म. अ. पा. ।

दिव्यसिंहासनासीनं ब्रह्माद्यैः परिवारितम् ॥४२॥

मृत्युञ्जयः१—

त्रिनेत्रं षड्भुजं२ शान्तं जटाखण्डेन्दुमण्डितम् ।
कपालमालिनं श्वेतं योगासनं कजस्थितम् ॥४३॥
व्याघ्रचर्माम्बरं रुद्रं नागेन्द्रोरसि भूषितम् ।
त्रिशूलं चाक्षसूत्रं च३ बिभ्राणं दक्षिणे करे ॥४४॥
कपालं कुण्डिकां सव्ये योगमुद्रां करद्वये ।
कुर्यान्मृत्युञ्जयं देव मृत्युरोगविनाशकम्४ ॥४५॥

अर्धनारीश्वरः५—

ऊर्ध्वस्थो द्विभुजः कार्यस्त्वर्धनारीश्वरो हरः ।
वामाङ्गे ललना कार्या योषिदाभरणान्विता ॥४६॥
दक्षिणे पुरुषस्त्र्यक्षो जटानागेन्द्रसंयुतः ।
ईशे शूलं कपालं च वामे जात्परमथोत्पलम् ॥४७॥

उमेश्वरः६—

अर्धचन्द्रासनाब्जस्थो जटाखण्डेन्दुमण्डितः ।
कुण्डलालङ्कृतः सौम्यो द्विभुजो द्वीपिचर्मभृत् ॥४८॥
वामोरुस्थतुरूपोमा वामपाणिर्निगूढकः ।
मिथः संवीक्ष्यमाणास्यो याम्यहस्तस्थितोत्पलः ॥४९॥
देवीयाम्यकराश्लिष्टः स्कन्धाक्रो दर्पणेऽपरे (?) ।

---

१ अस्य० १२ सं. चि. द्र.। २ षट्करं, ख. घ. पा.। ३ तु, ख.ग्र. पा,। ४ शनम् , सू. अ. ग. पा.। ५ अस्य० १३ सं चि. द्र०। ६ अस्य० १५ सं, चित्रं द्र०। अत्र 'रुद्रैकादश' इति पाठः लिखितपुस्तकेषु।

विज्ञेयः शास्त्रविद्भिरूर्ध्वलिङ्ग उमेश्वरः ॥५०॥

रुद्राः१—

अजैकपादहिर्बुध्न्यो विरूपाक्षो विरोचनः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥५१॥
जयन्तो दशमो रुद्रः शुकप्रभोऽपराजितः ।
सद्यःप्रभृतिजौ द्वौ द्वौ तद्वत्कुण्ड्यब्जसंयुताः ॥५२॥
(२एकादश कचिद्रुद्रा हिमकुन्देन्दुसन्निभाः ।
जटेन्दुमण्डिताः सौम्यास्त्र्यक्षाः सर्पोपवीतिनः ।
वृषस्था वरदाः कुण्डीशूलपङ्कजपाणयः ॥५३॥

विष्णुः३ —

चतुर्द्वयष्टभुजं चारु कुर्याद्वा विष्णुरूपकम् ।
शङ्खचक्रभृतं वामे शेषे शान्तिगदाभृतम्४ ॥५४॥
पीतकौशेयवस्त्राढ्यमिन्दीवरसमप्रभम् ।
श्रीवत्सकौस्तुभोरस्कं पीनाङ्गं पृथुवक्षसम् ॥५५॥
किरीटकुण्डलोपेतं वनमालोपशोभितम् ।
प्रसन्नवदनं सौम्यं सर्वाभरणभूषितम् ॥५६॥
ऊर्ध्वं वाब्जस्थितैकास्यं तार्क्ष्यस्थं वा चतुष्करम् ।
शङ्खचक्रधरे कार्ये ५ तत्सौम्याग्नेयपार्श्वतः ॥५७॥
सरस्वतीश्रियौ तद्वद्वीणापद्मध्करे क्रमात् ।

---

१ अस्य० १६, १७, सं. चि. द्र. । २ चापचिन्हान्तर्गतोऽयंपाठः ख. पुस्तके नास्ति । ३ चतुर्भुज, द्विभुज, अष्टभुज, नारायणस्य क्रमेण १८, १९, २०, सं चि. द्र० । ४ करम् घ. पा. । ५ धरौ कार्यौ, घ. पा. । ६धर्म, मू. अ. ग. पा. । [ल. स. ७]

वामेऽभयप्रदं शेषे शङ्खहस्तं द्विबाहुकम् ॥५८॥
सौम्यरूपं गृहे कुर्याल्लम्बपाणि शुभप्रदम्[१] ।
क्रुद्ध उद्यतहस्तश्च प्रासादस्थः सदा मतः ॥५९॥
नीलवर्णश्चतुर्वक्त्रो भृशं चैवारुणेक्षणः ।
सन्दष्टौष्ठपुटः क्रुद्धो विष्णुरष्टभुजो मतः ॥६०॥
गदाखड्गेषुशान्तिश्च बिभ्राणो दक्षिणे करे ।
चक्रं चापं च खेटं च शङ्खं वामकरे तथा ॥६१॥
विष्णुश्चतुर्भुजो माली शङ्खचक्रगदाब्जभृत् ।
एकास्यश्चतुरास्यश्च त्रिमुखोऽथवा मये मते ॥६२॥

मत्स्यः[२]—

दैर्घ्यं कृत्वाष्टधा द्रव्यमूर्ध्वाधोमुखपुच्छकम् ।
तत्र्यंशविस्तरं चैव पुच्छोऽर्धं सप्तभागशः ॥६३॥
सूत्रस्य भ्रमणात्पृष्ठं[३] तद्वज्जठरवर्तनम् ।
हस्तौ क्रोडसमीपस्थौ पादौ जठरपार्श्वतः ॥६४॥
हस्ताङ्घ्री द्वित्रिभागाभ्यामर्धांशेनास्यकल्पनम् ।
अर्धाङ्गुलं तु तन्नेत्रं द्विसार्धैकार्धभागतः ॥६५॥
मस्तकाद्दुद्विदलं तस्य क्रमेण प्रविभज्य च[४] ।
शेषं रोहितवत्कुर्यान्मत्स्यरूपधरे विभौ[५] ॥६६॥

कूर्मः[६]—

वेदास्रकोणसूत्रार्धं तद्वेदांशैः प्रकल्प्य च ।

---

१ शुकप्रभम्, मू. अ.क. ग. घ.ङ. पा. । २ अस्य० २१ सं. चि.द्र. । ३ भ्रमणं द्दष्टं, क.ख. पा. । ४ तु, मू. अ. क. पा. । ५ हरेर्विधौ, क, ख. ग. घ. ङ. पा. । ६ अस्य० २२ सं.चि.द्र. ।

तद्वद्द्वयंशमध्यतो वृत्तं कलाहीनं तु पार्श्वयोः ॥६७॥
ऊर्ध्वाधयोः शिरोग्रीवा पुच्छं शेषे कराङ्घ्रिके ।
द्विगुणं पादतो दैर्घ्याद्ग्रीवां मस्तकसंयुताम् ॥६८॥
पृष्ठं समुन्नतं चारु पृथुवेदांशतोदरम्[१] ।
नासाक्षिनखकर्णादि ज्ञात्वा कूर्मं विवर्तयेत् ॥६९॥

वराहः[२]—

कन्धराष्टाङ्गुलायामा वदनं गोलकाष्टकम् ।
हनू तद्वक्त्रभागे च दैर्घ्यात्सप्ताङ्गुलौ मतौ ॥७०॥
सप्ताङ्गुलास्यनिष्क्रान्तं मात्रैका नासिकाबिलम् ।
दंष्ट्रे च त्र्यङ्गुले वक्त्रे सिनर्धिकलिकोपमे ॥७१॥
कर्णोच्छ्रायौ द्विनेत्रं च तन्मध्ये षोडशाङ्गुलम् ।
प्राङ्मानाद्यवहीनं तु चक्रारुणलोचनम् [३] ॥७२॥
आपादकण्ठपर्यन्तं नररूपं चतुर्भुजम् ।
गदाचक्राब्जशङ्खाढ्यमालीढकरणे स्थितम् ॥७३॥
श्रीर्ज्ञान[४]कूर्परस्था तु क्ष्मानन्तौ चरणानुगौ ।
एवं वराहरूपं स्याद्वनमालाविभूषितम ॥७४॥

नृसिंह[५]—

पूर्वरूपं घनं श्वेतमुच्चस्कन्धं सकेसरम् ।
नराङ्गं[६] सिंहवक्त्रं च वृत्ताक्षं भ्रुकुटीयुतम् [७] ॥७५॥

---

१ दलम्, मू. अ क. ग. घ. ङ. पा. ।
२ अध्य० २३ सं. चि. द्र० । ३ लोचने, घ. पा. । ४ ग्रीवां स, मू. अ. ग. पा. । ५ अध्य० २४ सं. चि. द्र० । ६ वराङ्गं, घ. पा. ।
७ मुखम्, मू. अ क. ग. घ. ङ. पा. ।

विवृतास्योग्रदंष्ट्रं च वामोरुकृतदानवम् ।
तद्वक्षो दारयन्तं च स्फुरच्चक्रगदाधरम् ॥७६॥
ग्रसन्तमिव लोकांस्त्रीन् दुःसहं दीप्ततेजसम्[1] ।
वनमालान्वितं कुर्यान्नरसिंहं जगत्प्रभुम् ॥७७॥

वामनः[2]—

प्राङ्मानं वामनं कुर्याद् द्विभुजं छत्रधारिणम् ।
जटिलं कुण्डिकायुक्तं गौरं श्यामारुणेक्षणम् ॥७८॥

त्रिविक्रमः[3]—

चतुर्भुजं गदापाणिं शङ्खचक्रधरं विभुम् ।
वामाङ्घ्र्याक्रान्तविश्वं च तद्वदेव[4] त्रिविक्रमम् ॥७९॥

परशुरामः[5]—

द्विबाहुं जटिलं तूणीकुठारेषु धनुर्युतः ।
श्यामवर्णो बृहद्वक्षो रामः क्षत्रान्तकारकः ॥८०॥

रामभद्रः[6]—

सौम्यरूपो विशालाक्षः किञ्चित्पीनो द्विबाहुकः ।
जटी चापेषुहस्तश्च रामः कार्यो दशास्यहृत् ॥८१॥

बलभद्रः[7]—

नीलोत्पलदलश्यामो द्विभुजः पीतवस्त्रभृत् ।
गदालाङ्गलधारी च रामः कंसान्तकारकः ॥८२॥

---

१ लोचनम्, ख. पा. । २ अस्य० २५ सं. चि. द्र० ।
३ अस्य० २६ सं. चि. द्र. । ४ च, मू. अ. क. पा. । ५ अस्य० २७ सं. चि. द्र० । अत्र 'वामनत्रिविक्रमः' इति पाठो वर्तते घ. पुस्तके । ६ अस्य० २८ सं. चि. द्र० । ७ अस्य २९ सं. चि. द्र. ।

बुद्धः १—

शान्तात्मा लम्बकर्णश्च गौराङ्गश्चीवरावृतः ।
ऊर्ध्वपद्मस्थितो बुद्धो वरदाभयकारकः ॥८३॥

कल्की २—

धनुस्तूणान्वितः ३ कल्की म्लेच्छोत्सादकरो द्विजः ।
गौरो वाजिस्थितः खड्गी कचित्पिङ्गललोचनः ॥८४॥

दशधाहरिः —

मत्स्यःकूर्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश ॥८५॥

केशवः ४—

ओतप्रोतास्त्रयोगेन ५ मूर्तिभेदो निगद्यते ।
ऊर्ध्वाधः करयोः शङ्खपद्मे दक्षिणतो मते ६ ॥८६॥
गदाचक्रे त्वधश्चोर्ध्वं वामपाण्योर्यथाक्रमम् ।
ज्वलदग्निसमाकारं कुर्यात्केशवरूपकम् ॥८७॥

नारायणः ७—

ऊर्ध्वाधः पद्मशङ्खौ च करयोर्दक्षयोस्तथा ।
वामयोश्च गदाचक्रे नीलं नारायणं वपुः ॥८८॥

---

१ अस्य० ३० सं. चि. द्र० । २ अस्य. ३१ सं. चि. द्र० । ३ तालान्वितः, ख. पा. । एकोलान्वितः, घ. पा. । ४ अस्य० ३२ सं. चि. द्र० । ५ अनुलोमविलोमेनेत्यर्थः । ६ दक्षिणभागतः, क. ख. पा. । ७ अस्य० ३३ सं. चि. द्र० ।

माधवः १—

सुदर्शनगदे चोर्ध्वमधश्चैवापसव्ययोः ।
सव्ययोः कम्बुपद्मे च माधवे रुक्मसन्निभे ॥८९॥

गोविन्दः २—

चक्रं गदा त्वधश्चोर्ध्वं वामयोः करयोः क्रमात् ।
ऊर्ध्वाधोऽब्जं च शङ्खं च गोविन्दे पिङ्गलात्मके ३ ॥९०॥

विष्णुः ४—

शङ्खमूर्ध्वमधश्चक्रं गदा चोर्ध्वमधोऽम्बुजम् ।
वामदक्षिणयोः कुर्यात्सिते विष्णौ क्वचिन्मते ॥९१॥

मधुसूदनः ५—

ऊर्ध्वाधश्चक्रशङ्खौ च क्रमाद्दक्षिणहस्तयोः ।
वामयोश्च गदापद्मे चन्द्राभे मधुसूदने ॥९२॥

त्रिविक्रमः ६—

दक्षिणोपरि हस्ते च गदा देयाम्बुजं त्वधः ।
चक्रमूर्ध्वमधः शङ्खं गौरे पूर्वत्रिविक्रमे ॥९३॥

वामनः ७—

उपर्यधश्च चक्रं च शङ्खं दक्षिणहस्तयोः ।
गदाब्जे शेषयोः पीते वामने पूर्वरूपके ॥९४॥

श्रीधरः ८—

दक्षिणोर्ध्वकरे चक्रं कुर्यादब्जमधः करे ।

---

१ अस्य. ३४ सं.चि.द्र०। २ अस्य. ३५ सं.चि.द्र०। ३ पिङ्गलात्मके, ख.पा। ४ अस्य० ३६ सं.चि, द्र०। ५ अस्य० ३७ सं.चि. द्र०। ६ अस्य० ३८ सं.चि.द्र०। ७ अस्य० ३९सं.चि.द्र०। ८अस्य० ४० सं.चि.द्र०।

गदाशङ्खं तथा वामे श्रीधरे विद्रुमोपमे ॥९५॥

हृषीकेशः १—

शङ्खपद्ममधस्तूर्ध्वं गदाचक्रं यथाक्रमम् ।
सुवर्णाभे हृषीकेशे पाण्योः सव्यापसव्ययोः । ९६॥

पद्मनाभः २—

दक्षिणोर्ध्वकरे पद्मं शङ्खं चाधस्तथापरे ।
गदाधश्चक्रमूर्ध्वं च पद्मनाभे सितप्रभे ॥९७॥

दामोदरः ३—

ऊर्ध्वं शङ्खमधः पद्मं चक्रं चाधो गदोर्ध्वतः ।
दक्षिणे चोत्तरे हस्ते देवे दामोदरेऽरुणे ॥९८॥

द्वादशधाहरि :—

वासुदेवात्त्रयो जातास्त्रयः संकर्षणात्क्रमात् ।
प्रद्युम्नाच्चानिरुद्धाच्च विज्ञातव्यास्त्रयस्त्रयः ॥९९ ।
पीताम्बरधराः सर्वे वनमालोपशोभिताः ।
मार्गादिकार्तिकान्तं च प्रोक्ता द्वादशमूर्तयः ॥१००॥

वासुदेवः ४—

शान्तं सितं कजारूढं वासुदेवं चतुर्भुजम् ।
योगमुद्रां च शङ्खं च गदाचक्रधरं द्वयम् ॥१०१॥
वाममुष्ट्यर्धमङ्गुष्ठे दक्षिणेऽङ्गुष्ठवेष्टनम् ।
मुद्रां कुर्याद्दधृदिस्थां च अशेषाघप्रणाशिनीम् ॥१०२॥

१अस्य० ४१ सं. चि. द्र० । २ अस्य० ४२ सं. चि. द्र० ।
३ अस्य० ४३ सं. चि. द्र० । ४ अस्य० ४४ सं. चि. द्र० ।

(संकर्षणः, प्रद्युम्नः, अनिरुद्धः, ४)—१

चतुर्दोश्चारुहेमाभं कुर्यात्संकर्षणं विभुम् ।
पात्रशान्तिधरं याम्ये वामके पद्मसोरिणौ ॥१०३॥
स्मरं चापेषुभृद्रक्तं मेघाभमनिरुद्धकम् ।
कौमोद्या हेतिराजेन पाञ्चजन्याम्बुजेन च ॥१०४॥
वामदक्षिणयोर्युक्तं कुर्यान्मूलचतुष्ककम् ।
नारायणादिपञ्चान्यत्पूर्वोक्तकरशस्त्रभृत् ॥१०५॥
तद्वद्ब्रह्मा च विष्णुश्च नरसिंहश्च सूकरः ।
एभिर्युक्तं नवव्यूहं ज्ञातव्यं दैशिकोत्तमैः ॥१०६॥

दत्तात्रेयः२—

दत्तात्रेयं विभुं ३ कुर्याद्द्विभुजं यौवनान्वितम् ।
वामोत्सङ्गधृतश्रीकमर्धचन्द्रासने स्थितम् ॥१०७॥
वामपाणिधृताम्भोजां सुरूपा४मायतेक्षणाम् ।
तद्दक्षिणं करं स्कन्धे देवदेवस्य दक्षिणे ॥१०८॥
सव्याश्लिष्टप्रियः कार्यो दक्षिणे मद्यपात्रकम् ।
पद्मस्थो घूर्णिताक्षश्च गात्रनर्तनकैर्वृतः ॥१०९॥
दत्तात्रेयस्त्वयं ५ वीरो भुक्तिमुक्तिप्रदायकः ।
अद्वैतेन विधानेन पूजनीयो विपश्चिता ॥११०॥

जलशायी ६—

पीतवासाश्चतुर्बाहुः शङ्खचक्रगदाधरः ।

---

१ एषां० ४५, ४६, ४७, सं.चि.द्र० । २ अस्य० ४८ सं.चि.द्र. । ३ हरिं, ख०ग०पा० । ४ सुभ्रु वां, ख०पा० । ५ दत्तात्रेयः स्वयं, क०पा० । ६ अस्य० ४९ सं०चि०द्र० ।

योगनिद्रापरावस्थः१ सुप्तोऽनन्ततनूपरि ॥१११॥
फणासप्तान्वितोऽनन्तः कार्यो मस्तोपरि प्रभोः।
पादलग्ना धरादेवी जलशायी ग्रहावृतः ॥११२॥

पद्मनाभः२—

पद्मनाभः श्रियायुक्तो भोगितल्पगतोऽपि वा।
नाभ्युत्थपङ्कजारूढः पितामहसमन्वितः ॥११३॥

कामः३—

कामोऽ४ गौरो युवा कान्तो रतिप्रीत्योस्तु मध्यतः।
साक्रीडो नन्दने रागी सदा चापेषुभृच्छुभः५ ॥११४॥

गरुडः६—

उपेन्द्रस्याग्रतः पक्षी गुडाकेशः कृताञ्जलिः।
तुङ्गघ्राणो७ नराङ्घ्रिर्वा पक्षिजङ्घो नराङ्गकः ॥११५॥
कृष्णास्यो हेमचन्द्राभो मूर्धादौ फणिभूषितः।
वामतानुगतो भूमौ तार्क्ष्यः पक्षसमन्वितः ॥११६॥

विश्वक्सेनः८—

इन्दीवरनिभश्चक्री पीतवासो गदान्वितः।
हलशङ्खधरो माली विश्वक्सेनो हरेर्गणः॥ ११७॥

बलदेवः९—

ऊर्ध्वं श्वेतं चतुर्बाहुं सहाभोगं हलायुधम्।
पद्मसीरधरं वामे शेषे मुशलगोद्वहम्१० ॥११८॥

---

१ धरावस्थः, ख.पा.। २ अस्य० ५० सं.चि. द्र०। ३ अस्य० ५१ सं.चि. द्र०। ४ कार्यो, घ.पा.। ५ भृत्स्तुतः, घ.पा.। ६ अस्य० ५२ सं.चि.द्र०। ७ तुङ्गघोणा, क.ख.पा.। ८ अस्य ५३ सं.चि.द्र०। ९ अस्य० ५४ सं.चि. द्र०। १० खाद्ययुगोद्वहम्, क०ख०पा०।

हरिहरौ१—

जटार्धमुकुटार्धं च नोर्ध्वलिङ्गेन२ चान्वितम् (?) ।
अर्धेऽर्धे भूषणैः स्वैः स्वैर्युक्तमूर्ध्वं कजस्थितम् ॥११९॥
चतुर्भुजं महात्मानं जटार्धार्धेन्दुभूषितम् ।
अक्षमालां त्रिशूलं च शङ्खं च कौमुदीं क्रमात् ॥१२०॥
दक्षिणोत्तरपाणिभ्यां बिभ्राणमथ ऊर्ध्वतः ।
पुंस्त्रीस्वरूपकं कुर्याच्छिवनारायणात्मकम् ॥१२१॥

ब्रह्मवर्गः३—

चतुर्मुखं चतुर्बाहुं लम्बकूर्चं महोदरम् ।
ब्रह्माणं व्रतिनं कुर्याज्जटामुकुटभूषितम्४ ॥१२२॥
पिङ्गाक्षं सौम्यरूपं च सोत्तरीयोपवीतिकम् ।
कृष्णाजिनं च तत्स्कन्धे वस्त्रं चाजिनवाससम् ॥१२३॥
अक्षमालां श्रुवं तस्य दण्डं वा दक्षिणे करे ।
स्रुवं५ कमण्डलुं वामे सकुशाज्यघटं तथा ॥१२४॥
हंसारूढं कजस्थं वा योगपट्टासनाद्६ न्वितम् ।
गायत्रीं चैव सावित्रीमृषींस्तत्पार्श्वयोस्तथा ॥१२५॥
जटिलांल्लम्बकूर्चांश्च वृद्धरूपांश्च लोमशान् ।
रिक्तवक्षोऽक्षिकुक्षींश्च साक्षमालाकमण्डलून् ॥ ६॥

---

१ हरिहरौ, इत्यपि पाठः ।अस्य० ५५ सं. चि. द्र० । २ नोर्ध्वं, घ. पा. । ३ अस्य० ५६ सं. चि. द्र० । अत्र तु एकस्यैव ब्रह्मणश्चित्रं वर्तते न ब्रह्मवर्गस्य । ४ भूषणम्, ख.पा. । ५ स्रुचं, घ.पा. ।६ योगपद्मासना, मू.पा. ।

चण्डी१—

हेमाभां रूपिणीं कुर्यात्त्रिनेत्रां यौवनस्थिताम् ।
रुद्रामूर्ध्वस्थितां चारु कुर्याद्विंशतिबाहुकाम् ॥१२७॥
शूलासिशक्तिचक्राणीषुशङ्खेन्द्रायुधाभयाः ।
डमरुं शक्तिकां याम्ये हस्ते सबिभ्रतीं सदा ॥१२८॥
नागपाशं च खेटं च कुठाराङ्कुशकार्मुकम् ।
घण्टाध्वजगदादर्शमुद्गरान् वामहस्तकैः ॥१२९॥
शङ्खादिपञ्चकं त्यक्त्वा तथा घण्टादिपञ्चकम् ।
कार्या दशभुजा चापि सैव देवी क्वचिन्मते ॥१३०॥
तदधो महिषश्छिन्नमूर्धा पतितमस्तकः ।
शस्त्रोद्यतकरः क्रुद्धस्तद्ग्रीवासम्भवः पुमान् ॥१३१॥
शूलभिन्नो वमद्रक्तो रक्तस्रङ्मूर्धजेक्षणः ।
सिंहेन खाद्यमानश्च पाशबद्धो गले भृशम् ॥१३२॥
याम्याङ्घ्र्याक्रान्तसिंहा च सव्याङ्घ्र्यालीढगासुरे ।
चण्डिकोद्यतशस्त्रेयमशेषरिपुनाशनी ॥१३३॥

नवदुर्गाः२—

नवपद्मात्मके स्थाने पूज्या दुर्गा स्वमूर्तितः ।
आद्यौ मध्ये तथेन्द्रादौ नवतत्त्वाक्षरैः क्रमात् ॥१३४॥
अष्टादशभुजैः कान्तरीनवदः स्तनोरुका ।

---

१ अस्य० ५७ सं.चि. द्र० । २ अस्य चित्रसंग्रहपुस्तके दुर्गा नाम्ना नवदुर्गा नाम्ना च चित्रद्वयं वर्तते ५९, ६०, स.चि. द्र० ।

मूर्धजं खेटकं घण्टामादर्शं तर्जनीं धनु ॥१३५॥
ध्वजं डमरुकं पाशं बिभ्रती वामकेऽन्यतः।
शक्तिमुद्गरशूलं च वज्रं खड्गमथाङ्कुशम् ॥१३६॥
शरं चक्रं शलाकां च एतैरेवायुधैर्युता।
शेषाः षोडशहस्ताश्च अञ्जनी१ डमरुं विना ॥१३७॥
रुद्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ॥१३८॥
नवमीचण्डिका चोग्रा२ मध्यस्थाग्निप्रभोदिता॥
रोचनाभारुणा कृष्णा नीला शुक्ला च धूम्रिका३ ॥१३९॥
पीता च पाण्डुरा४ ज्ञेया आलीढस्था हरिस्थिता।
महिषोत्थः पुमाञ्शस्त्री तत्कचग्रहमुष्टिकाः ॥१४०॥
स्थाप्या वृत्तेन पङ्क्त्या वा इत्युक्ताः स्कन्दयामले।
नवदुर्गाः प्रतिष्ठाप्य पुत्रार्थासुखमाप्नुयात् ॥१४१॥

उमा५—

पञ्चाग्निग्रहसंयुक्ता चतुर्बहुस्तपः स्थिता।
बिभ्रती दण्डिकाकुण्डयाक्षसूत्रं वरं क्रमात् ॥१४२॥
वामदक्षिणयोः पाण्योस्तपो गौरी महात्मिका।
सैव रम्भावने सिद्धाग्निहीना ललितान्यथा ॥१४३॥
स्कन्धमूर्ध्वकरा६ वामे द्वितीये धृतदर्पणा।
याम्ये फलाञ्जनीहस्ता सौभाग्या तत्र चोर्ध्विका७ ॥१४४॥

---

१ अञ्जली, मू. पा.। २ नवमी चण्डचोग्रा च, घ. पा.। ३ सूक्ष्मा च धूमिका, ख. पा.। ४ पाण्डरा, घ. पा.। ५ चित्रसंग्रहे पुस्तके उमाया गौरी नाम्ना चित्रं वर्तते। अत्रैव ललितासर्वमङ्गलाके-रम्भादीनां चान्तर्हितत्वात् तत्तन्नाम्ना ६१, ६२, ६३, ६४; सं चि. द्र०। ६ सूत्रकरा, क. ग. पा. ७ चोर्धिका, मू. अ. पा.

अर्धचन्द्रासनाब्जस्था स्तनाढ्या दट्चतुर्भुजा ।
त्रिनेत्रा जटिला सौम्या नानाभरणभूषिता ॥१४५॥
शान्त्यक्षसूत्रं पद्मं च बिभ्राणा दक्षिणे करे ।
अभयं कुण्डिकां शूलं स्थितं वामकरे सदा ॥१४६॥
याम्यर्धाङ्घ्रिसिंहपृष्ठस्था चतुर्बाहुः क्वचेन्मते ।
विनावरा भयाभ्यां तु कर्तव्या सर्वमङ्गला ॥१४७॥
द्विभुजा कैटभी काया गौरवर्णा सुरूपिणी ।
शय्यारूढा प्रसुप्ता च योगनिद्रा समाश्रिता ॥१४८॥

कालरात्री१—

एकवेणी जवा२कर्णपूरा नाना खरस्थिता ।
वंशोत्थकर्णिकाकर्णा तैलाभ्यक्तशरीरिणी ॥१४९॥
वामपादे च सल्लोहकृतखड्गकभूषणा ।
नग्नत्यूर्ध्व३ वजा कृष्णा कालरात्री भयङ्करी ॥१५०॥

महाश्रीः४—

वर्तुलास्या विशालाक्षी मध्यक्षामा सुयौवना ।
हेमवर्णाब्जसंस्था च पीनोन्नतपयोधरा ॥१५१॥
चारुसर्वाङ्गसंपूर्णा सर्वाभरणमण्डिता५ ।
सदा याम्यकराम्भोजा वामे श्रीः श्रीफलान्विता ॥१५२॥
चालव्यजनधारिण्यौ कार्ये तत्पार्श्वयोः स्त्रियौ ।
गजौ भृङ्गारहस्तौ च स्नापयन्तौ च६ पार्श्वतः ॥१५३॥

---

१ अस्य० ६५ सं. चि. द्र० । २ पवा, घ. पा. । ३ वर्धन्यूर्ध्व, मू. अ. क. ख. पा. । ४ अस्य० ६६ सं. चि. द्र० । ५ सयुता, ख. पा. । ६ यन्त्यौ तु, घ. पा.

सरस्वती१—

श्वेतवस्त्रा सुरूपा च श्वेताभरणभूषिता ।
पुस्ता२क्षमालिकाहस्ता वीणाभृद्वा सरस्वती ॥१५४॥

गङ्गा३—

श्वेता मकरसंस्था४ च ऊर्ध्वकाया सुशोभना ।
कुम्भेन्दीवरहस्ता च द्वारस्था जन्हुपुत्रिका ॥१५५॥

यमुना५—

कूर्मारूढाब्जहस्ता च द्वारस्था कलशान्विता ।
इन्दीवरदलश्यामा सुरूपा यमुना तथा ॥१५६॥

तुम्बुरुः६—

सितं गौरं वृषारूढं जटाहीन्दुविद्युतम् ।
द्वीपिचर्मधरं कुर्याद्वीणाहस्तं च तुम्बुरुम् ॥१५७॥
मातृणामादितो नित्यं शूलहस्तमथापि वा ।
अनन्तरं तु मातृश्च ब्रह्माण्याद्यास्तु सप्त च ॥१५८॥

ब्रह्माणी७—

गौरीं चतुर्मुखीं पीनामक्षमालास्रुवान्विताम् ।
कुण्ड्याज्यपात्रिणीं वामे ब्रह्माणीं हंससंस्थिताम् ॥१५९॥

रुद्राणी८—

त्रिनेत्रां शूलहस्तां च जटाखण्डेन्दुमण्डिताम् ।
कपालमालिनीं शुक्लां रुद्राणीं वृषसंस्थिताम्९ ॥१६०॥

---

१ अस्य० ६७ सं. चि. द्र० । २ सुता, ख. पा. । ३ अस्य० ६८ सं. चि० द्र० । ४ कमठसंस्था, ख. पा. । ५ अस्य० ६९ सं. चि. द्र० । ६ अस्य० ७० सं. चि. द्र० । ७ अस्य० ७१ सं. चि. द्र० । ८ अस्य० ७२ सं. चि. द्र० । ९ वृषभसंस्थिताम्, क. ख. ग. पा. ।

कौमारी१—

रक्तां शशिधरां देवीं रक्तमाल्याम्बरान्विताम्।
शिखिपृष्ठसमारूढां कौमारीं स्कन्दरूपिणीम् ॥१६१॥

वैष्णवी२—

चक्रशङ्खगदापद्मचतुर्हस्तां ३च ताक्ष्यगाम्।
श्यामां सुरूपिणीं कुर्याद्वैष्णवीं वनमालिनीम् ॥१६२॥

वाराही४—

कृष्णां पीनोदरां क्रूरां शूकरास्यां नकादिकाम्।
सुवस्त्रां यौवनोद्भिन्नां नार्याभरणभूषिताम् ॥१६३॥
वाराहीं महिषस्थां तु मदिरादण्डधारिणीम्।
खड्गखेटकसंयुक्तामथवापि चतुर्भुजाम् ॥१६४॥

इन्द्राणी५—

सहस्राक्षां गजारूढां हेमाभां वज्रधारिणीम्।
इन्द्राणीं सर्वसिद्ध्यर्थं वस्त्रालङ्कारसंयुताम् ॥१६५॥

चामुण्डा६—

गर्ताक्षीं क्षीणदेहां तु क्षामकुक्षीं भयङ्करीम्।
विवृतास्यां तु दंष्ट्रोग्रां शवे वा कौशिके स्थिताम् ॥१६६॥
(७लेलिहानां सुरक्ताङ्गीं ८ज्वलत्केशाभिमण्डिताम्।

---

१ अस्य० ७३ सं. चि. द्र०। २ अस्य० ७४ सं चि. द्र०। ३ चक्रखड्ग, मू. अ. ग. घ. पा.। ४ अस्य० ७५ सं० चि० द्र०। ५ अस्य० ७६ सं० चि० द्र०। ६ अस्य० ७७ सं० चि० द्र०। ७ चापान्तर्गतोऽयं श्लोकः मूल पुस्तके नास्ति। ८ सुरक्ताक्षीं, ख.ग.पा.।

द्वीपे चर्माम्बरां क्रुद्धां चामुण्डां मुण्डमालिनीम् ॥१६७॥

मातृरूपाणि१—

जटिलां वर्तुलाक्षां चतुर्बाहुं च बिभ्रतीम् ।
कपालं कर्त्रीं याम्ये पाशं शूलं च वामके ॥१६८॥
कपालकर्तरीयुक्तां द्विभुजां वापि पिङ्गलाम् ।
मातृस्थानेऽथवैकां वा तदन्ते च गणेश्वरः ॥१६९॥

कपालकर्तरीशूलपाशा भृद्याम्यसौम्ययोः ।
गजचर्मभृदूर्ध्वाभ्यां षड्दोः स्याद् रुद्रचर्चिका २॥१७०॥
सैव चाष्टभुजा देवी शिरोडमरुकान्विता ।
तेन सा रुद्रचामुण्डा३ नाट्ये ४श्वर्यथ नृत्यती ॥१७१॥
इयमेव महालक्ष्मी५ रूपाविष्टा चतुर्मुखी ।
नृवाजिमहिषेभांश्च खादन्ती चेत् करे स्थितान् ॥१७२॥

नरमुण्डकराम्यच्च शेषदोः सु च पूर्ववत् ।
एकास्या श्वेतवर्णा च श्वेताभरणभूषिता ॥१७३॥
पूर्वरूपकसंपन्ना नृत्यन्ती नातिरौद्रिका ।
दशबाहु६स्त्रिनेत्रा च शस्त्रासि डमरुं त्रिकम् ॥१७४॥

---

१ एषामुदाहरणानि ७८ तः ८६ पर्यन्तानि चित्राणि द्रष्टव्यानि । २ चित्रपुस्तके महालक्ष्मी विद्यते रुद्रचर्चिकैव समुचित इत्र पाठः । ७८ चित्रं द्रष्टव्यम् । ३ रुद्रचामुण्डायाः ७९ सं० चित्रं द्र० । ४ नाट्येश्वर्याः ८० सं चि० द्र० । ५ महालक्ष्म्याः ८१ सं० चि० द्र० । ६ शतबाहु, ख० पा० ।

बिभ्रतो दक्षिणे हस्ते वामे घण्टां च खेटकम् ।
खट्वाङ्गं च त्रिशूलं च सिद्धचामुण्डिकाऽह्वया ॥१७५॥
सिद्धयोगेश्वरी देवी सर्वसिद्धिप्रदायिका ।
एतद्रूपा भवेदन्या पाशाङ्कुशयुताऽरुणा ॥१७६॥
भैरव्याख्योपविष्टा तु भुजद्वादशभूषिता ।
वे .तालशाकिनीगृध्रकाकोलूकशिवाकुला ॥१७७॥
एताः सर्वाः श्मशानस्था महामांसाग्रभोजनाः ।
आद्याष्टकमिदं ख्यातं शेषभेदस्तु विस्तरः ॥१७८॥
क्षामा शिराावृता वृद्धा द्विभुजा विवृतानना ।
दन्तुराक्षेमकारी स्याद्भुमौ जानुकरास्थिता ॥१७९॥
यक्षिण्य३स्तु प्रदीर्घाक्ष्यः शाकिन्योऽ४ वक्रदृष्टयः ।
एङ्गा (?) हास्या महोदर्यो रूपिण्योऽप्सरसः५सदा ॥१८०॥

अथरुद्रगणाः

तत्रादौ योगेश्वरः६:—

नासाहङ्मुण्डितश्मश्रुः प्रशान्तो योगपट्टवान् ।
योगेश्वरोऽथ वीरश्च अर्धचन्द्रासने स्थितः ॥१८१॥
सव्याङ्गुलिवृताङ्गुष्ठं वाममाकुञ्चिताङ्गुलिम् ।
बध्वा विन्यस्य हृदयेऽथवोत्तानकरद्वयम् ॥१८२॥

---

१ अस्याः ८२ सं. चि. द्र० । २ अस्याः ८३ सं. चि. द्र० । ३ अस्याः ८४ सं. चि. द्र० । ४ अस्याः ८५ सं. चि. द्र० । ५ अत्रैव कचिच्चण्डः इत्यादि पाठः, चित्रपुस्तकेऽयोगेश्वरवीरेश्वर चण्डेश्वराणां चित्राणि वर्तन्ते क्रमशः ८७, ८८, ८९, सं. चि. द्र० ।

श्वेतस्त्र्यक्षो द्विबाहुश्च जटी टङ्काक्षमालिकः ।
प्रचण्डो दण्डधारी च कार्यश्चण्डेश्वरो महान् ॥ ८३॥

गणेरः—

गणेशः पुरुषाकारो गजकर्णो गजाननः ।
महोदरो वृहद्देह एकदन्तस्त्रिलोचनः ॥१८४॥

घनकायो वृहच्छुण्डो गाढजङ्घोरुजानुकः ।
दिव्याम्बरधरः कार्यो नागयज्ञोपवीतवान् ॥१८५॥

चतुर्दशाङ्गुलं तस्य विस्तारे[१]गाननं शुभम् ।
षोडशाङ्गुलकं दैर्घ्याच्छुण्डं षड्त्रिंशदङ्गुलम् ॥१८६॥

अर्काङ्गुल[२]पृथुग्रीवा त्र्यङ्गुला चोच्छ्रयेण तु ।
पीनः समुन्नतोरस्कः कर्तव्यो गणनायकः ॥१८७॥

सगर्ता[३]स्त्र्यङ्गुला कार्या नाभिविस्तरतो बुधैः ।
कण्ठगुह्यान्तरं कार्यं समं द्वात्रिंशदङ्गुलम् ॥१८८॥
ऊरुजङ्घे च कर्तव्ये पादौ च द्वादशाङ्गुलौ ।
मस्तकं निविडं व्यस्तं वाम[४]कुम्भसमुन्नतम् ॥१८९॥
कर्णौ दृगन्तविस्तारौ वाहुल्येनाङ्गुलौ मतौ ॥
रन्ध्रं रन्ध्राङ्गुलौ कुम्भौ तन्मध्ये सूत्रमानतः ॥१९०॥
दन्तकोशो[५]भवेत्तस्य शुण्डामूलं दशाङ्गुलम् ।
एकैकं ह्रासयोगेन यावद्द्वादाङ्गुलस्थितिः ॥१९१॥
छिद्रं सार्धाङ्गुलं चाग्रं[६]पुष्करेणा समाङ्गुलम् ।

---

१ अस्य०९० सं.त्रि.द्र. २ अर्धाङ्गुल, मू. पा. । ३ अगर्ता, ख. पा. । सुगर्ता, घ. पा. । ४ वात, मू.अ.पा. । ५ दन्तकोणे, क.ग.पा. । ६ चापं,मू. पा. ।

पञ्चतालप्रदैर्घ्यं च१चतुस्तालविवेशनम् ॥१६२॥
ताले ताले नेत्राङ्ग२ं क्षिप्त्वा स्थौल्येन वर्तयेत् ।
स्वदन्तं३दक्षिणे पाणौ वामहस्ते च लड्डुकम् ॥१६३॥
परशुं दक्षिणे दद्यादुत्पलं च तथेतरे४ ।
एतन्मानसमायुक्तं सर्वलोकहितावहम् ।
गणेशलक्षणं प्रोक्तं चतुर्हस्तं तु नान्यथा५ ॥१६४॥

हेरम्बः :—

नागपाशधरं वामे दक्षिणे साक्षमालिकम्७ ।
भुजाभ्यामधिकं कुर्यात्षड्भुजं पूर्ववच्च तम्८ ॥१६५॥
एभिर्युक्तं द्विहस्ताढ्यं दक्षिणैकं प्रसारितम् ।
वामं चाभयदं हस्तं शुभं चाष्टभुजान्वितम ॥१६६॥
वैशाखकरणैर्युक्तं नानाभरणभूषितम्९ ।
पद्माधस्तात्तु कर्तव्यो महाखु१०श्चारुरूपवान् ॥१६७॥
सितपद्मोपविष्टं तु पूर्वरूपं चतुर्भुजम् ।
षड्भुजश्चाष्टबाहुश्च प्रहृष्टस्ताण्डवाकुलः ॥१६८॥
गणेशस्य त्रिधा रूपं विघ्नघ्नं सर्वसिद्धिदम् ।
आद्यं सितं गृहेऽभीष्टं त्रिविधं सुरमन्दिरे ॥१६९॥

---

१ प्रदैर्घ्याङ्ग, क. ख. पा. ।२ नेत्राङ्कं, मू. पा. ।३ सुदण्डं, ग. पा. । ४ ततोत्तरे, घ. पा. ५ स्त्वतोऽन्यथा, क. ख. पाः। ग. पा. । ६ अस्य० ६१ सं. चि. द्र० । ७ मालितथान्यथा, घ. पा. । ६ अस्य० ६१ सं. चि. द्र० । ७ मालिनम्, क. ख. घ. पा. । ८ द्रुतम्, ग. पा. । ९ मण्डितम्, मू. पा. । १० महोक्ष, मू. अ. ग. घ. पा. ।

स्कन्धः१

पत्तने नगरे कार्यः पुरे वांथ षडाननः ।
भुजैर्द्वादशभिर्युक्तः स्कन्दो मुख्यः सुरूपकः ॥२००॥
शक्तिषुपाशनिस्त्रिंशतच्छेषरस्तर्जनीयुतः ।
शान्त्या च दक्षिणे हस्ते षड्भिर्वामकरे तथा २०१॥
शिखिपिच्छधनुः खेटपताकाभयकुक्कुटैः ।
गौणः चेत्रेऽथवा षड्दोरेकवक्त्रः प्रशस्यते ॥२०२॥
विभ्रच्छक्त्यसिवज्राणि दक्षे घण्टां च खेटकम् ।
यथाक्रमं सदा षड्भिर्दक्षिणोत्तरपाणिभिः ॥२०३॥
ग्रामे वा यदि वारण्ये द्विभुजं चैकवक्त्रकम् ।
विभ्रच्छक्तिं करे याम्ये ताम्रचूडं तथेतरे ॥२०४॥
रक्ताङ्गो रक्तवस्त्रश्च३बालरूपोऽथ मांसलः ।
शिख्यारूढस्तु शार्वोऽयं सर्वालङ्कारभूषितः ॥२०५॥

वृषभ४ः—

पिङ्गलाख्य५मतादुक्तं लिङ्गदैर्घ्य६तदात्मकम् ।
शिलाहेमादिलोहैर्वा वृषं कुर्याद्यथेप्सितम् ॥२०६॥
न चैव शङ्कराचार्याणां पुरो मतमतादिह ।
साधारणेषु लिङ्गेषु प्रस्तावाद्विहितो वृषः ॥२०७॥

---

१ अस्य० ६२ सं. चि. द्र०। अत्रैव एकवक्त्रकुमारस्य पृथक् चित्रद्वयं च वर्तते ६३, ६४, सं. चि. द्र०। २ ततदो, मू. पा.। ३ वस्त्रश्च, क. ख. पा.। ४ अस्य० ६५ सं. चि. द्र०। ५ पिङ्गलाक्ष, मू. क. ख. ग. घ. पा.। ६ लिङ्गदैर्घ्यात्, घ. पा.। अत्र क पुस्तकस्याटिप्पणी—लिङ्गदैर्घ्यं, दीर्घवृषं तदात्मकमिति, यद्द्रव्यमयं लिङ्गं तन्मयं वृषं कुर्यादित्यर्थः।

कर्मैतदेव तत्रापि क्रिया प्रान्ताध्वयोगिनी ।
लिङ्गत्र्यंशोक्षितः कार्यस्तद्वृद्धिरायतिविग्रहः ॥२०८॥

पीठपृष्ठसमो लक्ष्मद१लोपाहितलोचनः ।
शुभोन्मीलितदृग्लक्ष्म लिङ्गमस्तकमस्तकः ॥२०९॥

प्रसिद्धमन्यत्तद्रूपं तथाप्युद्देश उच्यते ।
दैर्घ्याच्चतुरशीत्यंशाश्चाङ्गुलं तेन कल्पनम् ॥२१०॥

मानानां गोलकादीनां तैरङ्गोपाङ्गसंहतिः ।
अष्टनेत्रपृथुत्वं स्यात्प्रोच्चैस्तद्वक्त्रदीर्घता ॥२११॥

नेत्रे नेत्र३समे दैर्घ्यात्तदर्धं विस्तरेण तु ।
तन्त्रिभागं तु तारा स्याज्ज्योतिस्तत्पञ्चमांशतः ॥२१२॥

नेत्रार्धं तु४ भ्रुवोः स्थौल्यं दैर्घ्यं ताभ्यां द्विनेत्रकम् ।
नासाङ्गुलप्रमावृत्ता५ द्विनेत्रं शुषिरान्तरम्६ ॥२१३॥

षड्नेत्रविस्तरं तत्र मूले तस्योर्ध्वतः७ पुनः ।
पञ्चनेत्रं तु विस्तारं तदूर्ध्वं तु विवर्धते८ ॥२१४॥

नेत्रान्तरं द्विनेत्रं स्यात्त्रिनेत्रौ तु कपोलकौ ।
चतुर्नेत्रोभयोः९ पार्श्वे वक्त्रमानं तु सन्धितः ॥२१५॥

कर्णमूलात्तु वक्त्रान्तं पञ्चनेत्रं प्रकीर्तितम् ।
तन्मूले सप्तविस्तारं कर्णमूलसमन्वितम् ॥२१६॥

---

१ लक्षाद्र, क.ग.पा. । २ वृतरर्शी, ग.पा. । ३ नेत्रे नेत्रे, मू.पा. । ४ नेत्रद्विकं, मू. अ. क. पा. । ५ प्रमोद्वृत्ता, मू. पा. । प्रमाद्वृत्ता, क.ख.पा. । ६ स्वशिरान्तरम्, मू.पा. । ७ तस्यार्धतः, मू.क.ग.पा. । ८ विवर्जयेत्, मू.पा. । ९ नेत्रे तयोः, मू.अ.क.ग.पा. ।

कर्णमूलं कलादैर्घ्यं चतुर्नेत्रं कृशाग्रतः ।
अङ्गुलार्धसमं यावन्मूलं पङ्कजवर्तुलम्१ ॥२१७॥
तन्मध्ये शुषिरं तद्वद्भ्रूरेखा तु शङ्कुली ।
कर्णमूलात्तु नासाग्रं सूत्रहासान्नयेत्समम् ॥२१८॥
किञ्चिल्लम्बोर्ध्वकायः२ स्याद्धनुभ्यां शोभनं तथा३ ।
शङ्खमूलं द्विनेत्रं स्यादग्रमग्रे नेत्रपादकम् ॥२१९॥
तद्वदमन्तसमं४ तास्यामन्तरं तु द्विनेत्रकम् ।
पार्श्वपिण्डी द्विनेत्रार्धं षड्नेत्राग्राचट्टुः५ स्मृतः ॥२२०॥
अष्टनेत्रा स्मृता ग्रीवा ककुदं च त्रिनेत्रकम् ६ ।
द्विनेत्रोच्छ्रयतोर्ध्वं७ स्याद्वृत्तमूर्ध्वं८ यथा भवेत् ॥२२१॥
ककुदाधो९ऽष्टनेत्रेण पञ्चजङ्घा कला मता ।
सन्धिर्नेत्राधिकः१० प्रोक्तश्चतुर्नेत्रोपजङ्घिका ॥२२२॥
द्वयर्धनेत्री११ तु तस्याधो गुल्फौ नेत्रद्वयं खुरौ ।
गुल्फार्धं खुरिकानेत्रं पादः स्यात्परिमाणतः ॥२२३॥
दशसप्तादिभिर्हीने न्यूने१२ जङ्घा तु नाहतः ।
चतुर्दशादि तद्वच्च त्रिहीने चोपजङ्घिका ॥२२४॥
नेत्राष्टादशकं पृष्ठं त्रिनेत्रं त्रिकटं पुनः ।
षड्नेत्रान्तस्तथा ज्ञेया तस्मात्स्यात्पुच्छसन्ततिः २२५॥

---

१ वर्तनम्, मू. पा.। २ भागः, मू. अ. क. ख. ग. ङ. पा.। ३ यथा, मू. पा.। ४ तद्वा/सान्तु, क. ख. पा. ५ श्रावट्टुः, ग. पा.। ६ द्विनेत्रकम्, ख. पा.। ७ ऊर्ध्वं मू. पा.। ८ ऊर्ध्वं, क. ग. पा.। ९ धो ९ र्ध, मू. पा.। १० सद्विनेत्राधिकः, मू. पा.। ११ द्यर्धनेत्रे, क. पा.। १२ स्थूल, क. ग. पा.।

द्विनेत्रा पुच्छमूले स्यादग्रेऽङ्गुलसमा यथा।
तालत्रयं प्रदीर्घं स्यात्तालार्धं केशसंहतिः ॥२२६॥
दशनेत्रपृथु पृष्ठं सन्धौ मध्ये द्विभिर्विना२।
त्रिभिर्विना तथाग्रे स्याद्द्विनेत्रं कम्बलस्त्वधः ॥२२७॥
कुक्षिदेशे समाख्यातो नाहः स्यात्तु चतुर्गुणः।
त्रिगुणास्तु स्मृतोऽन्यत्र नाभिर्नेत्रद्वयं भवेत् ॥२२७॥
द्विनेत्रं वृषणं तद्वद्विस्तारात्पञ्चनेत्रकाः।
जङ्घा नेत्रं स्मृत, सन्धिः षड्नेत्रा चोपजङ्घिका ॥२२६॥
द्विनेत्रौ गुल्फकौ विद्धि खुरः सार्धाङ्गुलाधिकः
खुरिकेऽङ्गुलिमाने तु पञ्चनेत्रत्रयं विना॥२३०॥
तालनाहं त्रिभिर्ह्रासात्प्रदेशैः परिकल्पयेत्।
पृष्ठगर्ता च विज्ञेया यङ्गुलाधाङ्गुलं यथा ॥२३१॥
पृथुत्वेनाङ्गुलात्पादाद्यथाग्रे तु गभीरता।
त्रिमुखा त्रिकलोन्हासः पृष्ठतश्चोपजङ्घिका ॥२३२॥
यद्यथा लभते शोभां यत्ताथाङ्गानि कारयेत्।
विश्वकर्मात्पुनश्चान्यं वृषं वक्ष्यामि लाघवात् ॥२३३॥
जीवदैर्घ्यं सम नाहं तदर्धं तस्य विस्तरम्।
क्षेत्रं वेदात्मकं कृत्वा नवभागान्प्रकल्पयेत् ॥२३४॥
नवांशैस्तु३ भवेत्पीठं त्रिचतुर्भिस्तु जङ्घिका।
त्रिभागैरग्रतो४ जङ्घा भागैकं तूर्ध्वतो हरेत् ॥२३५
अधोऽर्धंशांशं५ ततो हत्वा सार्धांशेनस्य नासिका।

---

१ दङ्ग, घ.पा.। २ त्रिभिर्विन, मू.पा। ३ नवाङ्गैस्तु, ख.पा.।४ रूर्ध्वतो, मू.पा.।५ मुखोऽर्धांशं, ग.पा.। अर्धांशं च, घ.पा.।

हृत्वा१ भागद्वयं चोर्ध्वं कार्यं नासाललाटकम् ॥२३६॥
कोणसूत्रहृतार्धांशौ २ शेषार्धे शृङ्गमादिशेत् ।
तदर्धांशात्तथा लुप्त्वा कर्णौ कृत्वा तु शृङ्गवत् ॥२३७॥
ऋतुसार्धेषु३ सार्धाग्निभागांस्तु क्रमशो हरेत् ।
कर्णाधः कोणसूत्रं तु दन्तोर्ध्वार्धं हरेध्द्रुवम् ॥२३८॥
द्व्यर्धास्या चैवभागेन चूडं कुर्याद्विचक्षणः ।
सार्धभागद्वयेनैव पृष्ठस्य परिकल्पनम्४ ॥२३९॥
कर्णसूत्रार्धं भागेन श्रोणी पुच्छोपरिस्थिता ।
भागोऽंशं गृह्य चार्धांशे त्यक्त्वार्धं कोणसूत्रतः ॥२४॥
तथैव कोणसूत्रार्धभागं टङ्कं प्रकल्प्य च ।
स्फिचं पुच्छं सकेशं च वर्तयेन्मतिमान्नरः॥२४१॥
क्रोडं सार्धांशतः५ कुक्षिं खुर६योरन्तरे खुरम् ।
जानुरन्ध्रं तथा सक्थिसन्धिं जङ्गा खुरं बुधः॥२४२॥
त्रिनेत्रं कम्बलोपेतं घण्टाचामरभूषितम् ।
ज्ञात्वा लक्ष्मं प्रकुर्वीत वृषंवृष भरूपकम् ॥२४३॥

नन्दी—७

युवा त्र्यक्षो जटाचीर ८ [रो?] रक्तकायो द्विबाहुकः ।
साक्षमाली त्रिशूली च नन्दीशो द्वारपालकः॥ २४४॥

---

१ कृत्वा, मू.पा.।२ कृतार्धाङ्गो,ख.पा.। ३ सार्धे तु, मू.पा. ४ परिकल्पना, क.पा.।
५ क्रोडसार्धांशतः, मू.पा.। ६ घ.पुस्तके-खुरशब्दस्यस्थाने क्षुरशब्दो वर्तते सर्वत्र, ७ अस्य ९६ च.द्र०। ८ जटाधारी, क.ख.पा.।

महाकाल:१—

चतुर्बाहुर्विशालास्यः २ पीनाङ्गश्च मनोहरः।
कूर्चवान पिङ्गकेशश्च मुण्डमाली त्रिलोचनः॥२४५॥

तत्करेऽसि नृक यास्ये शूलं खेटं च वामके।
कृष्णगात्रो महाकालो द्वारे वै वामतः स्थितः॥२४६॥

भृङ्गिः ३-

कृशः शिरावनद्धाङ्गस्त्वस्थिचर्मावगुण्डितः।
वृद्धरूपः शिखी हृष्टः क्षामकुक्षिः सुपाण्डुरः॥२४७॥
त्रिनेत्रः शूलपाणिश्च कौपीनी घृष्टकूर्चकः।
भृङ्गिरीटीगणाश्चैव नृत्यन्नित्यं शिवाग्रतः॥२४८॥

कूष्माण्डः४-

त्र्यक्षः श्वेतोऽतिखर्वश्च स्थूलमूर्धाङ्गकुक्षिकः।
दण्डी करण्डकोपेतः कूष्माण्डःपूर्वमानतः॥२४९॥

गणमूर्तिः५-

नानारूपधराश्चान्ये वीरभद्रादयो गणाः।
कार्यास्ते गजगोकर्णा नानावक्त्रा महोदराः॥२५०॥

घण्टेशः६-

उग्रतेजा सितो रौद्रः करालो रक्तवृत्तत्रयः
लेलिहानः सुलंकुद्धो जटाखण्डेन्दुमण्डितः॥२५१॥

१अस्य०९७ सं.चि.द्र० । २ विशालाक्षः,घ.पा. । ३ अस्य० ९८ सं.चि
द्र० । ४ अस्य० ९९ सं.चि.द्र०। ५ गणस्य चित्रं नास्ति । ६ अस्य०
१०० सं.चि द्र०।

दंष्ट्राकरालः पीनाङ्गो वृहन्नाघोच्चसंस्थित;१ ।
अष्टादश भुजो भीमो ज्वलदायुधपाणिकः ॥२५२॥
वज्रासिदण्डचक्रेषु मुसलाङ्कुशमुद्गरैः ।
निन्धन्दक्षिणाहस्तैश्च पापरोगमधः स्थितम् ॥२५३॥
तर्जनीं खेटकं शक्तिं कपालं पाशकार्मुकम् ।
घण्टाकुठारकं वामैः विभ्रद्द्वाभ्यां त्रिशूलकम् ॥२५४॥
घण्टाकर्णो विधातव्यो घण्टाभरणभूषित; ।
घण्टामालाकुलो देवः पुण्डरीकाजिनाम्बरः ॥२५५॥

आदित्यः२—

एकचक्रो रथो दिव्यस्तार्क्ष्याग्रज३सुसारथिः ।
तुरगैः सप्तभिर्युक्त ऊर्ध्वं तत्रास्थितो रविः ॥२५६॥
लम्पाकश्च विपाकश्च श्वेतश्च शङ्खनन्दनः ।
कपिलः हेमसद्रश्च भवसेनो हयाः कांचत् ॥२५७॥
गायत्री वृहती चोष्णिग् जगती त्रिष्टुवेव च ।
अनुष्टुप्पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः ॥२५८॥
वृहद्वक्षः सुरक्तश्च खेलावान् वा मुकुट्यथ ।
सहस्रांशुर्महातेजा मणिकुण्डलमण्डितः ॥२५९॥
कूपुसाङ्घ्रिः४ समीपासिः कवचच्छन्नविग्रहः । (१)
सनालपत्रे राजीवे विभ्रत्स्कन्धे करे क्रमात् ॥२६०॥
दण्डी तद्दक्षिणे गौरः स्थूलतुन्दिलकूर्चवान् ।
मसीभाजनलेखन्यौ धारयन्हस्तयोर्द्वयोः ॥२६१॥

---

१ घोर्ध्वसंस्थितः क.ख.पा. २ अस्य० १०१ सं. चि०द्र० । ३ नुज;मू०अ.क.ख.पा.। ४ ककुपाङ्घ्रिः मु.पा. कुपुपा ङ्घ्रिः;क.ख.पा.

पिङ्गलो वामपार्श्वे तु प्रतिहारश्च दण्डतृ।
वालव्यजनधारिण्यौ राज्ञीछाये१तु पार्श्वयोः२ ॥२६२॥
आलीढकरणस्थातु सन्ध्या चापकरान्विता।
आकृष्टकर्णबाणाच पार्श्वे दक्षिणके स्थिता ॥२६३॥
वामे चैव तथा विद्या मध्यतः सर्वतोमुखी॥
अथवाश्वसमारूढः कार्य एकस्तु भास्करः ॥२६४॥

द्वादशधादित्यः-३

अग्रे ध्यानरस्कन्धोऽर्धांङ्जभृच्छान्तिदोऽभयी।
मध्ये कुण्डयक्षमालावान् पूर्वार्धे४वेदिकाकरः ॥२६५॥
तर्जन्यसिसपुस्तः स्यादादित्योऽथ महारूचः।
अन्ये यमादिवन्यह्यन्ताद्दृश्चतुर्हस्ता द्विषड्दले ॥२६६७॥
वरदाद्यङ्जिन ७ सर्वे दिक्पालास्त्रकराः क्रमात्।
मुद्गरस्तृणिचक्रस्तु८भुंतोऽन्ऽग्न्यादिविदिक्स्थिताः ॥६७७॥
वरुणः सूर्यनामा च सहस्रांशुस्तथापरः ॥२६८॥
रविश्च९वाथ पर्जन्यः त्वष्टा मित्रोऽथ जिष्णुकः।
एतेऽर्का द्वादश ज्ञेया मेषादि१०राशिसंस्थिताः ॥२६९॥

---

१ संज्ञाछाये, इति साधु पाठो भवेत। २ पार्श्वतः, मू.अ.ग.पा.। ३ एषां चित्राणि न सन्ति, केवलं द्वादशकोष्ठेषु द्वादशादित्यनामान्येव निर्दिष्टानि। ४ मूर्ध्न्यर्धे, क.ख.घ.पा.। ५ वेणिकाकरः क०ख०ग०पा०।
६ रक्षान्ता, क.ख.ग.घ.पा.। ७ ध्यक्षिनः, मू.अ.क.ग.पा.। ८ स्रुग्वन्तो, मू.पा.। ९ हविः, ग.पा.। १० झषानि, घ.पा.।

कृष्णो रक्तो मनाग्रक्तः पीतः पाण्डुरकः सितः ।
कपिलः पीतवर्णश्च शुकाभो भ्रघलस्तथा ॥२७०॥
धूम्रो नील इति ज्ञेया वर्णा एषां यथाक्रमम् ।
इडा सुषुम्ना विश्वार्चिर्बिन्दु संज्ञा प्रमर्दिनी ॥२७१॥
प्रहर्षिणी महाकाली कपिका च प्रबोधिनी ।
नीलाम्बरा घनान्तः स्था अमृताख्या च शक्तयः ॥२७२॥
वरुणादिक्रमा ज्ञेयाः शक्तयो द्वायशैव तु ।
स्वदेवरुपवर्णास्ताः केसराग्रेषु विन्यसेत् ॥२७३॥

द्विधा मार्तिण्डः१—

मार्तण्डः पूर्ववत्कार्य २ श्चतुर्बाहुर्विशेषतः ।
दक्षिणो शूलधारी च वामहस्ते कपालभृत् ॥२७४॥
शूलशङ्खासिभृत्सव्ये हलपाशकपालकम् ।
धारयन्नितरे हस्ते द्वाभ्यामञ्जौ करानकैः ॥२७५॥

व्योमः४ (गोरूपः)

व्योमं सूर्यागृतः ५ कुर्याच्छृङ्गैर्द्वाशभिर्युतम् ।
चतुर्भिरष्टभिर्वापि मध्येऽब्जेऽष्टदद्दलान्वितम् ॥२७६॥
जीवतुल्यपृथुच्छायं कृतास्रं षोडशांशकम् ।

---

१ अस्य १०३, १०४ सं.चि.द्र० । २धउज्ञेयः, ख.पा. । ३ हल, क. ग.पा. । ४ अस्य० १०५ सं.चि.द्र० । ५ सूर्याश्रितः, ख.पा. । ६ सोऽष्ट.पा.

वेदांशपातनात्कोण मष्टांशेऽथ कम्बलम्१ ॥२७७॥

द्विद्व्येकरद्व्येदुयेकपक्षद्वि३युगांशौः४ षोड्शोच्छ्रितैः ।

ऽयंशप्रवेशनात्कण्ठादेकैकनिर्गमं खुरम् ॥२७८॥

कुम्भं क्रमात्पटीं चैव गलकं कण्ठपट्टिकाम् ।

घण्टां च मेखलां चैव कुर्याच्छृङ्गाणि कोणतः ॥२७९॥

रैवन्तः५—

अश्वारूढो युवा कार्यो६ द्विकरश्चारूगात्रकः ।

कुपुसीमालकाच्छन्नो७ (?) रक्ताङ्गो भूषणान्वितः ।

वामे लम्बनपाणि :८स्या दक्षिणे मद्यपात्रधृक्९

प्रालम्ब्यासक्त१०रैवन्त११श्छत्रधारादिभिर्युतः ॥२८०॥

रविपरिवारः१२—

रक्तकाया महातेजा द्विभुजः खड्गपद्मधृक् ।

नानारत्नसुवेशाढ्या१३श्चण्डतेजाः स्वभावजाः ॥२८१॥

नवग्रहमूर्तयः १४...

प्राग्रूपं१५ केवलं कुर्याद्ग्रहाणामग्रतो रविम् ।

---

१ कन्धगम्, ख.पा. । २ सिद्व्येक, मु.अ.पा. । ३ पक्षार्ध ख.पा. । पक्षादि, घ.पा. । ४ यतीशैः, ख.पा. । ५ अस्य० १०६ सं. चि. द्र० । ६ युवाकारो, घ.पा. । ७ गोलकाच्छन्नो, मू, अ. ग. पा. । मोलकाच्छन्नो, घ.पा. । ८ वलनयाणिः, क. पा. । वरणपाणिः, ख.पा. । लम्बनपाणिः, ग. घ.ङ.पा. । ९ पात्रकम्, मू. पा. । १० पालम्ब्याध्य, मू. पा. ११ रैवन्तु, घ.पा. । १२ अस्य चित्रोदाहरणं नास्ति । १३ सुखेस्याढ्या, घ. पा. । १४ एषां चित्रोदाहरणानि चित्र संख्या १०७ तः, ११५ पर्यन्तानि क्रमेण द्रष्टव्यानि । १५ प्राङ्मूखं, क. पा. ।

सोमं सौम्यं तथा श्वेतं कुण्डिकाजाप्यमालिनम् ॥२८२॥
त्रिनेत्रं भान्वितं रक्तं कुजं शक्त्यक्षमालिनम् ।
बुधं श्यामं युवानं च रूपिणं चापपाणिनम् ॥२८३॥
वृद्धं गौरं गुरुं पीनं१ साक्षमालं सकुण्डिकम् ।
यास्यैकाक्षं सितं शुक्रं कुण्डिकामन्त्रमालिकम् ॥२८४॥
कृष्णं पङ्गुमधोदृष्टिं खिङ्खिरीजाप्यमालिनम्२ ।
व्यावृत्तास्यं सहास्यं च पिङ्ग भ्रूश्मश्रुलोचनम् ॥२८५॥
अर्धचन्द्रकरं राहुमर्धदेहं सुरक्तकम्३ ।
त्रिफणं४ धूम्रवर्णाभं नरनागार्धरूपिणम्५ ॥२८६॥
दीप्तखड्गधरं६ केतुमथवापि कृताञ्जलिम् ।
एतांस्तु द्विभुजान्सर्वान्भूषणाम्बरसंयुतान् ॥२८७॥
हयं ग्राहं मयूरं च श्वहंसौ भेकरासभौ ।
शकटं मेषमेतेषामधो यानं क्रमात्सदा ॥२८८॥

अष्टनागमूर्तयः७ ...

अनन्तो रक्तकायश्च शिरः पङ्कजमौलिकः ।
सितः सहस्रभोगो हीश्वरः८ कुवलयान्वितः ॥२८९॥
रक्ताङ्ग९ः स्वस्तिकोपेतः सुतेजास्तक्षको महान् ।
कृष्णः कर्कोटकः कण्ठे शुल्करेखात्रयान्वितः ॥२९०॥

---

१ पीतं, मू.अ.ख.ग.ङ.पा.। २ शङ्खिजी, लि.पु.पा. खिङ्खिरीतु घ. पु. पा.। ३ सुवक्त्रकम्, क. ग. पा.। ४ त्रिफलं. मू. अ. क. ख. पा.। ५ नरं घ. पा.। ६ दीप्तखड्ग, क. पा.। खड्गं दीप, ख. पा.। ७ एषां चित्रोदाहरणानि चित्रसंख्या ११६ तः १२३ पर्यन्तानि क्रमेण द्रष्टव्यानि। ८ ह्री शिरः मु. अ. पा. ९ रक्ताङ्गः, घ० पा०।

रक्तपद्मनिभःपद्मशिरः शुल्कः सुबिन्दुमान् ।
शङ्खवर्णो महापद्मो मस्तके कृष्णशूलधृक्[१] ॥२६१॥
हेमाभः शङ्खपालः स्यात्सितरेखाधरो गले ।
कुलिको रक्तदेहस्तु चन्द्रार्ध[२] कृतमस्तकः ॥२६२॥
पङ्गा ३ (?) द्विबाहतः सप्तफणा मणिसमन्विताः ।
अक्षसूत्रधराः सर्वे कुण्डिकापुच्छसंयुताः ॥२६३॥
पञ्च भोगास्त्रि भोगा[४] वा तेषां जायासुतादयः
भृत्याश्चैकफणाः कार्यास्तद्रूपा मणिवर्जिताः ॥२६४॥

मनसा[५]:—

सप्तभोगासिता सौम्या द्विभुजा सर्पधारिणी ।
हारकुण्डलकेयूरैः सदाभरद[६]णभूषिता ॥२६५॥
घटपद्मोपविष्टा वा वरदो ध्यानतत्परा ।
ईदृशी मनसा कार्या श्रीकण्ठमनसम्भवा ॥२६६॥

जरत्कारुः—७

द्विबाहुलम्बकर्णश्च जरत्कारुः कृशोदरः ।
योगपट्टावृतोऽब्जस्थः कुण्डिका चाक्षसूत्रभृत्[८] ॥२६७॥

मनसापरिवारः—६

फणैकचारुरक्ताङ्गा द्विभुजाः शिशुरूपिणः ।
नानालङ्कारसंयुक्ताचुत्पलमणि भृतकरौ ॥२६८॥

---

१ शूलकम्, क० पा० २ चान्द्रार्क. ग० पा० ।
३ व्रहा, घ०पा०। ४ भोगफणागा, क०पा०। ५ अस्य० १२४ सं०चि०द्र । ६ सर्वाभरण, क०पा०। ७ अस्य० १२५ सं०चि० द्र०। ८ धृक्, मू०अ०क०पा० । ६ अस्य० १२६ सं०चि०द्र० ।

स्वङ्गदेवी १—

श्यामलाङ्गी घनोरस्का २ सप्तभोगा चतुर्भुजा।
सुदृष्टा ३ जल्पमाना च स्वोत्सङ्गे पुत्रधारिणी ॥२९९॥
पर्णवल्लि४ धरा पाणौ नानालङ्कारभूषिता।
पद्मा ५ नन्दनपद्मस्य स्वाङ्गादेवी ६ प्रकीर्तिता ॥३००॥

नक्षत्राणि७:—

हयेभच्छागनागाश्व श्वशूकरसमाननाः।
वसुकोककपिद्विक्ष८ व्याघ्रव्याघ्रास्यकं क्रमात् ॥३०१॥
लुलाययुग्महर्यक्षसिंहमार्जारवक्त्रकम्।
रक्षोद्वितयकुम्भीर९ सर्पचक्रास्यकं१० च भम् ॥३०२॥
मृगऋक्षखरोष्ट्रास्यमश्विन्यादि द्विदोऽन्त्जु।
अश्विनौ च यमो वन्हिः प्रजेन्द्रेन्दुहरोऽदितिः ॥३०३॥
गुरुः सर्पः पितायोनिरर्यमा सविता क्रमात्।

---

१ अस्य० १२७ सं चित्र०द्र०। २ घनोरुष्का, घ०पा०। ३ सुकृष्णा, ग०पा.। ४ पर्णिवेल्लि, घ०पा०। ५ पर्णा, घ०पा०। ६ सुनादेवी, घ०पा०। ७ एवां चित्रोदाहरणानि चित्रसंख्या १२८ तः १५४ पर्यन्तानि क्रमेणाश्विन्यादिनक्षत्राणां चित्राणं द्रष्टव्यानि तानि चप्रायेण लक्षणे न सम्मिलितानि। ८ द्विक, घ०पा०। ९ कुम्भीरः नक्राभिधोजलचरः। किन्त्वस्य चित्रोदाहरणे शुकाभिधः पक्षिविशेषो वर्तते। श्लोकानुसारेण नक्राभिधो जलचर विशेष एव भवितुमर्हति। १० नक्रास्यकं, क.ख.पा.। ३

त्वष्टा वायुः सुरेन्द्रोऽग्निर्मित्रेन्द्रौ यात्वपाम्पतिः१ ॥३०५॥
विष्णुर्वसुरजैकादिपादंर्हिर्बुध्नर२ पूषकाः ॥३०६॥

राशयः-३

मत्स्यौ द्वौ च भवेन्मीनो रिक्तकुंम्भो नरो घटः।
पुमान् गदी सवीणा च योषित्त४ न्मिथुनं धनुः॥३०७॥
अश्वजङ्घो नरश्चापी मृगवक्त्रो नरो ऋषः५ (१)।
स्त्री नौस्थोल्कासिभृत्कन्या तुलाधारो नरस्तुला ॥३०८॥
मेषाद्याः पञ्च चैवान्ये६ स्वनामतुल्यरूपकाः ॥३०९॥

इन्द्रः-७

सहस्राक्षो गजारुढो वज्रहस्तो द्वि८ बाहुकः।
हेमाभः सकिरीटश्च देवराजः सुरावृतः ॥३१०॥

अग्निः-९

पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः।
छागस्थः१० साक्षसूत्रोग्रः सप्तार्चिः शक्तिधारकः ॥३११॥

यमः-११

ईषत्पीतो१२ यमः कार्यो दण्डहस्तो भयङ्करः।
रक्तदृक्पाशभृत्कृष्णो महिषस्थोऽद्भुतवान् ॥३१२॥

---

१ यातुधाम्पतिः, मू.पा.। २ रजैकाद्यहिर्बुध्न, घ.पा.। ३ एषां चित्रोदाहरणानि चित्रसंख्या १५५ तः १६६ पर्यन्तानि द्रष्टव्यानि। ४ योषिच्च, क.ख.घ.पा.। ५ दृषः, ख.पा.। झषे, घ.पा.। ६ पञ्चाद्ये, घ.पा.। ७ अस्य० १६७ सं.चि.द्र०। ८ हस्तोऽथ, ख.पा.। ९ अस्य० १६८ सं.चि.द्र०। १० अस्य स्थाने मृगो वर्तते चित्रपुस्तके। ११ अस्य० १६९ सं.चि.द्र०। १२ पद्मीनो, घ.पा.।

निऋतिः-१

दंष्ट्रावान् रक्तदृक्क्रुद्धो निऋतिर्विकृताननः ।
पुंस्थित खड्गहस्तश्च नीलाभो राक्षसावृतः॥३१३॥

वरुणः–२

मकरस्थः सितः सौम्यः पाशहस्तो महोदरः ।
सर्वाभरणसंयुक्तो वरुणः पीतवस्त्रभृत् ॥३१४॥

वायुः३

पीनो ४ गौरोऽथवा श्यामः कुञ्चितभ्रूश्चलात्मकः ।
रक्तक्षो ५ रक्तवासश्च मृगस्थश्चङ्कुशी ध्वजी ॥३१५॥

कुवेरः६

मेषस्थितो घनः सौम्य पीतो रक्षावृतो गदी ।
धनेशो वरदः कार्यो नानाभरणमण्डितः ॥३१६॥

ईशानः७

त्र्यक्षः सितो जटी शूली वृषस्थोऽस्थिविभूषितः ।
ईशानोऽहीन्दुभृच्चैते लोकपाला द्विबाहवः ॥३१७॥

विश्वकर्मा–८

द्विभुजः पीतदेहस्तु९ जटाधारी कजासनः ।
विश्वकर्मा सदा गौरो ज्ञानमुद्राक्षसूत्रभृत् ॥३१८॥

---

१ अस्य० १७० सं.चि.द्र० । २ अस्य० १७१ सं.चि.द्र०
३ अस्य० १७२ सं.चि.द्र० । ४ पीतो, घ.पा. । ५ रक्तास्यो, घ.पा.।
६ वैश्रवणाः, लि.पु.पा. । ७ अस्य० १७३ स.चि.द्र० । ८
लोकपालमूर्तयः, लि.पु.पा. । अस्य० १७४ सं.चि.द्र० । ८ अस्य०
१७५ सं.चिद्र० ॥

हनुमान्—१

विवृतारूणवक्त्रश्च ऊर्ध्वपुच्छोर्ध्वमूर्धजम् ।

आलीढ़करणासक्तं महाकायं .सुभीषणम् ॥३१६॥

दीर्घदंष्ट्रानखैर्युक्तं पिङ्गाक्षं२ भूषणान्वितम् ।

पीतध्वजधरं वामे तर्जनीं वा हृदग्रतः ॥३२०॥

प्रसारितभुजं कुर्याद्दद्रिहस्तं तु दक्षिणे ।

संपीड्य राकसान् पद्भ्यां मुञ्चन्नादं३मरुत्सुतम् ॥३२१॥

किन्नरः—४

पङ्ग्रा (?) यक्षाङ्घ्रिकाः कार्या वीणाहस्ताश्च किन्नरा

स्कन्धयक्षान्विता नित्यं कर्तव्या योषिदन्विताः ॥३२२॥

विद्याधरः—५

यक्षान्वितान्तरिक्षस्थाः खड्गहस्ताः सुरूपिणः ।

मालाभृतोऽथवा हृष्टाः खस्था विद्याधराः सदा ॥३२३॥

प्रेतवेतालः—६

दीर्घाः खड्गधराः कृष्णाः पिशाचा दुर्बलाङ्गकाः ।

पिङ्गवर्बर७केशाश्च वेताला विकृताननाः८ ॥३२४॥

क्षेत्रपालः – ६

बभ्रुकेशोग्रदंष्ट्रास्याः कृष्णवर्णा भयङ्कराः ।

---

१ अस्य० १७६ सं.चि.द्र० । २ पिङ्गाङ्गं, घ.पा. । ३ पद्भ्यामुच्चपादं, मू.अ.ख.ग.पा. । ४ बहुवचनान्तोऽयं शब्दः लिखित प्रस्तकेषु । अस्य० १७७ सं.चि.द्र० ।

६ प्रेतवेतालौ, लि.पु.पा. । अस्य० १७६ सं.चि.द्र० । ७ चर्चर, मू.पा. । ८ विवृताननाः, ग.पा. । ९ क्षेत्रपालाः लि.पु.पा. । अस्य

कपालमालिनः शूलधारीणः क्षेत्रपालकाः ॥३२५॥

किन्नराद्याः–१

गोधाजगृध्रवक्त्राश्च शिवासूचीमुखास्तथा ।
कृशा महोदराः प्रेता खल्वरगल्लाश्च लोमशाः ॥३२६॥

योगिन्यः–३

योगिन्यष्टष्टाकं वक्ष्ये ऐन्द्र्याद्यीशान्तचक्रवृत्४ ।
स्वाङ्गवर्णधराः सर्वा यथोक्तं ब्रह्मयामले ॥३२७॥
अक्षोभ्या ऋक्षकर्णीच राक्षसी क्षणपा क्षया ।
पिङ्गक्षी चाक्षयाक्षपा५ इला लीला लया तथा ॥३२८॥
लोला लङ्काथ६ लङ्केशी लालसा विमला पुनः ।
हुताशा च विशालाक्षी हुङ्कारा वडवामुखी ॥३२९॥
हाहारवा महाक्रूरा क्रोधना तु भयानना ।
सर्वज्ञा तरला तारा ऋग्वेदा तु हयानना ॥३३०॥
साराख्या रससङ्ग्राही सरबा७ तालजङ्घिका ।
रक्ताक्षी सुप्रसिद्धा तु विद्युज्जिव्हा करङ्किणी ॥३३१॥
मेघनादा प्रचण्डोग्रा कालकर्णी वरप्रदा ।

---

१८० सं.चि.द्र० । १ एषां (किन्नरगणानां) चित्रोदाहरणानि चित्रसंख्या १८१ तः १८६ पर्यन्तानि प्रायेण द्रष्टव्यानि । २ खलु, ग. पा. । ३ पाठोऽयं लिखितपुस्तकेषु नास्ति । अत्रोक्तचतुःषष्टियोगिनीषु 'इला, लीला, लया, लोला, लङ्काः लङ्केशी, लालसा, विमला, एतासां चित्रोदाहरणानि न दृश्यन्ते गणनायामपि चतुः षष्टिसंख्यातः अधिकं वर्तते। ४ चक्रवत्, मू. अ.ग.पा. । ५ क्षेय', घ.पा. । ६ सक्षाथ, ग.पा. । ७ सवरा,घ.पा. ।

चन्द्रा चन्द्रावली चैव प्रपञ्चा प्रलयान्तिका ॥३३२॥
विद्युवक्त्रा पिशाची च पिशिताशा च लोलुपा१ ।
यमनी तपनी चैव वामनी विकृतानना ॥३३३॥
वायुवेगा बृहत्कुक्षी विकृता विश्वरूपिका ।
यमजिह्वा जयन्ती च दुर्जया च यमान्तिका ॥३३४॥
विडाली रेवती चैव प्रेतना विजयान्तिका ।
चतुः षष्टिरियं देव्या मूर्तिभेदा निगद्यते ॥३३५॥

पूर्वाष्टका—२

वज्रास्यभयभृद्याम्ये कंखेटफलभृत्ततः ।
हेमाभा भूषणाढ्या स्यादक्षोभ्या करिसंस्थिता ॥३३६॥
ऋक्षकर्णंतिगौरा३ च कम्बुबाणाभयावहा ।
धनुः कपाभृत्सौम्ये ऋक्षस्तथा तर्जनीयुता ॥३३७॥
कराभ्यां मस्तकस्योर्ध्वं प्रेतभृद्धस्तपादयोः ।
प्रेतस्था राघसी गौरी कार्भकतरिकान्विता ॥३३८॥
क्षपणा चम्पकाभा च दक्षिणे मुद्गराङ्कुशम् ।
कपालं च फलं सौम्ये धत्ते कुब्जनृसंस्थिता ॥३३९॥
क्षया कूर्मस्थिता गौरी त्वक्षसूत्रघटान्विता ।
वामे कपालपिच्छी४ भृत्सर्वालङ्कारमण्डिता ॥३४०॥
पिङ्गाक्षी पिङ्गकेशी स्याद्बभ्रुवर्णा हयस्थिता ।
कौशेयपाशभृद्याम्ये वामे चाङ्कुशखेटिनी ॥३४१॥

---

१ चलालया, क. पा. ।
२ आसां १६० तः १६७ सं. चि. क्रमेण द्रष्ट० । ३ दक्षकर्णाति; ख. पा । ४ पिण्डी, क. ख. पा. ।

वृकारूढा ल—वर्णा१ च चारूर्गात्राक्षया भवेत् ।
कुठाराशनिभृद्याम्ये सौम्ये पाशाङ्कुशान्विता ॥३४२॥
शवस्था नृत्यती पीता शक्तीभकधनुष्करा ।
याम्ये डमरुशूलेषुमस्तहस्ताक्षपा मता ॥३४३॥

आग्नेयाष्टका—२

शक्तिखड्गधरा त्र्यक्षा वामे खेटकपालिनी ।
रक्ता वह्निस्थिता त्वीला क्रीड़न्ती दहनैः सह ॥३४४॥
लीलावती च दक्षस्था३ लीला रक्तजटान्विता ।
बिभ्राणा पट्टिशं पाशं वामे मस्तार्धमम्बुजम् ॥३४५॥
मूषारूढा लया रक्ता याम्ये दण्डासिधारिणी ।
कर्तरीकार्धभृद्वामे तर्जन्याकृष्टसृक्किका ॥३४६॥
कतरीं मार्जनीं सूर्पं सौम्ये पिच्छं नृकं करे ।
शूलं रुरुयुतं द्वाभ्यां धत्ते लोला सूसारसे (?) ॥३४७॥
वामे लुलायमुण्डं च तत्पश्यन्त्यसृग्रक्तकम् ।
लङ्केशोरुस्थिता लङ्का चर्वन्तीं४ पिशितं घनम् ॥३४८॥
सफणा५ सकखेटेन्द्रौ मोदकासिं च दक्षिणे ।
शोणा लङ्केश्वरी कुण्डे ऊर्ध्वबालां च६ बिभ्रती ॥३४९॥
दक्षिणे वरदश्चक्रं वामे कं कम्बुजं७ करे ।
बिभ्राणा कोलगा रक्ता लालासृग्लालासा मता ॥३५०॥

---

१ र- वर्णा, रक्तवर्णेत्यर्थः । २ आसां चित्रोदाहरणानि १६८ तः २०५ सं. वि. द्र. । ३ यक्षस्था, मूलः पाठः । ऋक्षस्था, इति साधुः पाठः, चित्रेऽपि भल्लुकासने स्थिता ।
४ वर्पन्ती, मू. पा. । ५ त्रिफला, मू. अ. ग. पा. । ६ उर्वालाचणे, मू. पा. । ७ कम्बुकं, मू. अ. क. ग. घ. ङ. पा. ।

द्विपस्था विमला रक्ता त्र्यक्षालङ्कारभूषिता ।
कर्तरीकुम्भभृद्याम्ये सौम्ये पाशकपालिनी1 ॥३५१॥

याम्याष्टका—२

कृष्णा हुताशनाजस्था ज्वालिनी दक्षिणे स्रुचा ।
वामे चाभयहस्ता स्याद्विधृराज्यघटान्विता ॥३५ ॥

शूकरास्या विशालाक्षी योषित्स्कन्धस्थिता सिता ।
कर्त्र्यभयभृद्याम्ये वामे कण्टाकपालिनी ॥३५३॥

मीनास्या मीनसंस्था च हुङ्कारा साक्षमालिका ।
मुसलं बिभ्रती याम्ये सौम्ये च फलपल्लवौ ॥३५४॥

पर्यङ्का च व्याघ्रास्या स्यादङ्कस्थां बिभ्रती शिशुं ।
समतस्य3कार्धभृद्वामे मत्स्यमन्यत्र वासिता ॥३५५॥

तर्जन्यभयभृत्सौम्ये4 याम्ये दण्डकपालिनी5 ।
हाहारवा सिता क्रूरा रासभास्या खरासना6 ॥३५६॥

लुलायास्या लुलायस्था महाक्रूरा सिता भवेत् ।
वामे मषीघटीं पाशं लेखनीदण्डभृत्ततः ॥३५७॥

मांसखण्डं करे याम्ये खादन्ती क्रोधना सिता ।
वामे समदिरं पात्रं7 बिभ्रती जम्बुके स्थिता ॥३५८॥

कृष्णा भयानना गृध्रे दंष्ट्रोग्रास्थिविभूषिता ।
याम्येऽस्याः खिङ्किरीं (?) शूलं खर्परं लेलिहान्यतः ॥३५९॥

---

१ कधारिणी; ख. पा. । २ आसां० २०६ तः २१३ स. चि. द्र० । ३ समत्से, घ. पा. । ४ सौम्ये च, क. ग. पा. । ५ कधारिणी, ख. पा. । ६ खराननाः, मू. अ. ग. घ. पा. । ७ शूलं, ग. पा. ।

नऋत्याष्टका-१

कंशूलपुस्तभृद्वामे मुण्डं डमरुकं शवम् ।
बिभ्राणोभाजिन२ द्वाभ्यां सर्वज्ञा प्रेतगासिता ॥३६०॥
जानुक्षिप्तौ करौ न्यस्य उद्यन्ती तरलायता ३ (?) ।
शलडमरुहस्ता च गोधागा तरलासिता ॥३६१॥
तारागणैर्वृता तारा कृष्णोलूक स्थिता नृकम् ।
शवार्धं बिभ्रती सौम्ये शूलं मुगदरमन्यतः ॥३६२॥
ऋग्वेदाङ्गस्थिता कृष्णा ज्ञानमुद्रांच बिभ्रती ।
दक्षिणो जाप्ययामालां च वामे पुस्त कमण्डलुम् ॥३६३॥
कबन्धस्थासिता रौद्रा तुरगास्या हयानना ४ ।
शूर्पमुण्डकरा याम्येऽन्यत्र शेफालिकाकभृत् ॥३६४॥
छिन्नहस्तशवे कृष्णा सारा स्थूलजटाधरा ।
खट्वाङ्गं रुरुकं सौम्ये शूलोल्के बिभ्रती ततः ॥३६५॥
शवस्था रससङ्ग्राही५ नृत्यन्ती जटिलासिता ।
कशूलान्धककङ्कालभृद्द्वयो श्चमवासिनी ॥ ३६६॥
शवे तद्धृग्द्विजे पृष्ठे कनिष्ठा सरधासिता ।
वामे करोघधापाशं७घण्टेशूलकधरान्यतः ॥३६७॥

वारुणाष्टका ८

ताक्ष्यंस्था तालजङ्घाख्या सुकान्ता स्फटिकप्रभा ।

---

१ आसां० ७१५ तः ७७१ सं. चि. द्र० । ७ डम अजिनम् इति च्छेदः । ३ उँद्यती तरणायता, क. पा. । तुद्यन्तीं तरलायता, ख. पा. । ४ हयासना, क. पा. । ५ वरसङ्ग्राही, क. पा. । ६ भवना, ग्र. पा. । शवरा, ख. घ. पा । ७ घ्रयानासं, क. ख. ग. पा. पयानासं, ग्र. पा. । ८ आसां० २२२ तः २२१ सं. चि. द्र० ।

शङ्खखेटकहस्तोग्रा याम्ये स्वस्तिकखड्गभृत् ॥३६८॥
गण्डारूढाच रक्ताक्षी रक्तानाना शशिप्रभा।
गदाध्वजधरा याम्ये वामे पाशकपालभृत् ॥३६९॥
विद्युज्जिह्वा सिता क्रूरा सव्ये सीरकपालभृत् १।
चक्रस्था चक्रकट्टारीधारीणीर दक्षिणे करे ॥३७०॥
ग्राहस्था चामरच्छत्रभृद्दूतीयुगसंयुता।
³कुम्भपाशधराश्वेता क्रोडपुत्रा करङ्किणी ॥३७१॥
चन्द्राभा मेघनादा स्यात्खड्गखेटकधारिणी।
जलैर्वृता घनारूढा तडिन्मण्डलमण्डिता ॥३७२॥
नक्रस्था स्यात्प्रचण्डोग्रा याम्ये स्यात्कर्तरीफलम्।
कपालं मुण्डमन्यत्र शत्रुघ्नाः स्फटिकत्विषः ॥३७३॥
शुक्ला झषासना रौद्रा बिभ्रत्पद्माक्षसूत्रकम्।
कालकर्णी जगत्ख्याता कर्णे कालविभूषणा ॥३७४॥
वृषदंशस्थिता श्वेता वरदा रिपुनाशिनी।
कर्तर्यभयभृ याम्ये शूलं पाशधरान्यतः ॥३७५॥

वायव्याष्टका – ४

चन्द्रा हंसस्थिता गौरी वेदास्येन्द्वर्कयोः क्रमात्।
कमण्डलुकुशव्यग्रा चात्रसूत्रस्रुवान्विता ॥३७६॥
याम्येऽभयाक्षमालाभृच्छेषेऽब्जध्वजधारिणी।
चन्द्रावली च हेमाभा कृष्णसारमृगासना ॥३७७॥
फलस्रगन्विता याम्ये कम्बुकुण्डीधरान्यतः।
गजयाना प्रपञ्चाख्या गौरी विश्वप्रपञ्चिका ॥३७८॥
कपिस्था सान्द्रशाखाभृत्खाम्बरा प्रलयान्तिका।

---

१ कपालिनी, मू. पा.। २ चक्रवाकस्थ चक्रस्था, ख. पा.।
३ पूर, घ.पा.। ४ आस॰ २३० तः २३७ सं.चि. द्र०।

खादन्त्याम्रफलं नित्यं कण्यास्या गौर वर्णिनी ॥३७९॥
पिचुवक्त्रा मृगव्यालपिङ्गला याम्यसौम्ययोः ।
भिन्दिपालकखेटाभ्यां प्रासासिभ्यां च संयुता१ ॥३८०॥
काकास्या श्येनगा गौरी पिशाची रक्तमण्डिता२ ।
कं फलं कर्तरीं खड्गं बिभ्रती सौम्ययाम्ययोः ॥३८१॥
फलतूलधरा वामे याम्ये शस्त्रासिधारिणी ।
खरस्था बभ्रुवर्ण स्यात्पिशिताशातिदुर्बला ॥३८२॥
नृत्यन्ती लोलुपा पीता रथस्था याम्यसौम्ययोः ।
ध्वजडमरु३कर्तर्यौ पाशं पिच्छं च बिभ्रती॥३८३॥

उत्तराष्टका—४

गदापट्टिशभृत्सौम्ये शूलतोमरिणी ततः ।
वमनी५ पुष्पकस्था स्याद्गौरी यक्षगणान्विता ॥३८४॥
सर्पास्या सर्पगा खड्गी६ गौर्युग्रा तपनी वरा ।
स्वफणा७यान भाजे८ च न्यस्तहस्ता भवेदियम् ॥३८५॥
पीता गेहाखुगे भास्या वामनी बिभ्रती करे ।
कुठारं लड्डुकं वामेऽक्षमाली पनसं ततः ॥३८६॥
शूलभिन्नलुलायस्य सिंहाकृष्टशरीरिणाः ।
जिव्हाभृद्वज्रिणी पीता चतुर्दोर्विकृतानना ॥३८७॥
शङ्खपूरणिका द्वाभ्यां नृकाभयकराद्वयोः ।
द्विहंसवद्रथस्था स्यात्सालाभा वायुवेगिका ॥३८८॥

---

१ संयुगे, ख.पा.। २ वक्त्रमण्डिता, क.ग.पा.। ३ ध्वजं डमरु, घ.पा. ४ आसां० ३३८ तः ३४५ सं.चि द्र०। ५ रमणी, ग.पा.। ६ वङ्गा, ख.पा.। ७ सुफणा, क.ग.पा.। ८ तुभोगा, क.पा.। धारभागे, घ.पा.।

भासस्था स्याद्बृहत्कुक्षिः सौम्ये मुण्डकपालभृत्।
महाकाया च गौर्यङ्क१कर्तरी भृन्नृकादनी ॥३८६॥
उग्रस्था विकृता गौरी भयकृद्विकृतानना।
तूरं डमरु याम्येऽस्याः शेषे खट्वाङ्गमस्तकम् ॥३६०॥
खेटशङ्खाब्जभृद्वामे गदाचक्रासिभृत्ततः।
वीन्द्रस्था२ विश्वरूपा स्याद्धेमाभा वनमालिनी ॥३६१॥

ऐशान्यष्टका—३

मुसलं मुद्गरं याम्ये परशुं बन्धनं ततः।
बिभ्रती यमजिह्वाख्या कराला महिषस्थिता ॥३६२॥
नृत्यन्ती वृषगा श्वेता याम्ये डमरूतूलभृत्४।
सदैत्यमुण्डशूलोग्रा (४क) जयन्ती वामहस्तयोः ॥३६३॥
खड्गकुन्तयुता५ रौद्राश्चारूढा दुर्जया मता।
नानाभूतावृता श्वेता दुर्गकाननसंस्थिता ॥३६४॥
शूलबाणधरा याम्ये धनुः शक्तिधरा६ ततः।
शकटस्थातिघोरास्या क्षीरवर्णा यमान्तिका७ ॥३६५॥
मार्जारस्था विडाली च विडालाक्षी८ भवेत्सिता।
वामे करं९ च खट्वाङ्गं शूलं टङ्कं १० च बिभ्रती ॥३६६॥
कृशा पिशाचवक्त्रोग्रा प्रेतस्था रेवती११ मता।
त्रिशूलयष्टि१२भृद्याम्ये भिन्दिपालगदासिभृत् ॥३६७॥

---

१ गौर्यर्क, मू.पा.। २ वीन्द्रःपक्षिराजः। ६ आसां० २४३ तः २५३ सं.चि.द्र०। ४ तूरभृत्, घ.पा.। (४क) सदैत्यशूलमूण्डोग्रा, लि.पु.पा.। ५ कुम्भीयुता, घ.पा.। कुण्डयुता, मू.अ.पा.। ६ करा, क.ख.पा.। ७ यवान्तिका, मू.अ.पा.। ८ विशालाक्षी, ख.घ.पा.। ९ तूरं, क.ख.ग.घ.पा.। १० घण्टं, घ.पा.। ११ पोतस्था रेवती, घ.पा.। १२ कं शलयष्टि, क.ख.ग.घ.ङ.पा.।

कुन्दाभा प्रेतना ध्यक्षा विकृतास्था सवस्थिता।
कर्तरीशूलभृत्सूर्ये (सौम्ये) वामे मुण्डकपालभृत् ॥३९८॥
श्वेतवर्णा वृषस्था च विजया विजयप्रदा।
शूलं डमरुं याम्येऽस्याः कार्धखट्वाङ्गधृक् ततः ॥३९९॥
दिव्याम्बरधराः सर्वाः सर्वाभरणभूषिताः।
कर्तव्याः शिल्पिभिर्नित्यं योगिन्योऽशेषसिद्धिदाः ॥४००॥

भैरवः—१

भैरवश्चार्कहस्तः स्याच्चतुरास्यो जटेन्दुभृत्।
खड्गाङ्कुशकुठारेषु विश्वासयकृद्दर्कतः२ ॥४०१॥
चापत्रिशूलखट्वाङ्गपाशकार्धकरोऽन्यतः।
गजचर्मधरो द्वाभ्यां कृत्तिवासोऽहिभूषितः ॥४०२॥
श्यत्नो दंष्ट्राकरालोग्रः प्रचण्डाट्टाट्टहासवान्।
प्रलयाम्बुदवर्णाभो मुण्डकापालमालिनः (कः) ॥४०३॥
कूर्मधराम्बुपोताब्ज३प्रेतहृदासनास्थित४।
चण्डाख्यो मातृमध्ये तु संस्थितः पीतकूर्चभृत्५ ॥४०४॥
खविलोमाग्निपर्यन्तं दैर्घ्यात् खैकैकभेदतः६।
तत्पडङ्गानि७ जात्यन्तैः खान्वितं च कमाद्यजेत् ॥४०५॥
मन्दिराङ्ग्रिबलारूढं स्ववर्णानुग्रहान्वितम्।
नादबिन्द्विन्दुसंयुक्तं१० मातृनाथान्त११दीपितम् ॥४०६॥

---

१ अस्य० २५४ सं. चि. द्र०। २ दक्षतः, घ.पा.। ३ पात्राब्ज, ग.पा.। ४ सनस्थितः, मू.पा.। ५ पीनकूर्चधृक्, घ.पा.। ६ दैर्घ्याद्दैकैकभेदतः, क.पा. दीर्घापैकैकभेदितः, घ.पा.। ७ तंत्सुतं, ग.पा.। ८ चक्रगं, ख. पा.। ९ सुवर्णा, क.ग.पा.। स्वकर्णा, ख.घ.पा,। १० बिन्दुससंयुक्तं, क.ग.पा.।११ नाथाङ्ग, ख.पा.।

संक्षेपाद्दैवतामूर्तिः कथिता वर्तनी मया ।
गुह्यदेवान्यरूपाणां स्वे स्वे शास्त्रे विनिश्चयः ॥४०७॥
ऊर्ध्वासीनाथ शयानस्थाः सुप्ता चैवान्तरिक्षगाः ।
पञ्चधा प्रतिमाः ख्याता मानतः सप्तधा तथा ॥४०८॥
एकस्मिन्नेव देहे स्युर्यथाङ्गानि पृथक् पृथक् ।
तथेश्वरात्सुरा सर्वे कार्यकारणभेदतः ॥४०९॥

इति लक्षणसमुच्चये रुद्रादिव्यक्तलिङ्गवर्तनं नाम षष्ठो विधिः ।

अथ सप्तमः

व्यक्ताव्यक्तं प्रवक्ष्यामि दशभेदैर्व्यवस्थितम् ।
पञ्चास्यादि यथालिङ्गं भवेत्सुव्यक्तपञ्चकम्[१] ॥१॥
पञ्चास्यं चतुरास्यं च त्रिद्व्येकास्यं भवेत्क्रमात् ।
पञ्चवक्त्रमनिष्टेषु चतुर्वक्त्रं सुखावहम् ॥२॥
त्रिवक्त्रं शान्तिदं नित्यं द्विवक्त्रं चाभिचारिकम् ।
एकवक्त्रं स्याद्रोगघ्नं नाधिकास्यं चलाचलम् ॥३॥
एकद्वित्रिमुखं वापि प्रासादे पूर्ववक्त्रकम् ।
चतुर्मुखं तु खाधारे पञ्चास्यं वा चतुर्मुखम् ॥४॥
सितोत्तानं त्रिनेत्रं च मौलिकुण्डल[३]शोभितम् ।
लिङ्गमूर्ध्निस्थितं वक्त्रमैशानं त्वीशमीक्षकम्[४] ॥५॥
रक्तवर्णं सुतेजस्कं त्र्यम्बकं मौलिमण्डितम् ।
सिंहास्यं[५] श्मश्रुकेशाढ्यमैन्द्रं तत्पुरुषाननम् ॥६॥
कृष्णंत्र्यम्बमघोरास्यं[६] पिङ्गकूर्चं सुभासुरम्[७] ।
दंष्ट्राकरालं वृत्ताक्षं ज्वलत्केशादिभूषितम् ॥७॥

---

१ लक्षणम्, मू.अ.पा । २ मुखे सुखाधारे, घ.पा. । तु प्रसादे, क.पा. । ३ कुन्तल, मू.पा. । ४ वीक्षकम्, मू.पा. । ५ सिंहाग्रं, घ.पा. । ६ कृष्णवर्णमघोरास्यं, मू.अ.क.ग.पा. । ७ शुभा शुभम मू.अ.क.ग.पा.

वामवक्त्रं भवेत्पीतं सौम्यं धनददिक्स्थितम् ।
कान्तालङ्कारकेशादि१ तिलकालकमण्डितम् ॥८॥
वारूणास्यं सितं सद्यश्चन्द्र मौलिजटाधरम् ।
त्र्यक्षं पीनं युवाकारं सुप्रसन्नं सुशोभनम् ॥९॥
विनेशानं चतुर्वक्त्रं त्रिमुखं त्वजवर्जितम् ।
सद्यः पुंभ्यां द्विवक्त्रं स्यात्पुरुषेणैकवक्त्रकम् ॥१०॥
तुल्यविष्कम्भतः सिद्धे पूजा भागोर्ध्व विस्तृतेर ।
तत्वैर्लिङ्गं ग्रहैर्भक्ते हृत्वाम्भोंशो विदिक्षु च ॥११॥
मध्यसूत्रोद्भमा३ लिङ्गं तालपञ्चकवेष्टितम् ।
दिग्विभागेन तद्वक्त्रं४ भूतवेदाननं सदा ॥१२॥
अजात५ वदनद्रव्यं त्रिगोलकं त्रिषु क्षिपेत् ।
तद्वद्द्वयास्ये द्विमात्राख्यमेकास्ये त्रित्रिकाङ्गुलान् ॥१३॥
त्र्यास्यमष्टादशांशैश्च६ लिङ्गं स्याद्रविभागतः ।
हृत्वा कोणेषु रन्ध्रांशैर्लिङ्गं षट्तालवेष्टितम् ॥१४॥
धृत्यंशेन द्विवक्त्रं स्यान्मध्ये७ लिङ्गमथैन्द्रकम् ।
(८द्वाभ्यां द्वाभ्यां च तत्रास्यं लिङ्गं सप्तास्यवेष्टितम्! ॥१५॥
त्रिंशदङ्गुलविस्तारं तालमानास्य निर्गमम् ।)
नवत्यङ्गुलकं ९वृत्तादेकास्यं पूर्ववक्त्रकम् ॥१६॥
पूजांशे नवधाभक्ते लिङ्गमुच्चे१० त्रिभागतः ।

---

१ केशाढ्य, क. ख.पा. । केशाश्च, ग. पा । २ भागोऽर्ध्वविस्तरः, ख. पा. । भागे ऽर्ध्वविस्तृते, ग. पा. । ३ सूत्रभ्रमा; मू.पा. । ४ तद्वक्तं, मू. पा. । ५ सुजात, मू. पा. । ६ सप्तदशास्रैश्च, मू. पा. । ७ तु मध्ये, घ. पा. । ८ चापचिन्हान्त र्गतोऽयं पाठो ग. पुस्तके नास्ति । ९ त्यङ्गुलकं, घ. पा. । १० मूर्ध्वं, मू० अ० क० ख० ग० ङ० पा० ।

तदधःषड्विभागेन शिववक्त्राणि वर्तयेत् ॥१७॥
तद्वक्त्रं१ स्कन्धयोर्मूलं भागैकेन गलं तथा।
चिबुकोष्ठौ विभागेन२ नासाललाटस्तकम् ॥१८॥
क्रमतो गुणभागेन चारूमौलिं तदूर्ध्वतः।
लिङ्गपार्श्वे,द्विभागेन भागं त्यक्त्वा तदूर्ध्वतः ॥१९॥
जूटादींश्च प्रयत्नेन पूर्वोक्ता प्रतिमा यथा।
पञ्चास्याद्येकवक्त्रान्तमयमेव विधिः पुनः ॥२०॥
वृत्ताकारं ततः शेषं शिरश्छत्रादिकं क्रमात्।
पञ्चाननादिकं प्रोक्तं सुव्यक्तमधुदनोच्यते ॥२१॥
प्रागुक्तपञ्चवक्त्राणि सर्वैरङ्गैर्युतानि च।
द्विबाहून्यूर्ध्वदेहानि पिण्डवन्तचरणानि च ॥२२॥
कुर्याच्च स्वदिगीशानं साक्षमालात्रिशूलिनम्३।
पूर्वकाये पुमांसं तु मातुलुङ्गाक्षशलिनम्४ ॥२३॥
याम्येऽघोरमनाक्षीणं घण्टाशूलधरं सदा।
स्त्र्याकारमुत्तरे गुह्यं दर्पणोत्पलसंयुतम ॥२४॥
पश्चिमेऽजातक रूप वरदाभयपाणिकम।
सुव्यक्त पञ्चधा ह्येवमास्योक्ताविंध्सरिथतम्५ ॥२५॥
पञ्चद्वित्रियमेकेन६ सम्पूर्णाङ्ग न तत्क्रमात्।
एवं निष्पाद्य लिङ्गानि पिण्डिकां वर्तयेत्ततः ॥२६॥
इति लक्षणसमुच्चये व्यक्ताव्यक्तलिङ्गानां दशधा वर्तनं नाम सप्तमो विधिः अथाष्टम।
पिण्डिकां साम्प्रतं वक्ष्ये लिङ्गे अथाष्टमःच त्रिविधे शुभाम्।
महत्याः प्रतिमायाश्च दिग्लङ्गादेश्च साधने ॥१॥

---

१ तद्वक्षः ख.पा.। २ च भागेन, मू.अ.क.ख.पा.। ३ शानमक्षमाला त्रिशूलकम, घ.पा। ४ सूत्रतम्, क.ख.पा.। ५ संयुतम्, मू.पा.। ६ पञ्चाचित्रयमेकेन्द घ.पा.।

पिण्डिका स्यादुमादेवी लिङ्गं च परमेश्वरः ।
नावशां कारयेत्तस्मात्कदाचिदुभयोरपि ॥२॥
लिङ्गनाहप्रविस्तीर्णा उच्छ्रये विष्णुसम्मिता ।
पिण्डिका तु समाख्याता न हीना नाधिका शुभा ॥३॥
स्वतानषष्ठभागेन१ चाहुल्येन२ समन्विता ।
मेखला तत्रिभागेन खातं तत्त्र्यंशहीनकम् ॥४॥
स्वमानपादहीनं वा त्रिविधं समुदाहृतम्३ ।
मध्ये वृत्तं समालिख्य वर्तयेत्खातमादरात् ॥५॥
(४बहिस्थं मध्यगं चैव बाहुल्यं५ सदृशं यथा ।
वृत्तसूत्रात्समारभ्य खातं वै ह्रासयेत्क्रमात् ॥६॥)
तावद्यावच्छनैर्वध्या मेखलाखातमाप्नुयात् ।
अर्वाग् दैर्घ्यत्रिभागेन मेखलावर्तनं बहिः ॥७॥
प्रणालं पीठमध्यस्थं दैर्घ्ये६ मूलत्रिभागिकम् ।
मुखे तदर्धविस्तारं तन्त्रिभागेऽम्बुनिर्गमः ॥८॥
स्थौल्यं चापि प्रणालस्य जलभृद्दलसंस्थितम् ।
कण्ठादूर्ध्वं सदा ह्येवमन्यथा दोषदायकम् ॥९॥
गुह्यवक्त्रस्थितं नित्यं प्रणालं चोत्तरप्लवम् ।
षष्ठांशवेशनात्कण्ठश्चलानां पञ्चमेन वा ॥१०॥
न वेदास्त्राष्टकं सर्वं पीठं श्वभ्रसमान्यथा७ ।
अव्यक्ते मिश्रके स्वांशे८ ब्रह्मविष्णु९स्वरूपतः ॥११॥

---

१ स्वताल, क. ख. पा. । २ बाहल्येन, घ. पा. । ३ तदुदाहृतम, मू. पा. । ४ चिन्हान्तर्गतोऽयं पाठो ग पुस्तके नास्ति । ५ बाहल्यं, घ. पा. । ६ दैर्घ्यं, मू. पा. । ७ वत्रं च ना, मू. पा । पीतं पुत्रं च ना, ग. पा. । सूत्रसमा, ख. पा. । ८ स्यांशे, मू. पा. । द्यांशे, ग. पा. । ९ विष्णो ख. घ. पा. ।

पीठिकाविस्तरत्र्यंशे खातं तन्मध्यतो भवेत् ।
लिङ्गस्थौल्यप्रमाणेन समास्रं दिग्विदिक्स्थितम् ॥१२॥
चतुरस्रमथाष्टास्रं ब्रह्मविष्णुविभागतः ।
समन्ताज्ज्येष्ठलिङ्गस्य यवैः षड्भिर्विवर्धितम् ॥१३॥
अर्धार्धन्यूनमन्येषां कन्यसे[1] द्वियवः सदा ।
लिङ्गवन्निर्मला शुद्धा कर्तव्या पिण्डिका बुधैः ॥१४॥
अष्टास्रं ज्येष्ठलिङ्गस्य दृश्यं पञ्चयवाधिकम् ।
शेषाणां लिङ्गानामर्धार्धे ह्रासयेद्यवम् ॥१५॥
प्रवेशः षड्विधः प्रोक्तो ब्रह्मभागस्य भूतले ।
कामानां वस्तुतस्तस्य भेदान् ब्रूमः समासतः ॥१६॥
विभक्ते त्वष्टधा ब्राह्मे त्रिभार्धोभाग एव वा ।
चतुर्भागः समस्तो वा प्रशस्यते च पञ्चधा ॥१७॥ (क)
ब्रह्मभागप्रवेशं च ज्ञात्वा पीठं प्रकल्पयेत् ।
पीठिकायाः समुच्छ्रायं विकारांशेन भाजयेत् ॥१८॥
एकेनाङ्घ्रिर्धरासीनो जङ्घा तुर्यांशके भवेत् ।
गुणाभागे तथा कुम्भः कुम्भपट्टि तु भागतः ॥१९॥
रामभागेन कण्ठश्च तन्वंशैर्[2] गलपट्टिका ।
पक्षभागे[3] जलाधार एकांशे शेषपट्टिका ॥२०॥
प्रवेशनिर्गमौ चैव भागेकेन[4] कण्ठतः ।
बाणमतानुसारेण कन्यसी[5] तथं पयोधरा ॥२१॥
समासात्प्रोच्यते चान्या पूर्णकुम्भा हरप्रिया[6] ।

---

१ कनीयसे, इत्यर्थः ।
२ तत्वंशैः, क.ख.पा. । तथांशैः, ग.पा. । ३ पक्षाभागे, क.ख.पा. ।
४ भागेनैकेन मू.पा. । ५ कनीयसीत्यर्थः । ६ कुम्भोदरप्रिया, ख.पा. ।

(१द्यंशं निवेशयेद्भूमौ त्रिभागैः पदपट्टिका ॥२२॥)
द्वाभ्यां पट्टोपर पट्टी स्याद्धसाख्यात३ त्रिभिर्मता ।
पट्टोपपट्टिका कण्ठो गलपट्टदयुपपट्टिका ॥२३॥
एकैकेनार्थिभिः (?) कुम्भो घटोऽर्धादेवमेवः तु ।
मेखला पट्टिका किन्तु भागकेन तदूर्ध्वतः ॥२४॥
मध्योत्थं (त्था) पूर्णकुम्भाख्या द्वात्रिंशत्त्रिंशद्भागनिर्मिता४।
उच्छ्रायार्धे तु पीठ्याः (ठी) स्याद्र् द्रभागे द्विधा कृते ॥२५॥

गुणांशैः खुरपट्टीतु द्वाभ्यां पट्टोपपट्टिका ।
त्रिभिरब्जं त्रिपट्टौ (हि) तु द्वाभ्यां द्वाभ्या तथाम्बुजम् ॥२६॥

हीनोपहीनिक कण्ठः पटट५श्चैवोपपट्टिका ।
द्वाभ्यां द्वाभ्यां क्रमाद्दत्पद्यं सार्धांशे गलनिर्गमः ॥२७॥
इत्थमेवं गलादूर्ध्वमेकांशेनोर्ध्वपट्टिका ।
कण्ठद्वयेन७ संयुक्ता षड्भिः पद्मैर्विभूषिता ॥२८॥
पद्माकुलाभिधानेयनुत्तमानां सदैव तु ।
सम्वर्ताख्या जलाधारा विष्णुभागान्तमुच्छ्रिता ॥२९॥
पूर्वोक्तनालखातादियुक्ता वृत्ता प्रकीर्तिता ।
लिङ्गनाहत्रिवेष्टेन वृत्ताव्यक्तस्य पिण्डिका ॥३०॥

(क) अतः परं क.ख. पुस्तकयोरधिकोऽयं पाठः—
पीठिकायाश्च बाहुल्यं त्वागमेऽष्टास्रकस्य वै १ चिन्हान्तर्गतः पाठो घ. पुस्तके नास्ति । २ पट्टोऽथ ॥इति॥ मू.अ.ग. पा.। ३ तु, क.ख.ग.पा. । ४ पीठिका, ख.पा. । ५ षड्, मू.पा. । ६ तथा, मू.अ.क.पा. । ७ कथन्द्वयेन, मू.पा. ।

व्यक्तस्य तु भवेद्वापी तन्नाहसमदीर्घता ।
तद्दीर्घत्वार्धविस्तारात्तदर्धान्नालकोच्छ्रयौ ॥३१॥
प्रणालमानवच्छुभ्रं परिधी त्र्यंशमध्यतः ।
उच्छ्रये दशधाभक्ते पदं कुम्भं तथा गलम् ॥३२॥
वृत्त जलाश्रयं लध्न्या (?) द्व्यंशं द्व्यंशेन कल्पयेत् ।
खुरं जङ्घां च कर्णौ च कण्ठं चैवोपकण्ठिकाम्१ ॥३३॥
वृत्तं तत्पट्टिकां चैव जलाधारं तथैव२ च ।
एकयुग्मैकपक्षैकयुग्मैकगलांशकैः ॥३४॥
मध्यार्चानां३ भवेत्पिण्डी सुभक्ता द्वादशांशकैः ।
षोडशांशकृतोच्छ्राये ज्येष्ठानामासने सदा ॥३५॥
पक्षेन्दुयुग्मचन्द्राग्नितनुद्व्येकद्विसोमकैः ।
चरणपट्टिकाकुम्भ पट्टिका गलपट्टिका ॥३६॥
वृत्तं तत्पट्टिकाधारं मेखलापट्टिका भवेत् ।
अष्टदिग्रविहस्तैश्च हीनमध्योत्तमास्त्रिभिः ॥३७॥
पिण्डिका स्यान्महार्चानां द्विखण्डाम्बुधरैव वा ।
प्रवेशोद्गमबाहुल्याच्छ्रनालादि४ पूर्ववत ॥३८॥
अभूषणा प्रभाहीना प्रतिमैकार्धसंस्थिता ।
तत्त्र्यंशात्पीठविस्तारस्तत्पादोनसमुच्छ्रयः ॥३९॥
पृथूच्छ्रयौ कलाकांशौ द्व्येकतत्त्वैक५चन्द्रतः ।
खुरं कुम्भो गलो वृत्तो वेदास्रा पट्टिका क्रमात् ॥४०॥
प्रवेशवृत्तशेषाख्या त्वर्धैकार्धैस्त्रिभिः कजम् ।
(६ अन्यत्र त्वेवमेवं स्यात्संवृत्तात्कर्ण७पीठकम् ॥४१॥

---

१ पकर्णिकाम्, क.ख.पा । २ धारान्तमेव, घ.पा. । ३ मध्यर्चानां, घ.पा. । ४ मानादि, ख.पा. । ५ तस्त्वेक, क पा. । ६ चापाःतर्गतोऽयं पाठः ख पुस्तके नास्ति । ७ संवृत्ताव्हंतु, घ.पा. ।

मुखलिङ्गेऽधिका कार्या चतुरस्रा द्विखण्डिका।
सुश्लक्ष्णाश्लिष्टसन्धिश्च रूपेणाम्बुधरादिवत् ॥४२॥
ताम्रै रूप्यैश्च हैमै र्वा पादशोंऽशै१र्निबन्धिता।
सहस्राब्हे२ शताख्ये च वेद्रास्रा चैकखण्डिका॥
केषांचित्तु मते व्यक्तलिङ्गे तु छत्रमस्तके ॥४३॥
लिङ्गहीने भवेन्मृत्युरधिके व्याधयो भृशम्।
तस्माल्लिङ्गानुगं पीठं कर्तव्यं कर्तृजीवने ॥४४॥
लिङ्गे न पीठिकाक्रान्ता पीठं वा३ लिङ्गतोऽधिकम्।
यदि स्यात् पीड्यते रोगैः कर्ता राष्ट्रं गुरूस्तथा४ ॥४५॥
तस्मान्न्यूनाधिकौ कार्यौ हरि५ब्रह्मांशकावुभौ।
उच्छ्रयेण त्रिलिङ्गानां न न्यूनो नाधिको हरेः ॥४६॥
स्वायामं त्वजिनं६ कृत्वा सार्धाष्टांशैः कजासनम्।
मुनिसार्धाधिकैः शम्भुं कुर्यादाढ्यं७ वसोर्हरिम् ॥४७॥
सपादाष्टांशकैस्त्र्यक्षं चक्रिण मङ्गलांशतः८।
पादोनाष्टांशतो ब्रह्मा कार्यं चानाढ्यकं कचिम् ॥४८॥
एकांशेन९ हरोच्छ्रायं विष्णुमष्टांशकैस्तदा।
एकं सुरार्चिते लिङ्गे ब्रह्मा सप्तांशके ध्रुवम् ॥४९॥
प्रसिद्धमोकरश्चान्यदुग्राह्या वर्णसमाशिला।
सितादिवर्णावर्णानां१० पीठाद्या न विवर्णजाः ॥५०॥
स्वांश११पिण्डस्थितं लिङ्गं शैलधात्वादिजं शुभम्।
रत्नजा वाथ लौहैर्वा विशेषात्कीर्त्यतेऽधुना ॥५१॥

१ पादपांशैः, क. घ. पा.। २ सहस्राङ्के, मू. पा ३ पीठस्था, मू. अ. ग. पा.। ४ स्तदा, घ. पा.। ५ हर, क. पा.। ६ स्वयामान्तजितं क. ख. पा. ७ दाढ्यं, क. पा.। दाढ्यं, घ. पा.। ८ मङ्गलांशकः, मू. पा.। १० पीतादिवर्णं, क.ग. पा.। ११ स्वाङ्ग, घ. पा.।

मौक्तिके स्फाटिके तारी१ (?) पौष्परागे तु ताम्रजा ।
वैडूर्याद्युत्तमे नित्यं हेमजा पिण्डिका वरा ॥५२॥
पञ्चधा वा त्रिधा वापि रत्नजं विभजेत्पुनः२ ।
भागद्वयमथैकं वा विन्यसेत् पिण्डिकावटी ॥५३॥
भागत्रयेण वा द्वाभ्यां पूजाभागं प्रकल्पयेत्
मेखलादिविभागोऽस्याः पूर्ववत्समुदाहृतः ॥५४॥
लिङ्गप्रवेशनिम्नं तु लिङ्गसंस्थानविस्तरम् ।
न न्यूनं नाधिकं मानात्शोभनं३ शुभमिष्यते ॥५५॥
सव्रणे चान्यजे (?) मृत्युर्वक्रे च धनसंक्षयः ।
पीठदोषात्क्षयो नार्याः कारो कर्तुश्च सर्वदा ॥५६॥
वृत्ता वापि च४ वेदास्रा अव्यक्तादौ भवेत्क्रमात् ।
भुक्तिमुक्त्युभयप्राप्त्यै अन्यः५ काम्यस्य हेतवे ॥५७॥
धरा भद्रा च यक्षी च वज्रीत्र्यस्राढ मण्डला६ ।
पद्मार्धेन्दुगणाख्या च कामदा शुभमस्तके ॥५८॥
वेदास्रा समकोष्ठा च धरास्याद्धरणीप्रदा ।
द्विमेखला च वेदास्रा भद्रा योगर्द्धिदायिनी ॥५९॥
यक्षी त्रिमेखला वृत्ता महिषी गोप्रदायिनी७ ।
षडस्रायुः प्रदा वज्री मेखलात्रितयान्विता ॥६०॥
त्र्यस्रा त्रिमेखला८युक्ता शत्रुसङ्कोचदायिका९ ।
मण्डला पूर्णचन्द्राभा त्वर्थदा पञ्चमेखला ॥६१॥

---

१ तायी, ग॰ पा. । २ पुरा, घ.पा. । ३ स्वतलं, मू.अ.ख.पा. । सुतलं, घः पाः ।
४ यापी च.मू, पा. । पीठ, क, ख, पा. । ५ प्राप्तौ अन्यः, मू. अ. ग. पा. । ६. वज्राभा श्रान्तमण्डला, मू. अ. ग. पा. । ७ प्रदायिक, घ. पा. । ८ द्विमेखला क.ग घ.पा. । ९ कारिका घ.पा.

खुराब्ज१कर्णिकाकण्ठकर्णिकाब्जदलश्रयैः२
चन्द्राम्बुरुपरामैः३काग्निद्यंशैस्तिथि भाजितैः ॥६२॥
कर्णिकातु प्रवेशार्धषो४डार्ध सकेसरा।
वृत्ता पद्मपुटाकारा कर्णिको भयचुम्बिता ॥६३॥
पुत्रायुः श्रीप्रदा पद्मा त्वर्धेन्द्राभा च शान्तिदा।
अष्टकोणा गणाख्याता४ मुक्तिदा५ स्याद्द्विमेखला ॥६४॥
लिङ्गदैर्ध्यप्रविस्तारा विष्णुं यावत्समुन्नता।
पूर्वोक्तमेखलागर्तनालकादिसमन्विता ॥६५॥
लिङ्गास्त्रीणां प्रसङ्ख्यानैस्तस्य पीठेऽस्त्यो मताः।
विस्तरोच्छ्रयनालादि सर्वं पूर्वोदितं क्रमात् ॥६६॥
दशदिग्गीशलिङ्गानां स्वायामयुगसूत्रकैः।
संवेष्ट्य वर्तयेत्पिण्डीं कर्तुः कामप्रसाधिकम् ॥६७॥
ऐन्द्रीं वैश्वानरीं याम्यां नैर्ऋतीं वारुणीं तथा।
मारुतीं धानदीं रौद्रीं वैष्णावीं ब्रह्मजां सदा ॥६८॥
ऐन्द्र्यां सूत्रं पूरो दत्वा पार्श्वयोर्मत्स्ययुग्मकम्।
सूत्रमध्येऽर्धसूत्रेण मत्स्यान् कोणेषु सर्वतः ॥६९॥
चतुः सूत्रीं पुनर्दत्वा साधयेच्चतुरस्रिकाम्।
वेदास्रं विपिण्डकाक्षेत्रं कुण्डानामपि सर्वदा ॥७०॥
तुर्यांशे कर्णसूत्रार्धं गृहीत्वा भ्रास्य यत्नतः।
मध्यान्मध्यगतं सूत्रं६ कोणं संवेष्ट्य चापरम् ॥७१॥
क्षेत्रं कृत्वा शरांशं तु कृत्वा चोत्तरतोंऽशकम्।

---

१ कराब्ज, ग.पा.। २ जलाश्रयैः, मू.अ.क.ख.ङ.पा.। ३ केधरा चामे, क. पा.। ४ ख्यः तु;मू.पा.। ५ भुक्तिदा, घ. पा.। ६ सूत्रैः क. ख. पा।

तत्सूत्रद्वयसंयोगात्साधयेद्वा त्रिपर्णिकाम्[१] ॥७२॥
क्षेत्रं चतुर्धा[२] कृत्वा तु द्व्यंशौ द्व्यंशौ च पार्श्वतः ।
संभ्राम्य मध्यतः सूत्रं साधयेदर्धचन्द्रिकाम् ॥७३॥
विभज्य पञ्चधा क्षेत्रं भागैकैकं प्रदाय च ।
रक्षोऽग्निसौम्यकाष्ठासु त त्रिसूत्र्य[३]त्रिकोणिकाम (?) ॥७४॥
सप्तभागीकृते क्षेत्रे ([४]त्यक्त्वैकांशं वहिस्ततः[५] ।
मध्याधसूत्रसंभ्रान्तैः पिण्डिका वर्तुला[६] भवेत् ॥७५॥
मध्यात्कोणे; चिकारांशं त्यक्त्वा वृत्ते कृते सति ।
तुर्यास्रवृत्तयोर्मध्ये यमन्द्धोः सूत्रपातनम् ॥७६॥
तत्सूत्रा[७]द्धद्द्सूत्रान्तं[८] तिर्यक्कोणेषु सूत्रकैः ।
भवेत्षडस्रिकापिण्डी शेषरेखाविथोपनात्[६] ॥७७॥
नग भागी कृते क्षेत्रे) भागैक परितो न्यसेत् ।
सूत्रमध्यार्ध संवृत्तादब्जा स्यात्[१०] पूर्वचोदिता ॥७८॥
नवधा भाजिते क्षेत्रे तथांशं[११] बाह्यतः क्षिपेत् ।
मध्यसूत्रार्ध भागेन[१२] कोणानि ह्रासयेदथ ॥७९॥
जिनांशे बहिरेकांशं हत्वा[१३] कोणार्धलाञ्छनैः ।
कोणैः[१४] सूत्रपरिच्छिन्नैः कुर्यादष्टास्रिकां सदा ॥८०॥

---

१ बोधिपर्णिकाम्, मू. अ पा. । २ तु नवधा, ख. पा. । ३ त्रिसध्या, क. ख. पा. । ४ चिन्हान्तर्गतोऽयं पाठो मू. अ. ग. प्रस्तकेषु नास्ति । ५ वहिस्थितः, घ. पा. । ६ वर्तनाद्, घ. पा. । ७ तत्सूत्रं, घ. पा. । ८ सूत्रार्धं, घ. पा. । ६ लेखाविलोपनात्, ख. घ. पा. । १० दब्जाभा, ग. पा. । ११ तयांशं, ख पा. । १२ द्विभागेन, ख. घ. पा. । १३ कृत्वा, मू. अ ख. ग. पा. । १४ कोणा, घ. पा. ।

अष्टांशो बहिरेकांशं न्यस्त्वा कोणाधसूत्रकैः ।
संछिद्यास्त्रींश्च संछिद्य कृत्वा तु दशमास्त्रिकम्[१] ॥८१॥
कोणान्तौ द्वौ च हत्वांशौ[२] सूत्रं सपात्य कोणतः ।
कर्तव्या षोडकांशैस्तु[३] पिण्डिका केशवाश्रया[४] ॥८२॥
षोढा विभज्य च क्षेत्रं कृत्वैकांशं तु बाह्यतः ।
पूर्ववत्षोडशांशैस्तु कुर्याद द्वात्रिंशदस्त्रिकाम् ॥८३॥
चतुरास्त्रा भवेदैन्द्री सा सैन्यस्तम्भने मता ।
आग्नेयी बोधिपत्राभा पिन्तरोगाग्निदाहकृत् ॥८४॥
अर्धचन्द्राकृतिर्याम्या शत्रूणां क्षयकारिका ।
त्रिकोणा राक्षसाजां तु देशोऽच्छदकरी सदा[६] ॥८५॥
वारूणी[७] मण्डलाकारा सा चाप्यायनकारिणी ।
वायव्या च षडस्त्रोक्ता शत्रूच्चाटनकारिका ॥८३॥
पद्माकारा परा सौम्या धनपुष्टिप्रदा सदा ।
रौद्री त्वष्टास्त्रिका[८] ज्ञेया मुक्तिदा सरिनाशिनी ॥८७॥
वैष्णवी षोडशास्त्रा तु रिपुमर्दनकारिका ।
द्वात्रिंशदस्त्रिका ब्राह्मी स्वर्गाख्याफलदायिनी ॥ ८८ ॥
रक्षो वीन्द्रेस्वरान्तस्था ग्रामेषु केशवाजयोः ।
अर्धचन्द्रोपमा नीलं शेषः कोदण्डवद्भवेत् ॥८६॥
स्वायुधैर्लाञ्छिताः सर्वाः सेन्दुनालाः स्वदिक्स्थिताः ।
पिण्डीमामस्तकादीनां करोत्येवं विधां फलम् ॥६०॥

---

१ दशभांशिकीम्, क. ग. पा. । २ पूर्वांशैः. मू. अ. पा. । ३ शैवं, घ. पा. । ४ श्चये, घ. पा. । ५ द्वेषो, क.पा. । दोषो, घ०पा० । ६ तुसा, घ० पा० ७ वारूणा, घ० पा० । ८ रष्टाश्रिका, ग०पा० ।

भगमध्ये स्थितं लिङ्गं लिङ्गाधो भगसंस्थितिः ।
भगलिङ्गाङ्कित सर्वं त्रैलोक्यं सचराचरम् ॥६ ।
श चय थो१(था) थारशक्तिश्च उमा स्यात्पीठरुपिण- ।
शिवलिङ्गं परं तत्त्वं तयोर्योगा३न्महत्फलम् ॥६२॥
त्रिगुभागान्तविस्तीर्णा तदर्धं दल४निर्मीता ।
दलाङ्घ्रेर्गतिका कूर्मो५ वेदास्रा षलिङ्गतिनी ॥६३॥
ब्रह्माद्योच्छ्रय वेदास्र त त्रिधा विस्तरैकजम्६ ।
चतुरस्रं त७द्गतं स्याद् ब्रह्मांश८न्तु प्रकल्पितम् ॥ ४॥
कत्रितलिङ्गाध्र्वविस्तारा तदर्धे चतुयुगात्मिका ।
तत्पादश्वभ्रिका सा१०ज्जा ब्रहगर्ता शिला भवेत् ॥६५॥
कृत्वा साष्ट१ दलाम्भोजं मध्ये पत्रेषु(सु) खातकम् ।
कार्या ब्रह्मशिलान्यार्थि११ वृत्ता १२यस्रा तु१२साधने ॥६६॥
देवपीठं तथेशानो वृषो ब्रह्मशिलापि च ।
एकजं चैक वर्णं वा शुभमेतदतोऽशुभम् ॥६७॥
सुनिष्पन्नेषु लिङ्गेषु मानल१३ क्षणवत्सु च ।

---

१ शक्त्यन्ता, घ० पा० । २ रूपिका, घ० पा० । ३ तयोर्यागात, घ०पा० । ४ तदर्धदल, घ०पा० । ५ कूर्म, मू०घ०पा० । ६ वेदास्रा तन्त्रिधा विस्तरैकजा, घ० पा० । ७ रस्रयंशतं, घ० पा० । ८ ब्रह्माङ्गं, घ० पा० । ९ तदर्थोच्चा, क० ख० घ० पा० । १० थाष्ट, क० पा० । ११ न्योऽर्थो, घ० पा । १२ त्यस्रान्त घ० पा० । १३ नाल, ख०पा० ।

मूल्यं समवधार्यादौ वणिजो दैशिकोत्तमः ॥६८॥
स्वप्रजानृपवृद्ध्यर्थं प्रागाचार्यं तु लक्षयेत् ।
पश्वादिजाद्विपाषण्डां स्ततो मूल्यं प्रकाशयेत् ॥६९॥
वीरक्रमा[1]दुगृहीतं सद्वर्षा[2]पर्युषितं यदा ।
तदार्धेनाध्वरं कृत्वा लिङ्गं स्थाप्यं सुवासरे[3] ॥१००॥
इति लक्षणसमुच्चये पीठवर्तनं नामाटष्मो विधिः ॥

अथ नवमः

त्रिशूलम्

दिक्पतीनां हरादीनां शूलाद्यस्त्राणि च ब्रुवे ।
वेदास्रे ग्रहभक्ते[4] स्यान्मध्ये शूलं तु रन्ध्रतः ॥ १ ॥
अर्धार्धांशैस्तु पक्षास्यामुत्पलं[5] मुकुलाकृतिः ।
त्यक्त्वार्द्र[6] सार्धौ द्विविस्तारौ षड्भिर्दीर्घौ भ्रमान्मतौ ॥२॥
शङ्गे द्वे शूलपार्श्वे च[7] त्वगस्थिकलि[8]कोपमे ।
तद्वृत्तौ द्व्यर्धदीर्घौ च कर्तव्यौ च सुशोभनौ ॥३॥
मध्ये मूला[9]र्धदैर्घ्येण त्वधो वेद्यब्जमण्डिता ।
वेद्यग्रहतात्त्रिधा दैर्घ्याद्दण्डः कार्यस्त्रिविस्तर ॥४॥

---

१ वीरक्रया, घ० पा० । २ सद्द्धा, मू पा० । सद्दद्धा, घ० पा० । ३ सुरासुरे, मू०अ०ग०पा० ।
४ वेदास्त्रं ग्रहभक्तं, क० ख० घ० पा० । ५ मुत्पल, घ०पा० ।
६ त्राज्ञा, घ० पा० । ७ तु, घ० पा० । ८ काल. क० ख० पा० । ९ शूला, मू० अ० घ० पा० ।

लुप्त्वा रेखां सीतैः शूलं रक्तं दण्डे कुशेशयम् ।
सिते रेखा भवेद्दण्ड ऐश्यामेव त्रिशूलकम् ॥५॥

वज्रम्—

कृत्वा दण्डं त्रिशूलाधो वज्रं पीतं सिताम्बुजम् ।
मध्ये शृङ्गं तु पीतं वा हरिते पक्षशङ्गके ॥६॥
पक्षशृङ्गं यदा पीत तदान्तर्हरितं भवेत ।
एवं संक्षेपतो वज्रं ख्यातमिन्द्रस्य पूर्वतः ।७॥

शक्तिः—

दण्डाग्रं प्राक् त्रिशूलं च पक्षशृङ्गे यदा कृते १।
लोहितं मध्यमं शृङ्गं २ वन्हेः शक्तिस्तदा दिशि ॥८॥

दण्डः—

दैर्घ्यांशं जिनवत्कृत्वा वेदाग्रुग्मात्प्रविस्तरः ।
मूले चाग्रे च दण्डस्य कार्यो वृत्ताग्रमूलतः ॥६॥
मुष्टिग्राहे सितत्र्यंशाद्दण्डमध्ये सिताम्बुजम् ।
वेदाद्बहिःसिता रेखा३कृष्णा याम्ये यमस्य तु ॥१०॥

खड्गः—

सप्ताङ्गं चतुरस्रं स्यान्मध्याधोंशेन गञ्जकम् ।
वृत्ताग्रं पादसंवेशात्कोणमूलं४ सुशोभनम् ॥११॥
तदूर्ध्वे सार्धभागेन त्र्यंशदैर्घ्याद्भ्रमात्सदा ।
वल्कलं खण्डचन्द्राभं तन्मध्योर्ध्वद्विसार्धत५ः ॥१२॥

---

१ हते, घ० पा० । २ शूलं, क० ख० पा० ।
३ वेधा, मू० अ० पा० । ४ काममूलं, ख० घ० पा० । ५
मध्येऽर्ध, मू० अ० क० ख० पा० ।

अन्तर्दण्डांशतः१ कार्या मध्यस्थूलं द्वयोः२ कृशा ।
तत्समेऽप्युन्नतं मध्ये मुखं तन्मूलपक्षयोः ॥१३॥
अर्धांशपृथुलौ गुच्छौ त्र्यंशाद्दीर्घौ कलेन्दुवत् ।
मुष्टिं संवर्तयेदेवं पीतं वा सितरूपकम् ॥१४॥
तन्मुखं पार्श्वयोः कुर्याद्भागार्धोऽर्धप्रविस्तृतम् (?) ।
मुष्ट्युच्छ्रयाच्चतुर्धातो दीर्घः खड्गाग्रवर्तुलः ॥१५॥
धूम्राभा स्यात्सिता धारा भागार्धविस्तरं जलम् ।
भृङ्गाभं त्र्यंशसन्त्यागात्खड्गो नैऋतराक्षसे ॥१६॥

पट्टिशः—

पट्टिशं खड्गसंकाशं चतुर्धारा३समन्वितम् ।
प्रसङ्गाद्गदितं शस्त्रमक्षोभ्य योगिनीप्रियम् ॥१७॥

पाशः—

जिनभागीकृते नाहे पृथुत्वं तत्त्रिभागतः ।
मुखपुच्छार्धमाद्यन्ते दिग्देशैर्युगमध्यतः ॥१८॥
मध्ये रेखाद्विभागान्ते वृत्तवद्वामदक्षयोः ।
भाम्य द्वौ द्वौ द्विभागाभ्यां मध्यकोष्ठद्वये बुधः ॥१९॥
(कोणसूत्रं४ भवेत्तत्र मध्यरेखाप्रलोपयोः ।
ग्रन्थिरूपं यथा सम्यक् तथा तत्परिलोपयेत् ॥२०॥
अग्रे मध्यांशके वक्त्रं बद्धं५ बकुलसन्निभम् ।)
तदधोंऽशेन६ वक्त्रं स्यान्नासाक्षिरसनान्वितम् ॥२१॥

१ दण्डं शतः, घ० पा० । २ त्वधः ख० पा० । ३ चतुर्धा वा, मू० पा० । ४ चिन्हान्तर्गतोऽयं पाठः घ० पुस्तके नास्ति । ५ वज्रं बद्धं, मू० पा० । कैरवज वन्द्यं, क० ङ० पा० । ६ ऽर्धेन, ख० पा० ।

तदधोभागमध्यस्थाद्भ्रामयेदर्धचन्द्रवत् ।
तदधः पार्श्वयोर्द्व्यंशे कर्णसूत्रं द्वयोः समम् ॥२२॥
फणसोऽश्वत्थ१पत्राभो मध्ये पङ्कजलाञ्छितः ।
द्व्यंशाधो ह्रासयेत्पुच्छं स्वांशं२ द्व्यंशेन चाणतः ॥२३॥
शेषरेखाविलोपेन३ रेखाभिर्मध्यशोभितः ।
सितोऽहिः कृष्णजिह्वास्यो रक्ताक्षश्च सुशोभनः ॥२४॥
सम्मुखः सितकालश्च४ कचिच्छ्यामो भयङ्करः ।
वारूण्यां वारूणः पाशः कर्तव्यो दिशि देशिकः ॥२५॥

ध्वजः—

षोडशांशं तु विष्कम्भं लुप्त्वा रामं तु कोणतः ।
वायुकोणेऽम्बुतः प्रोक्तं५ द्व्यंशेन तु च दर्पणम् ६॥२६॥
तन्मूर्निमध्यतो द्व्यंशाच्चन्द्रार्धं बाणतो भ्रमात् ।
चन्द्रार्धात्कोणतो द्व्यंशं लोपयेज्जलत७स्ततः ॥२७॥
रन्ध्राधो युग्मतस्त्यक्त्वा तत्कोणान्नवभागगान् ।
अधो भूतेन विस्तारात्तिर्यक्सूत्राद्द्विरूर्ध्वतः ॥२८॥
कचिद्रम्भादलाभासा कदलीपत्रविस्तरा ।
तद्द्व्यंशेन ऋजुं कुर्याद् ध्वजं वा कुटिलाहिवत् ॥२९॥
रोहितमत्स्यपुच्छाभं द्व्यंशसंवेशनात्सदा ।
नैरृत्यात्पञ्चवेशेन सूत्रं विन्यस्य कोणतः ॥३०॥

---

१ फणसध्वज, क०पा० । फणसाष्टक, ख०पा० । २ स्वांश, घ० पा० । ३ लेपेन, घ पा० । ४ कोलश्च, घ० पा० । ५ कोणाम्बुतःप्रोक्तं, क०ख०पा० । ६ तदर्पणम् मू०पा० । ७द्यन्ततः, मू.पा.

भ्रामयेत्षट्पदोऽर्धेन तदधो द्यंशतः पुनः ।
ईशानात्सप्तपूर्वेण सप्तवेशाद्भ्रमात्पुनः ॥३१॥
(तदधो १ द्यंशतः पार्श्वात्सूत्रं संभ्रामयेत्ततः ।
दर्पणात्प्राग्जलशांश्च ब्रह्मसूत्राहिभागतः॥३२॥)
दण्डः क्षेत्रसमः कार्यो द्यंशेन विस्तरो रुणः ।
शेषरेखाः विनाशेन घायोर्ध्वजश्च मारुते ॥३३॥
शिरो२दर्पणखण्डेन्दुर्ध्वजः पीतोऽथवा हरित् ॥३४॥

गदाः—

नाहमेकं ४ द्विधा कृत्वा विस्तरं तद्भूतांशतः ।
आद्यन्ते सम्बिका द्वाभ्यां वृत्तमेकेन पार्श्वयोः ॥३५॥
भागैकं पार्श्वयोर्लुप्त्वा मध्ये पीतं५ सितं जलैः (जे ।
पीता गदारुणे रेखा मध्यरेखा शुकप्रभा ॥३६॥
आद्यन्ते शृङ्खला कार्या मध्यरेखा६ वलम्बिनी ।
कटिकाङ्घ्रिसमा वृत्ता चतस्रो रेखिकास्तथा ॥३७॥
पीतवर्णेन ताः७ कार्या हरितेन कचित्सिता ।
कुवेरास्त्रं भवेदेवं सोमकाष्ठास्थितं सदा ॥३८॥

---

१ चिन्हान्तर्गतः पाठो मूलपुस्तके नास्ति । २ शेषवेशा, मू० अ० क० ख० ग० ङ० पा० ३ शितो, ङ० पा० । पद्मं, क० ख० पा० । ४ नाहिमर्कं, घ० पा० ।

५ पद्मं, घ० पा० । ६ मध्यभागा, ग० घ० पा० । सा, क० ख० पा० । ततः, ग० पा० ।

पद्मम्—

ब्रह्मास्त्रं १वर्तयेत्पद्मं सारकेसरकर्णिकम् ।
सुश्वेतं रक्तनेम्याढ्यमीशेन्द्रान्तरसंस्थितम् ॥३९॥

सुदर्शनचक्रम्—

वेदास्त्रं रविभिर्भक्तं मध्यादंशाद्भ्रमाद्भवेत् ।
नाभिमध्यान्ततोंऽशेन२ मेखला भ्रमतो भवेत् ॥४०॥
नाभिमध्यात्पुनर्भ्रान्त्वा मेखलाबहिरग्नितः ।
तद्वत्तत्परतोंऽशेन भ्रमाच्चक्रं तु वर्तुलम् ॥४१॥
नाभिमध्यान्तरे रेखां विलुप्य परिवर्तयेत् ।
अष्टदिक्ष्वारकास्त्वष्टौ क्वचिद्वा षोडशारकाः ॥४२॥
इन्दीवरदलाभा च३चक्रयुग्मासु पुष्पवत् ।
चक्राधः प्रान्ततत्त्र्यंश४शाद्द्विविस्ताराद्रसभागिकम्५ ॥४३॥
तदधो वेदविस्तारा वृत्ताख्या तु तथोंच्छ्रयात् ।
एकेनोच्चा प्रविस्तारा पट्टिका चतुरस्रिका ॥४४॥
रस भागेन६ सा कार्या पार्श्वतो ऋजु वा क्रमात्७ ।
चक्रस्यासनमेवं तु रश्मयः परितस्ततः ॥४५॥
मूर्ध्नि त्र्यंशात्समुच्छ्रायः पार्श्वयोरर्धभागतः ।
भ्रमादब्जकलीनप्रख्या चक्रमध्ये व्यवस्थिता ॥४६॥

---

१ ब्रह्माण्डं, घ पा० । २ मध्यात्तु तांशेन, घ०पा० । ३ भासो, ख० पा० । ४ मध्यतो द्यंशा, क० ख० पा० । ५ मसूरी चासतोन्नता, ख०पा० । ६ वसुभागेन, ग०पा० । ७ ऋतुवर्जनात् ख० पा० । ऋतुवत्क्रमात्, क०ग०घ०पा० । ८करी, ख०पा० ।

शेषाद्ध्रा १ सिद्धिर्दीर्घाणि पृथुत्वांशांशवर्तनात् ।
अष्टौ संख्याः प्रकर्तव्याः पार्श्वे चैवापरे तथा ॥४७॥
रश्मयोऽसृक्विसतं पीठं शेषरेखा विनाशनम् ।
कृपाणपाशयोरन्तः सुदर्शनं हरेर्लिखेत् ॥४८॥
त्रिशूलादीनि शस्त्राणि सौम्यमूर्ध्नि शुभानि तु ।
प्राक्शिरस्कौ२ गदादण्डौ स्वभागैरंशसाधनम् ॥४९॥
ईशादिविष्णुपर्यन्तं लोकेशानां स्वकायुधम् ।
ज्ञेयं शूलादिचक्रान्तं तद्दिक्कान्तिबलात्मकम् ॥५०॥
करणेऽन्यः३ प्रकारेण त्रिकाख्यः४ पुनरन्यथा ।
उक्तान्यस्त्राणि बाणाख्या (ख्या) घण्टेभाद्यथ वक्ष्यते ॥५१॥

घण्टा—

अष्टधा भाजिते क्षेत्रे मध्ये पार्श्वाद्द्वि५द्विरूर्ध्वतः ।
भागार्धेन दलं कुर्याद्वृत्ताख्यं वृत्तपट्टिके६ ॥५२॥
भागार्धेन शिरः स्थूलं पक्षयोरर्धनिर्गमम् ।
ग्रीवाद्धा विस्तरार्धाद्धा स्कन्धार्धांशविनिर्गमौ (मः)७॥५३॥
वृत्ताकारेण पक्षाभ्यां सार्धवेदावतारणम् ।
चतुर्भागप्रविस्तारौ (रो) भागार्धपक्षयोर्युतः ॥५४॥

---

१ शेषार्धं, ख० पा० । शेषाद्धीं घ०पा
२ शिरस्थौ, मू० अ० ग० पा० । ३ किनणेऽन्यत्, क०ख०घ० पा० । ४ त्रिकाख्ये, घ० पा० । ५ पार्श्वौ, घ० पा० । ६ पक्षपट्टिके, क० ख० पा० । ७ स्कन्धाद्ध्यंशविनिर्गमैः, मू०पा

कर्णसूत्रेण तत्कार्यं१ तदधोऽर्धार्धनिष्क्रमात्२ ।
उच्छ्रयार्धं तु विस्तारा पट्टिकात्रितयान्विता ॥५५॥
शेषभागविनाशेन३ घण्टा ह्येवं सुरप्रिया ।
पद्मस्कन्धाद्द्विभागेन कर्तव्या लक्षणान्विता ॥५६॥
हारधारावलीयुक्ता पाशलालू४कमण्डिता ।
सुस्वरा५ कांस्यजा श्रेष्ठा स्वदेवायुधरक्षका६ ॥५७॥

वाहनाः—

वेदास्रमष्टधा कृत्वा संलक्ष्य वर्तयेत्क्रमात् ।
गजाश्वोऽश्वतरोष्ट्रांश्च तदारोहांस्तु त्र्यंशतः ॥५८॥
एकांशेन७ तदूर्ध्वं च गोगवयलुलायकाः ।
भवेयुः पशवोऽप्यन्ये मृगगर्दभगण्डकाः ॥५९॥
व्युलव्य ८ गाव्यजश्वानस्तेनाक्षालक्षमोहिकाः९ (?) ।
जलोना व्याघ्रकप्युष्ट्रा लक्षादार्जनकस्तथा (?) ॥६०॥
पञ्चांशोनास्तथा कार्या बभ्रूशशकमूषकाः१० ।
षडूनाद्११ग्राहगोधा स्यान्नक्रमत्स्यावधौ१२ सदा ॥६१॥
इति लक्षणसमुच्चये वाहनायुधवर्तनं नाम नवमो विधिः ।

---

१ कार्यौ, घ० पा० । २ तदधोऽर्धविनिष्क्रमात्, ग० पा० ! ३ विशेषेण, मू० अ० क० ख० ग० ङ० पा० । ४ लोलूक, क० पा० । ५ सुस्वना, घ० पा० । ६ सुदे वाद्यधरान्तरा, मू ७ पा० । ७ एकांशोना, घ० पा० । ८ व्युलंध, घ० पा० । ९ स्तुनाक्षो लक्षसाहिका, घ० पा० । १० मशक, मू०पा० षडूना ग्राह, घ० पा० । ११ मत्स्याचरौ, मू० पा० । मत्स्यावकौ, ग० पा० ।

अथ दशमः

अत ऊर्ध्वं प्रवक्ष्यामि काललग्नादिनिश्चयम् ।
द्वित्रुटिभ्यां लवः प्रोक्तो निमेषो द्विलवात्मकः ॥१॥
दशपञ्चनिमेषैस्तु काष्ठोक्ता कालवेदिभिः ।
त्रिंशत्काष्ठाः कलां विद्यात्क्षणं त्रिंशत्कलां बुधः ॥२॥
क्षणैर्द्वादशभिर्ज्ञेयो मुहूर्तस्तत्त्ववेदिभिः ।
ताभ्यां नाड्यथ नाडीभ्यां नीणाभ्यां१ षोडशांशकैः ॥३॥
घटी चतसृभिस्ताभिः प्रहरः परिकीर्तितः ।
तैरष्टभिरहोरात्रं पक्षस्तैर्दशपञ्चभिः ॥४॥
ताभ्यां मासस्तु मासाभ्यामृतुस्तैरयनं त्रिभिः ।
ताभ्यां संवत्सरः प्रोक्तस्तैः शतैः पुरुषायुषः ॥५॥
नक्षत्रे यत्र तत्रापि सर्वकालं द्विपक्षयोः ।
मुमुक्षोः स्थापनं शस्तं यतेः कामार्थिनो ध्रुवे २ ॥६॥
प्रावृषि स्थापनं सिद्ध्यै भवेच्छरदि योगदम् ।
हेमन्ते ज्ञानदं लिङ्गं शिशिरे सर्वभूतिदम् ॥७॥
लक्ष्मीप्रदं वसन्ते च ग्रीष्मे च जयशान्तिदम् ।
यतीनां सर्वकालेषु लिङ्गस्यारोपणं मतम् ॥८॥
उत्तराशां गते भानौ लिङ्गस्थापनमुत्तमम् ।
दक्षिणेत्वयने३ऽपूज्यं त्रिवर्षोर्ध्वं भयावहम् ॥९॥

---

१ हीनाभ्यां, ख० पा० । २ ध्रुवम्, मू० अ० ग० पा० । ३ दक्षिणाशायने, मू० अ० ग० पा० ।

क्ष्मादिग्रहणविन्यासौ पदषट्कं ध्वजान्तिकम् १ ।
क्षयाय वृद्धये स्याच्च याम्ये सौम्येऽपरे रवौ ॥१०॥
कर्तृनृपप्रजाराष्ट्रस्थाननाममरस्य२ च ।
षट्त्रण्मासोत्तरांस्त्र्यब्दान्मयमतात्फलं क्रमात् ॥११॥
सङ्ग्रहे स्थापनं नेष्टं तथा वै दक्षिणेऽयने ।
अभिचारो भवेत्तत्र स्थापिते दक्षिणेऽयने ॥१२॥
सङ्ग्रहे स्थापिते लिङ्गे व्याधिभिः पीड्यते प्रजा ।
कुमाराः संप्रपीड्यन्त कन्यानाशश्च जायते ॥१३॥
सुमहाञ्शस्त्रकोपश्च तदा राज्ञां प्रजायते ।
कर्तुः क्षयः सदा शोको गृहे भवति दारुणः ॥१४॥
तस्मान्न स्थापयेद्देवं सङ्ग्रहे दक्षिणायने ।
शुभार्थी न प्रवर्तेत देव्या मन्त्रादिशास्त्रतः३ ॥१५॥
पार्थिवः पालयेद्धर्मं स्वराष्ट्रशुभकाङ्क्षकः ।
तस्मात्स्थानं गुरुं४ प्राप्य रक्षये५त्सदाभिचारकम् ॥१६॥
पक्षार्धेन गृहस्थानां६ यावद्दिनकृदुत्तरे ।
स्थापनं तु प्रकर्तव्यं शिशिरादावृतुत्रये ॥१७॥
सद्दिने सितपक्षे च सद्वारर्क्षविभूषिते ।

---

१ ध्वजादिकम्, मू० पा० । २ मचरस्य, क० ख० पा० ।
३ मतादि, क० ख० पा० । ४ स्थानगुरू, मू० पा० ।
५ रक्षार्थं, ख० पा० । ६ गृहे स्थापयं, मू० अ० क० ग० पा० ।

सचन्द्रतारकायोगे[1] सुलग्नकरणान्विते ॥१८॥
द्वैतदेवे[2] प्रतिष्ठा स्यान्मित्रे च सितपक्षके ।
अद्वैतं चैव कृष्णेऽपि मन्त्रमूर्तिप्रभेदतः ॥१९॥
द्वैतासिद्धान्तकी रौद्री शतवर्षाणि तिष्ठति[3] ।
पाञ्चरात्राहरेन मिश्रा[4] पञ्चाशद्वर्षसंस्थितिः ॥२०॥
अद्वैता भैरवी सा तु वामदक्षिणमन्त्रजा[5] ।
शताब्दोर्ध्वं तु सा तिष्ठेद्बाणलिङ्गं स्वयम्भुवत्[6] ॥२१॥
प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्वात्तु[7] तिष्ठतेः ।
बह्वर्थत्वान्निपातानां संस्कारादौ प्रतिष्ठितिः[8] ॥२२॥
अर्थस्तद्द्वयमेतस्य गीयते शाब्दिकैर्जनैः ।
संस्कृता द्रव्यसन्मन्त्रसंस्मृतिर्या सुरस्य च ॥२३॥
आसीना चैव सुप्ता च यानस्थोर्ध्वान्तरिक्षगा ।
प्रतिमां पञ्चभेदैस्तु प्रतिष्ठा पञ्चधोदिता[9] ॥२४॥
तास्तु पक्षे सिते कार्या द्वितियादौ तिथिष्वथ ।
द्वितीयायुमति[10] दद्यात्तृतीया पुत्रसंपदः ॥२५॥
पञ्चमी च श्रियं नित्यं सप्तमी रोगनाशनम् ।
दशमी भूमिलाभं[11] च सौभाग्यं च त्रयोदशी ॥२६॥

---

१ व्यचन्द्रतारकायोगे, मू० पा०। चन्द्रतारकयोगे तु, क० पा० । २ द्वैते देवे, मू० पा० । ३ वर्षाभितिष्ठति, क० पा० । ४ पञ्चारात्रीहरेर्मिश्रा० मू० पा० । ५ मन्त्रिता, ख० पा० । ६ लिङ्गाश्रयं भवेत्, मू० पा० । ७ पूर्वाच्च, मू० पा० । ८ प्रतिः स्थितः, घ० पा० । ९ चोदिता, ख० घ० पा० । १० मतिः, घ० पा० । ११ भूमिवृद्धिं, क० ख० घ०

नानाविधं धनं धान्यं १ पौर्णमासीतिथिः सदा ।
एकतुं शङ्करैर्नन्दा भद्रा पक्षर्षिभानुभिः ॥२७॥
जया रामाहिकामैः स्याद्रिक्ता वेदग्रहेन्द्रकैः ।
बाणदिक्तिथिभिः पूर्णा हीनतुल्याहिताः क्रमात् ॥२८॥
एताः शुक्लेऽनुलोमाः स्युर्बहुले च विलोमतः ।
बृहस्पतिर्द्विपञ्चायुर्बुधो जयधनानि च ॥२९॥
सम्पदर्कः शुभं शुक्रश्चन्द्र शान्तिप्ररोहणे ।
कर्कः२ वृषतुलाचापस्त्रीसिंहग्राहयुग्मके ॥३०॥
मत्स्यघटालिमेषेषु दिनेशानां प्रधानता ।
षडष्टचतुरोयामाच्चतू राशिक्रमेण तु ॥३१॥
पुष्यश्३रोहिणिकाहस्तात्प्रागाषाढोत्तरा द्विजे ।
पुनर्वस्वनुराधा च चित्रा ज्येष्ठा महीभुजि ॥३२॥
धनिष्ठाश्रवणा (णौ) वैश्ये युग्मभाद्रपदास्तथा ।
अश्विनी रेवती शूद्रे स्वातीफल्गुनिकाद्वयम् ॥३३॥
चातुर्वर्ण्ये मघा श्रीदा मूलार्द्राभरणीमृगाः ।
एते प्रवीण४लोकानां (?) चत्वार्येवान्त्यजे तथा ॥३४॥
जयारोग्यकरस्तिष्यो रोहिणी धनवृद्धिदा ।
हस्ता सिद्धिप्रदा लिङ्गे आयुर्दाषाढयुग्मकम् ॥३५॥
पुनर्वसुः सुखं दद्यादनुराधा तु सम्पदम् ।
चित्रात्वर्थसुखं५ नित्यं ज्येष्ठा रोगविनाशकृत् ॥३६॥

---

१ धनं नूनं, मू० पा० । धिय परं, ख० पा० ।
२ कर्कि. घ० पा० । ३ यस्य. ग० पा० । ४ प्रवणि. मू०
अ० घ० पा० । ५ त्वर्थं सुख. ख० पा०।

धनिष्ठारिक्षयं दद्याज्ज्ञानद्धीः श्रवणः सदा ।
युग्मभाद्रपदा वृद्धिं बहुमित्राणि चाश्विनी ॥३७॥
रेवती पुष्टिदा नित्यं स्वाती कुर्याद्धनं बहु ।
फल्गुनीद्वितयं वृद्धिं भरणी रिपुभेददा[१] ॥३८॥
आर्द्रा सौभाग्यसंपत्तिं मूला (लं) च नृपसत्क्रियाम् ।
मृगः शान्तिप्रदो नित्यं धन्या शतभिषान्त्यजे ॥३९॥
अश्लेषा कृत्तिका चैव विशाखा च शुभप्रदा ।
शस्तो जीवो नवर्द्धेषु सप्तस्थानेषु सर्वदा ॥४०॥
बुधः षड्द्व्यष्टतुर्येषु दिक्सप्तभू (षड्)विना शिर(सि)तः ।
सप्तर्तु त्रिशादिग्स्थः शशाङ्को बलदस्तथा ॥४१॥
रविर्दशत्रिषट्स्थो राहुस्त्रिदशषड्गतः ।
षट्त्रिस्थानगताः शस्ता[३]मन्दाङ्गारककेतवः ॥४२॥
शुभाः क्रूरास्त पापाश्च सर्व एकादशस्थिताः ।
एषां दृष्टिर्मुनौ पूर्णा त्वार्द्धिकी ग्रहभूतयोः ॥४३॥
पादिकी रामदिक्स्थाने[४] वस्वर्द्धौ[५] पादवर्जिता ।
द्वितीया संपदाख्या तु चतुर्थी क्षेमसंज्ञिता[६] ॥४४॥
षष्ठी च साधिका तारा त्वष्टमी मित्रनामिका ।
नवमी चातिमित्रा स्यादेताः पञ्च बलप्रदाः ॥४५॥
प्रीतिः सौभाग्यमायुष्मान्सुकर्माशोभनो धृतिः ।
वृद्धिः सिद्धिर्ध्रुवः साध्यो वरीयाञ्छि[७]वशुक्लकौ ॥४६॥

---

१ रिपुभेदम् क। ख। घ। पा। । २ षडष्ट. मू। पा। ।
३ श्रेष्ठा मू। अ। क। ग। ङ। पा। । ४ स्थान्ये, मू० पा० ।
५ वस्वष्टौ, क० ग० पा० । ६ संज्ञिका, घ० पा० । ७ च्छुभ,
मू० अ० ग० पा० ।

ब्रह्मेन्द्रौव शुभश्चेति योगाः स्वसंज्ञकाः शुभाः ।
बव च बालवं चैव कौलवं तैतिलं तथा ॥४७॥

गरं च वणिजं चैव शकुनि च चतुष्पदम् ।
नागं किंस्तुघ्नमर्थाय विष्टिहीनं तु पत्रयोः ॥४८॥

पादन्यून (ना) चतुर्नाडी[१] भोगः स्यान्मीनमेषयोः[२] ।
वृषकुम्भौ तु भुञ्जाते चतस्रः पादवर्जिताः ॥४९॥

मकरो मिथुनं पञ्च चापालिहरिकर्कटाः ।
पादोनाः षट् तुलाकन्ये घटिकाः सार्धपञ्च तु ॥५०॥

केसरी च वृषः कुम्भः स्थिराः स्युः सिद्धिदायकाः ।
चरं धनुस्तुलामेषाः प्राग्युग्मं मीनकन्यके ॥५१॥

कर्कटो मकरोऽलिश्च प्रव्रज्याकार्यनाशकाः ।
स्थिरः शुभग्रहैर्दृष्टः शस्तो लग्नः शुभाश्रितः ॥५२॥

गुरुशुक्रबुधैर्युक्तो लग्नो दद्यादानायुषा ।
राज्य सौख्य धनं[३] पुत्रान् यशो धर्मादिकं बहु ॥५३॥

प्रथमः[४] सप्तमस्तुर्यो दशमः केन्द्र उच्यते ।
गुरुशुक्रबुधास्तत्र सर्वसिद्धिप्रदायकाः ॥५४॥

त्र्येकादशचतुर्थस्था[५] लग्नात्पापग्रहाः शुभाः ।
अतोऽन्येऽनिष्टकार्यार्थे[६] योज्यास्तिथ्यादयो बुधैः ॥५५॥

---

१ पादन्यूनश्चतुर्नाड्यो क० पा० २ मेषमीनयोः, घ० पा० ।
३ बलं, ख० घ० पा० । ४ प्रबलः, मू० ग० पा० । ५ एकादश, ख० पा० । ६ अतोऽनिष्टककर्मार्थे, मू० अ० ग०घ०पा० ।

सुयोगे शाश्वतो धर्मस्ताराायां पुष्टिजीवितम् ।
सुलग्ने च महाभोगो विषुवे चेप्सितं फलम् ॥५६॥
षडशीतिमुखे पुण्ये त्वयने च महातिथौ१ ।
ऋद्धिरारोग्यमैश्वर्यं देवस्थापनतो भवेत् ॥५७॥
सन्ध्यागते कुलग्ने च प्रत्यस्तमितसुग्रहे२ ।
दुर्ऋक्षे दुर्ग्रहे३ विष्टौ नक्षत्रे चैव सङ्ग्रहे ॥५८॥
दुर्निमित्ते तथोत्पाते चन्द्रसूर्योपमर्दने ।
एतेषु स्थापिता देवाः क्षयदुर्भिक्षरोगदा ॥५९॥
तस्माद्दिनं परीक्ष्यादौ यज्ञोपस्करमाहरेत् ।
त्रिष्वेकमेव४ निष्पन्नं लिङ्गं तिष्ठति यच्चिरम् ।
भवेद्दोषकरं तस्मात्प्राप्कस्थापितं वरप्रदम् ॥६०॥

इति लक्षणसमुच्चये आरंवादिदिनपरीक्षणं नाम दशमो विधिः ॥

---

१ महत्तिथौ, ख० पा० । २ सङ्ग्रहे । मू० अ० क० ख० पा० । ३ कुग्रहे ख० पा० । ४ तिष्टेक ख० पा० । ५ प्राक ख० पा० ।

अथैकादशः

ज्येष्ठलिङ्गक्रमेणैव मण्डपं कारयेत्त्रिधा ।
त्रिंशद्धस्ता द्विभिश्चान्यो दशहान्या कचिन्मते ॥१॥
हस्तैर्द्वादशभिश्चान्यो द्विगुणैर्मध्यमो मतः ।
त्रिगुणैर्ज्येष्ठ इत्येवं१ कारयेदन्यथापि वा ॥२॥
हस्तांस्तु द्वादशारभ्य क्रमाद्द्वौद्वौ प्रवर्ध्य च ।
अष्टाविंशतिपर्यन्तं विदध्यान्मण्डपान्नव ॥३॥
घनो घोषो विराजश्च काञ्चनः कामरामकौ ।
सुवेशो घर्घरो दक्षो मण्डपा नामतो२ नव३ ॥४॥
धाम४सूत्रान्तरं कृत्वा कुर्याद्यागस्य मण्डपम् ।
प्रासादस्याग्रदेशे च नासन्ने न च दूरतः ॥५॥
वास्त्वधिदेवतामिष्ट्वा कुर्याद्घनादिमण्डपान् ।
जानुमात्रोद्धृते शल्ये प्रागीशेन्दुप्लवे कृते ॥६॥
क्षेत्रं त्रिधोभयोः कृत्वा स्तम्भान्कोणेषु योजयेत् ।
वेदास्रान् वर्तुलान् वापि अवक्रान् याज्ञिकान् दृढान् ॥७॥
द्वादशैव ततो बाह्ये मध्ये५ स्तम्भचतुष्टयम् ।
तच्चूडाशल्यबन्धेन योजयेद्द्वारकद्वयम् ॥८॥

---

१ ज्येष्ठमित्येवं, घ० पा० । २ नाम्मता घ० पा० । ३ दश मू० पा० । ४ धाम्नः सकाशाद्धामप्रमाणं सूत्रान्तरं त्यक्त्वेत्यर्थः, क० पा० । ५बाह्यमध्ये, मू० पा० ।

शिखाङ्घ्रिक त्रिभिः काष्ठैर्वलिकां तस्य चोपरि।
षड्भिस्तु पटलैश्छन्नं घनादि मण्डपत्रयम् ॥९॥

काञ्चनादिकमप्येवं त्रितयं किन्तु कण्ठयुक्।
अष्टभिर्मर्कटैर्युक्तं द्वारकैश्च त्रिभिर्युतम् ॥१०॥

ऊर्ध्वंशं१ बन्धनैर्बद्धं सल्लोहैः शस्तदारुभिः।
अष्टभिश्छदनैश्छन्नं सुवेशादित्रय भवेत् ॥११॥

पक्षो२न्नतिः पृष्ठ्यंशो द्विगुणा तच्छिखोन्नतिः।
उपजंघाष्टकी चैषां विस्तरार्कांशसमुन्नताम् ॥१२॥

विस्तरार्कांशमानेन भूमौ स्तम्भान्निवेशयेत्।
तेन मानेन कण्ठः स्यान्मण्डपान्तरमुच्यते ॥१३॥

द्वारोच्छ्रयान्तरं त्यक्त्वा गृहलिङ्गे गृहाग्रतः।
जयाख्यो दशहस्तश्च विधातव्यो घनाकृतिः ॥१४॥

महार्चायास्तुविन्यासे भवेयुर्मण्डपास्त्रयः।
सुवेशसदृशाः किन्तु स्तम्भविंशतिवर्जिताः४ ॥१५॥

कण्ठद्वयसमायुक्ता५ धारकैः पञ्चभिर्युताः।
लोहकण्टकसम्बद्धकपिभिर्जिनसंयुताः ॥१६॥

सुबद्धाश्च दृढाश्चैव द्वादशच्छदनान्विताः६।
शतार्धहस्तो विपुलः पञ्चोनो विभ्रमो७ भवेत् ॥१७॥

---

१ ऊर्ध्वङ्ग, घ. पा.। २ अक्षो, ग. पा.। ३ राक्षां, घ. पा.। ४ वर्धिता, ख. ग. घ. पा.। ५ सभोक्ता वा, ख. पा. ६। द्वादशाब्जदलान्विताः, मू. पा.। ७ विपुरो, ख. पा.।

चत्वरिंशत्करो भूतिः क्षेत्रे तत्वपदे धृते
संयोज्याः कर्णगांस्तम्भान्नित्येवं मण्डपद्वयम् ॥१८॥
चतुरस्राश्चतुर्द्वाराश्चतुस्तोरणभूषिताः ।
कर्तव्या मण्डपाः सर्वे मध्ये पीठसमन्विताः १९॥
एकहस्तं समारभ्य यावदष्टकरं क्रमात् ।
सामान्यात्सर्वपीठानि क्वचिदन्यमतेऽन्यथा ॥२०॥
मण्डपस्य त्रिभागेन पीठं स्याच्चतुरस्रकम् ।
कूर्मपृष्ठोन्नतं मध्ये द्वादशांशसमुच्छ्रितम् ॥२१
त्रिचतुष्पञ्चहारं वा सप्तहारमथापि वा ।
ऐष्टकं सर्वसिध्यर्थं क्वचिदुक्तं मतान्तरे ॥२२॥
त्रिहारं दुर्जयं चैव चतुर्हारं सुभीषणम् ।
पञ्चहारं विशालाक्षं सप्तहारं सुतारकम् ॥२३॥
अवक्रं शल्यहीनं च मनोज्ञं लक्षणान्वितम् ।
सिद्धान्ते वालुकापूर्णं पीठशय्यान्वितं १ शुभम् ॥२४॥
कुण्डाष्टकसमायुक्तं तान्त्रमण्डलभूषितम् ।
वस्त्रैर्नानाविधैश्छन्नं मण्डपं स्तम्भसंयुतम् ॥२५॥
पीठोर्ध्वं च वितान तु कदलीवृन्द २शोभितम् ।
लम्बपुष्पस्रजं कुर्यात्सघण्टाचामराम्बरम् ॥२६
वरगन्धान्वितं चारु दिग्ध्वजं ३ कलशाकुलम् ।
पीतं रक्तं तथा कृष्णं धूम्रं श्वेत शुक्रप्रभम् ॥२७॥
हेमाभं स्फाटिकं पीतं पुष्ठये चेन्द्रादिकान् ध्वजान् ।
नवैतान्धवलान्४ञ्छान्तौ रौद्रे कृष्णान्प्रयोजयेत् ॥२८॥

---

१ सव्यान्वितं, घ.पा.। २ विन्दु, घ.पा. । ३ दिग्ध्वजं, मू.अ क. ख. ग. ङ. पा. । ४ ञ्छञ्छलान्, मू. पा. ।

पञ्चहस्ता ध्वजाः कार्या वैपुल्येन द्विहस्तकाः ।
सप्तहस्ताः पताकास्तु विंशत्यङ्गुलविस्तराः ॥२६॥
दण्डहस्तप्रविष्टास्तु ध्वजानां पञ्चहस्तकाः ।
दशहस्ताः पताकानां पञ्चमांश१ प्रवेशिताः ॥३०॥
क्वचिदन्यप्रकारेण ध्वजानां मानमिष्यते ।
सप्तभिर्दशभिः कार्या विंशा याश्चकरैर्ध्वजाः ॥३१॥
कन्यसे मध्यमे ज्येष्ठे वैपुल्यात्तु द्विहस्तकाः ।
क्वचिदष्टकरायामा विस्तारेण द्विहस्तकाः ॥३२॥
मध्यमास्तु तदर्धेन हीना मध्यार्धतां२ ध्वजाः ।
वस्त्रैर्द्रढैर्नवैर्नित्यं देवकार्येषु पूजिताः ॥३३॥
ध्वजैरथपताकाभिर्भूषयेन्मण्डपाद्बहिः ।
ताम्रा लौहाश्च रौप्याश्च हैमाः प्रागादितोरणाः ३ ॥३४॥
कुचन्दनं लघुं श्वेतं चन्दनासरदारुजाः ।
पूर्वादिदिक्षु विन्यस्यास्तोरणा भूतये क्रमात् ॥३५॥
मधूकचूतकाश्मीरी पलाशाश्चार्थशान्तिदाः४ ।
वैकङ्कतशमीबिल्वखादिराः शत्रुनाशनाः ५ ॥३६॥
न्यग्रोधश्च पलाशश्च उदुम्बरोऽथ सिध्रकः ।
अश्वत्थश्चापि माधूकः प्लक्षो बिल्वाष्टमः क्वचित् ॥३७॥
एतेषां तोरणान्यष्टौ पूर्वाद्यष्टास्यमण्डपे ।
प्रागीशवह्निकोणेषु पूर्वास्यं त्रितयं भवेत् ॥३८॥

---

१ पञ्चहस्त, मू.पा. । २ मध्योर्ध्वतो, घ.पा । ३ प्रासादतोरणाः, मू.अ.ख.ग.पा. । ४ चार्थद्धिसदाः, मू.क.पा. । ५ नाशकाः; ख.पा. २ वास्ये, घ. पा. ।

वायव्ये नैर्ऋते वापि[1] पश्चिमास्यं तु मण्डपे।
सौम्ये सौम्याननं कार्यं याम्ये याम्याननं मतम् ॥३९॥
शालकोटज[2] शाकोत्थाः सारलाः पुष्टि भूतिदाः।
न्यग्रोधोदुम्बराश्वत्थप्लक्षवृक्षोद्भवाः शुभाः ॥४०॥
यथेष्टमेतद्‌प्राप्तौ कार्याः प्रागादितोरणाः।
चतुरस्रास्त्वथाष्टास्रा वृत्ता वा चक्रनिर्व्रणाः ॥४१॥
तज्जङ्घे पञ्चहस्ते च तदर्धात्तु ललाटकम्।
जङ्घायाश्च ललाटस्य चैकहस्तप्रवेष्टनम्[3] ॥४२॥
तदूर्ध्वतस्त्रिशूलं च त्रिंशत्यङ्गुलमुच्छ्रितम्।
घण्टाचामरसद्वस्त्र पुष्पस्रग्गन्ध धूपनैः ॥४३॥
संपूज्यतोरणान् वक्त्रमन्त्रेण[4] स्वासु दिक्षु च।
जङ्घादौ देवता न्यस्त्वा (स्य) भूमौ हस्तौ प्ररोपयेत् ॥४४
जङ्घासु वसवो न्यस्या[5] ललाटे च युगाधिपाः।
शृङ्गे द्वादशराशिस्थाः स्वे स्वे रुद्रार्कचक्रिणः ॥४५
आपो धरो ध्रुवश्चेति सोमश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च एतेऽष्टौ वसवः स्मृताः ॥४६॥
कृते श्रीकण्ठनामेशो द्वापरे शङ्करः प्रभुः।
त्रैतायुगे त्वनन्ताख्यः कलौ स्वामी सदाशिवः ॥४७॥
इन्द्रान्तकजलेन्दूनां दिक्षु स्वासु निवेशयेत्।
मीनादीनां च राशीनां त्रितयं त्रितयं क्रमात् ॥४८॥

---

१ वास्ये, घ.पा.। २ शालकौ ध्वज, मू.पा.। ३ हस्तं प्रवेष्टितम् ख पा.। ४ तोरणायुक्तमन्त्रेण, मू.अ.ख.पा.। ५ न्यस्य ख.पा.।

स्थाणुं शिवं पशोर्नाथमुग्रं शर्वं त्रिलोचनम् ।
ईश्वराख्यं च रुद्रं च शङ्करं शम्भुज्ञकम् ॥४६॥
महेश्वरं महादेवं मीनादित्रितये१ क्रमात् ।
विष्णवर्कयोः प्रतिष्ठाने विष्णिवन्द्रदीन्प्रकल्पयेत् ॥५०॥
विश्वायनमद्रा भूतिर्विकाशाख्यमहावला: ।
पूर्वादितोरणा ध्यक्षाश्चत्वारोमीऽ प्रकीर्तिता: ॥५१॥
जातबीजसरावैश्च वर्धमानैः ससर्षपैः ।
बहिरेवमलङ्कृत्य ततश्चाभ्यन्तरे पुन: ॥५२॥
अष्टौ घटकपाटाश्च द्वारस्था: पल्लवान्विता: ।
सुरत्नौर२ षधिगर्भाश्च संपूर्णा गन्धवारिणा: ॥५३॥
चन्दनैश्चर्चिता, स्थाप्या: कण्ठे वस्त्रैर्विभूषिता: ।
दीपाक्षतफलैर्युक्ता. द्वा: पालाष्टकमन्त्रिता:३ ॥५४॥
शान्तशिशिरपर्जन्या विशोकाप्यायकामृता: ।
रूद्रोवीर४ इति ज्ञेया अष्टौ कलशदेवता: ॥५५॥
कुमुदः कुमुदाक्षश्च५ पुण्डरीकोऽथ वामनः ।
पञ्चमः शङ्कु६कर्णाख्य: सर्वनेत्रस्तथापरः ॥५६॥
सुमुखाह्व७ प्रसिद्धश्च तथा वै सुप्रतिष्ठित:८ ।
एकैक भूतकोटीभिरावृता ध्वजदेवता: ॥५७॥

---

१ त्रितयं, ख. पा. । २ सरत्नौ, मू० अ० ख० पा० । ३ ष्टसमन्विता:, ख० पा० । ४ वीत, क० पा० । ५ रव्यश्च, मू० अ० क० ग० घ० पा० । ६ शम्भु. क० ग० पा० । ७ सुमुखाह्वः, क० ग० पा० । ८ चैवप्रतिष्ठित:' मू० पा ।

नन्दीशश्च महाकालो दक्षो भृङ्गी चतुर्मुखः ।
दारः सितासितश्चेति विज्ञेया द्वारपालकाः ॥५८॥
मण्डपस्य बहिश्चूतमालापरिवृतं मतम् ।
रम्भाष्टकसमायुक्त क्षेत्रपालाष्टकन्वितम् ॥५९॥
हेतुकस्त्रिपुरघ्नश्च अग्न्याख्यश्चाग्निजिह्वकः ।
कालः करालिकैकाङ्घ्रि भीमोऽष्टौ क्षेत्रपालकाः ॥६०॥
किरातादिकथाचित्रैश्छन्नकाष्टपटैः कटैः ॥
बध्दद्वारत्रये तस्मिन् वाहयेत्पश्चिमाननम् ॥६१॥
अन्त्यजश्वपचादींश्च तथान्याश्रमदीक्षितान् ।
प्रवेशयेन्नर तत्रैव कुर्याद्यागस्य रक्षणम् २ ॥६२॥
लक्ष्यं४स्नानादिकार्यार्थं विमलं मण्डपोत्तरे ।
प्रासादस्य प्रमाणेन सपीठं द्विच्छदान्वितम् ५ ॥६३॥
प्रासादोत्तरतो रौद्यां दिशि वा चारुरूपिणम् ।
चतुश्छदं चतुष्कोणं वीरं विमलमानतः ॥६४॥
स्नानाख्यमण्डपं रम्यं स्नानोपस्कर भूषितम् ।
कोणे ध्वजवितानाढ्यं कदलीचूतमण्डितम् ॥६५॥
एकतोरणमेकास्यं तन्मध्ये वेदिकां शुभाम् ।
मण्डपार्धप्रताणेन चतुर्थांशसमुच्छ्रिताम् ६ ॥६६॥

---

१ चद्रमुखः,घ० पा० । २ त्तु, मू० पा० । ३ मण्डपम, ख० पा० । ४ लक्ष्म, मू० अ० क० ग० घ० ङ० पा० । ५ द्विकरान्वितम, क० पा । ६ स्वचतुर्थांशमुच्छ्रितम्, ख० घ० पा० ।

ऐष्टिकीं वालुकायुक्तां सौम्यनालां द्विमेखलाम् ।
कुर्वीत वाथ सामान्यं मण्डपे वेदिकाद्वयम् ॥६७॥

एकस्यां लक्षणोद्धारमन्यस्यां मज्जनक्रिया[१] ।
कुर्यात्तन्मध्यतः पीठं भद्राख्यं क्षीरवृक्षजम् ॥६८॥

षोडशाङ्गुलमुच्छ्रायं द्विगुणं विस्तृतं दृढम् ।
विस्तारद्विगुणं दैर्घ्यं कन्यसानां सदैव तु ॥६९॥

चतुरङ्गुलवृद्धिः स्यादन्येषां तु क्रमात्क्रमात्[२] ।
पीठमानमिति प्रोक्तं कुटीमानमतो ब्रुवे ॥७०॥

मण्डपार्धापरे भागो प्रागास्योपस्कराय च ।
प्रच्छन्ना द्विच्छदा कार्या कुटिका परिरक्षिता ॥७१॥

इति लक्षणसमुच्चये मण्डपविधानं नामैकादशो विधिः ।

---

१ मार्जनक्रियाम्, ख० पा० । २ क्रमो मतात्, क० पा० ।

मुद्रक:- जगत् उद्धार प्रेस
१०/२८५ प्युखाटोल
काठमाडौं
नेपाल